Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कतिपय-
नैपालसंस्कृतग्रन्थकार-
परिचयः

स्वाद्ध्यायशाला
२०३६

पथिकृत्-

शिवराज आचार्यः कौण्डिन्न्यायनः

कार्यकर्तारः-

आमोद आचार्यः कौण्डिन्न्यायनः
प्रियंवदाम्बा कौण्डिन्न्यायनी
प्रमोद आचार्यः कौण्डिन्न्यायनः
सुमोद आचार्यः कौण्डिन्न्यायनः
सम्मोद आचार्यः कौण्डिन्न्यायनः
वशंवदाम्बा कौण्डिन्न्यायनी
अतिसम्मोद आचार्यः कौण्डिन्न्यायनः

स्वाद्ध्यायशाला

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कतिपय-
नैपालसंस्कृतग्रन्थकार-
परिचयः

स्वाद्ध्यायशाला
२०३६

पथिकृत्–
शिवराज आचार्यः कौण्डिन्न्यायनः

कार्यकर्तारः–
आमोद आचार्यः कौण्डिन्न्यायनः
प्रियवँवदाम्बा कौण्डिन्न्यायनी
प्रमोद आचार्यः कौण्डिन्न्यायनः
सुमोद आचार्यः कौण्डिन्न्यायनः
सम्मोद आचार्यः कौण्डिन्न्यायनः
वशवँवदाम्बा कौण्डिन्न्यायनी
अतिसम्मोद आचार्यः कौण्डिन्न्यायनः

स्वाद्ध्यायशाला
च. २/४१६ सरस्स्वतीमार्गः, लाजिम्पाट्,
काष्ठमण्डपनगरम्–२, नेपालः, दूरस्स्वनः ९८४१०७१४६८।
२०४८

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकाशिका-

देवी आचार्यानी

स्वाद्ध्यायशालाकुटुम्बस्स्य कृते

प्रथमं संस्करणम्, १००० पुस्तकानि

२०४८

मूल्ल्यम्-

भारतीयानि रूप्प्यकाणि २५।-

नैपालीयानि रूप्प्यकाणि ४०।-

मुद्द्रकः-

कान्तिपुरीमुद्द्रणालयः

लाजिम्पाट्, दूरस्स्वनः ४११६६४

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रैहलौकिकसुखार्थिषु दण्डनीतिर्
वार्तेति शास्त्रयुगलङ्ग गुरुणोपदेश्यम् ।
यः पारलौकिकमभीप्सति शर्म धर्मन्
त्रय्या प्रबोधयति तङ्ग कृपया महेशः ।।

[ज्ञान-उपासना-र-कर्मका अधिकारिहरु मद्ध्ये जो कर्मका अधिकारि छन् तिनमा एस लोकको सुख चाहनेहरुलाइ गुरुले दण्डनीतिविद्द्या र वार्ता विद्द्या पडाउन उचित हुञ्च । जो पारलौकिक कल्ल्याण चाहञ्च तेसलाइ कृपागरेर परमात्माले वेदद्वारा धर्म राम्म्ररि बुजाउंचन् ।]

– गङ्गाधरशास्त्रिणः
(मलिविलासिसल्लापे ४।८८)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपोद्घातः

संस्कृतवाङ्मयस्य महत्त्वम्
नेपालदेशे
संस्कृत– वाङ्मय–संरक्षण– सम्वर्धन–प्रयासः
संस्कृतशिक्षाया वर्तमाना शोचनीया अवस्था
तस्या अवस्थाया निराकरणस्य मार्गश्च

१. संस्कृतवाङ्मयस्य महत्त्वम्

सम्पूर्णमानवजातेः कृते संस्कृतवाङ्मयस्य महत्त्वम्

भूमण्डलस्य यस्मिन् कस्मिन्नपि भागे निवसतां सर्वेषाम् मानवानाञ्च कृते संस्कृतवाङ्मयस्य प्रभूतम् महत्त्वमस्तीति सुविदितमेव । प्राचीने काले संस्कृत-भाषायाः प्रचारस्य क्षेत्रत्वं विशालमासीदित्यत्र प्रमाणत्वेन फ्रान्सा-ऽऽङ्गल-रोम- शर्मण्य- रुस- ग्रिसादि- युरोप- भाषासु पारसभाषायाञ् च प्राप्यं संस्कृत-शब्दमूलक- शब्दभाण्डागारम् प्रस्तोतुं शक्यते । पञ्जाबि-हिन्दि-नेपालि-मैथिलि-गुजराति-मराठि-बङ्गालिप्रभृतीनाम् भारतर्षीयाणामाधुनिकभाषाणाम् मूलं संस्कृतमेवेति तु सर्वविदितमेव ।

संस्कृतवाङ्मये विद्यानावं विविधा विधाः प्राप्यन्ते । **वार्ताया विद्यायाः** कृषिशास्त्रम्, पशुशास्त्रम् (अश्वशास्त्रम्, गजशास्त्रम्), वाणिज्य-शास्त्रम्, स्थापत्यशास्त्रम्, मूर्तिशास्त्रम्, यन्त्रशास्त्रम्, विमानशास्त्रम् आयुर्वेद-शास्त्रमित्यादीनि शास्त्राणि; कामशास्त्रम्, सङ्गीतशास्त्रम्, चित्रशास्त्रम्, काव्यशास्त्रम्, नाट्यशास्त्रम् इत्यादीनि ललितकला- शास्त्राणि, अन्यानि चतुष्षष्टेः कलानामन्तर्गतानि कलाशास्त्राणि, काव्य-नाट्य कथा- ऽऽख्यायिका-लक्षणादिरूपाण्यनेकानि शास्त्राणि, **त्रय्या विद्याया** वेदाः वेदाङ्गानि, स्मृति संहिताः, पुराणानि, उपपुराणानि, इतिहासः, वेदाऽविरोधीनि वैष्णव- शैव-शाक्त- सौर- गाणपत्य- कौमारादीनि तन्त्राणि चेत्यनेकानि शास्त्राणि; **दण्डनीत्या विद्याया** नीतिशास्त्रम्, प्रशासनशास्त्रम् (अध्यक्षप्रचारः), न्यायशास्त्रम् (धर्मस्थीयम्), युद्धशास्त्रम् आयुधशास्त्रम्, खरपट्ट इत्यादीनि शास्त्राणि, **आन्वीक्षिक्या विद्याया** तर्कशास्त्रम्, पदार्थशास्त्रम्, साङ्ख्यशास्त्रम्, योग-शास्त्रम् इत्यादिकानि शास्त्राणि संस्कृतवाङ्मये सन्ति । काव्य-नाट्य-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कथाऽऽख्यायिकादिरूपा ललितकलाप्रधाना नाना- विद्या- सिद्धान्तगर्भा अनेके ग्रन्थाश्च संस्कृते वर्तन्ते । संस्कृतवाङ्मये यादृशी प्राचीनताऽविच्छिन्नता च वर्तते तादृशी प्राचीनताऽविच्छिन्नता चाऽन्यत्र सुदुर्लभा प्रतीयते । मानवसभ्यताया विभिन्नानाम् पक्षाणामितिहासस्योपलब्धेश्चाऽनुसन्धानञ् चिकीर्षूणाङ्कृते संस्कृतवाङ्मयमक्षयो निधिरस्तीति तत्थ्यं सर्वस्वीकृतवँ वर्तते ।

एवम् मानवानाङ् कृते सार्वजनिकनिधिरूपेण स्थितं संस्कृतवाङ्मयमेतस्मिन् कोलाहलपूर्णे आधुनिके मानवसमाजे नैतिकताया मानवताया विश्वबन्धुतायाश् च प्रसारेऽपि महत्त्वपूर्णम् भवितुं शक्नोतीति संस्कृतवाङ्मयस्योपनिषद्-गीतादिग्रन्थानां स्वल्पमपि परिचयम् प्राप्तवताञ् जनानामतिरोहितम् । रोगाणान् निवारणे, मानससन्तुलनस्य स्थापने, मानसबलस्योपलम्भे, शान्तेर् लाभे च योगशास्त्रप्रक्रियाणाम् महत्त्वमपि बहुचर्चितमेवास्ति । उपनिषदामद्ध्ययनात् शोपन् हावर्, बर्ट्रण्ड् रसल्, टोमस् ष्टर्न्ज् एलिअट् इत्यादयश् चर्चिताः पाश्चात्त्या दार्शनिका ग्रन्थकाराः कवयश् च गभीररूपेण प्रभाविता इति च विज्ञा जानन्त्येव । मानवजीवनरहस्यान्वेषणे संस्कृतवाङ्मयस्य सर्वोपकारकताऽपि विचारशीलानाञ् जनानां सुविदितैव ।

तावदेव न, भौतिकविज्ञानानुसन्धानार्थम् प्रेरकाणि अनेकानि वस्तून्यपि संस्कृतवाङ्मये प्राप्यन्ते । विख्याता भारतवर्षीया वैज्ञानिका जगदीशचन्द्रवसु-चन्द्रशेखरवेङ्कटरमणादयस् संस्कृतवाङ्मयेन तस्यैकेन शब्देन वा दत्तया प्रेरणया प्रयोगान् विधाय नवीनकवँ वैज्ञानिकञ् ज्ञानम् प्राप्तवन्त इति च तेषाञ् जीवनचरित्राणि ज्ञातवन्तो विवेचका महानुभावाः कथयन्ति । सुसङ्गमनयन्त्रस्य कम्प्युटराख्यस्य कृते सर्वाधिकतया समुचिता भाषा संस्कृतमेव भवितुं शक्नोतीति विचारश्च चर्चायामागतोऽस्ति । अतश्च संस्कृतभाषायास् स्वरूपमपि व्यवस्थिततमवँ वैज्ञानिकञ् चेत्त्यप्यवगम्यते ।

वैदिकानामार्याणां सर्वेषाम् भारतवर्षनिवासिनाञ् च कृते संस्कृतवाङ्मयस्य विशिष्टम् महत्त्वम्

हिन्दुधर्म इति वैदिकसनातनवर्णाश्रमधर्मस्यैवाऽऽधुनिकलँ लौकिकवँ व्यावहारिकन् नाम वर्तते । ऋग्वेदप्रतिपादित-सिन्धुसभ्यता-पालका वैदिका आर्या एव लोके हिन्दव उच्यन्ते । अतो हिन्दूनाङ् कृते वेद- वेदाङ्ग- स्मृति-पुराणादिसंस्कृतवाङ्मयस्य महत्त्ववँ वर्णनातीतवँ वर्तते । 'हिन्दुभिस् सह वर्तमानस्य वेदवेदाङ्गादिसंस्कृतवाङ्मयसम्बन्धस्य सर्वथा विच्छेदः क्रियते तर्हि हिन्दूनां हिन्दुत्वमेवाऽपगच्छति । हिन्दूनाञ् जन्मनः प्रभृति मरणयँ यावत् सर्वे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धार्मिकक्रियाकलापा वेदवेदाङ्गादिसंस्कृतवाङ्मयस्यैवाधारे संस्कृतभाषाप्रयोगेणैव च क्रियन्ते । हिन्दुराष्ट्रियतायास् स्रोतो वेदादेव प्रवहति, हिन्दुनैतिकता संस्कृतवाङ्मयेनैव प्रकाशिता भवति । हिन्दुजीवनपद्धतिर् वेदैर् वेदाङ्गैश्चैव निर्दिष्टाऽस्ति । हिन्दूनावँ् विशिष्टायाश् शिक्षापद्धतेः परम्परां स्थिराङ्कृत्वा हिन्दुराष्ट्रियताम् बलीयसीङ्कर्तुं हिन्दूनाङ्गौरववँ् वर्धयितुञ् च संस्कृतविद्यापरम्पराया विशिष्टा भूमिका भवति । तस्माद् हिन्दूनाङ्कृते संस्कृतवाङ्मयस्स्य-विशिष्टम् महत्त्वमप्यस्ति । हिन्दूनाम् मूलस्य स्थलस्स्य भारतवर्षस्य प्रदेशेषु हिन्दु-प्रायजनसमुदायेषु वर्तमानानाम् अहिन्दूनाङ्कृतेऽपि समन्वयपूर्णां शान्तिपूर्णाञ् च जीवनयात्रां सञ्चालयितुम् उपयोगिनो ज्ञानस्स्य उपलम्भकतया संस्कृतवाङ्मयस्स्य महत्त्वम् प्रभूतमेव वर्तते ।

नेपालवासिनाङ्कृते संस्कृतवाङ्मयस्स्य विशिष्टम् महत्त्वम्

नेपालदेशो भूमण्डले एकमेव हिन्दुराज्ज्यमुच्च्यते । एतन्निवासिनाङ्कृते संस्कृतवाङ्मयस्स्य महत्त्वम् प्रभूतमस्ति । नेपालवासिनां राष्ट्ररूपेणैकताया एकम् प्रबलं सूत्रन् नैपालीयभाषा वर्तते । सा च संस्कृतमूलाऽस्ति । नैपालीयभाषायाम् अभिव्यक्तिशक्तेर् वर्धनाय सौन्दर्यस्स्याऽऽधानाय च पदेपदे संस्कृतभाषायाश् शब्दाः प्रयुज्ज्यन्ते । नेपालदेशस्स्य धर्म-संस्कृति-प्रशासनसम्बद्धस्स्य शिल्पसम्बद्धस्स्य कलासम्बद्धस्स्य चेतिहासस्स्य महत्त्वपूर्णोऽशस् संस्कृतवाङ्मये सुरक्षितोऽस्ति । नेपालवासिषु मद्ध्ये प्रभूततरेषु मनुष्येषु धर्मभावनाया संस्कृतिजागरणस्स्य नैतिकतायाः कलात्मकानुभूतेश्च सम्पादने चरित्रबलस्स्याऽभिवर्धने च संस्कृतवाङ्मयस्स्य महती भूमिकाऽस्ति । भौतिकविकासस्स्यापि मूलरूपेण तिष्ठन्त्या वास्तविकहिन्दुराष्ट्रनीतेर् विकासाय च संस्कृतवाङ्मयस्स्य नितान्तमावश्श्यकता वर्तते । दैनन्दिनजीवनयात्रायाः कृतेऽपि बहुसङ्ख्यका नैपाला जना संस्कृतवाङ्मयस्थञ् ज्ञानमपेक्षन्ते । अस्माकं हिन्दूनाम् मुक्ख्यायाः परम्परायास् साधीयसः परिचयस्स्य प्रदाने समर्थानावँ् वेद- स्मृति- पुराणानावँ् व्याक्ख्यातॄणावँ् विदुषाम्; धार्मिककृत्त्यव्यवस्थापनसहायकानान् धर्ममीमांसकानाम्; धार्मिककृत्त्यापेक्षितकालनिर्णयसहायकानाञ् ज्यौतिषिकाणाम्; वेदस्मृतिपुराणादिप्रतिपादित-धार्मिककृत्त्यपद्धतीनाञ् ज्ञातॄणाम् प्रयोक्तॄणाञ् च पण्डितानाम्; वैदिकदर्शनस्स्य व्याक्ख्यातॄणावँ् विदुषाम्; वैदिकदर्शनस्स्य तर्केण संरक्षणम् पोषणञ् च कर्तुङ् क्षमाणान् तार्किकाणाम्; आयुर्वेदज्ज्ञानाङ् कुशलानाञ् चिकित्सकानाम्; सङ्ग्रहालयादिस्थानां शिल्पकला- स्थापत्यकलाऽऽयुर्वेदविज्ज्ञानादिविषयाणामनेकेषाम् महत्त्वपूर्णानाङ् ग्रन्थानामनुसन्धानङ्कृत्त्वा तेषु स्थितानान् नवानावँ् व्यावहारिकाणां शास्त्रीयाणाञ् च विषयाणाम् प्रतिपादने प्रकाशने च समर्थानामद्ध्येतॄणाम्; उक्तानां सर्वासावँ् विद्द्यानाम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परम्परायास् संरक्षणे समर्थानावँ् विशिष्टानां शिक्षकाणाम्, तथा प्रच्छन्नौपनिवेशिक-विदेशि-विधर्मिशासककार्यकर्तृतुल्य-वैदिकधर्मसंस्कृतिपरम्पराचारविचार-शून्य-संस्कृतवाङ्मयपरिचयविधुर-कथित-समाजसेवक-राष्ट्रसेवकानां स्थाने साधारणशिक्षाम् प्राप्तवता जनेन कर्तुं शक्यानि समाजसेवाया राष्ट्रसेवायाश् च विविधानि कार्याणि कर्तुं समर्थानां स्वीय-धर्मसंस्कृति-परम्पराऽऽचारविचाराऽऽदरवतां संस्कृतवाङ्मयपरिचययुतानां संस्कृतमूलकसाधारणशिक्षाम् प्राप्तवतां समाजसेवकानां राष्ट्रसेवकानां राष्ट्रनीतिसम्बद्धकार्यकर्तॄणां राष्ट्रनेतॄणाञ् च भूमण्डलेऽद्वितीये हिन्दुराष्ट्रभूमिरूपे नेपालदेशे परमावश्यकता वर्तते। एतस्मात् कारणान् नेपालवासिनाङ् कृते संस्कृतवाङ्मयस्याऽतीव महत्त्ववँ् वर्तत इति स्पष्टम् भवति ।

२. नेपालदेशे संस्कृतवाङ्मय-संरक्षण-सवँ्वर्धन-प्रयासः

भूमण्डले जम्बूद्वीपे भारतवर्षक्षेत्रे हिमालयमद्ध्यभागे दक्षिणपार्श्वे नेपालदेशस् स्थितोऽस्ति । एष देशोऽनादेः कालात् प्रभृत्येव वैदिकानामार्याणाम् पुण्यभूमिरिति वेदेषु स्मृतिषु पुराणेषु रामायणे महाभारते रघुवंश-कुमारसम्भवादिमहाकाव्येषु च हिमवतः पर्वतराजस्य महिम्नो गीतत्त्वादवगम्यते । शान्तिप्प्रिया ऋषयो जनसम्मर्दरहितासु कोलाहलशून्यासु हिमालयप्रत्यन्तपर्वतोपत्यकाधित्यकासु आश्रमान् संस्थाप्य विद्यायास् साधनाङ् कुर्वन्ति स्म । तत्र देवघट्टप्प्रदेशादिषु वसिष्ठादीनामाश्रमास् स्थिता इति पुराणैतिह्यविदो जानन्त्येव ।

भारतवर्षे यवन-शक-हूण-मुसलमान-मुगलानामाक्रमणेषु जातेषु तु वेदस्मृतिपुराणादिविद्यानावँ् वर्णाश्रमधर्माणाञ् चाऽनुपालनन् नेपालदेश एव विशेषरूपेणाऽभूदिति चैतिह्यविदामतिरोहितम् ।

रामायणस्य महाभारतस्य च प्राचीनतमं हस्तलिखितम् पुस्तकन् नेपालदेश एव सुरक्षितम्, बहूनां शाक्ततन्त्र-ग्रन्थानाम् बौद्धतन्त्रग्रन्थानाञ् च प्राचीनतमा हस्तलिखितग्रन्था नेपालग्रन्थागारेष्वेव सुरक्षिताः, अश्वघोषकृत-सौन्दरनन्द-सागरनन्दिकृतनाटकलक्षणरत्नकोष-शुभङ्करकृतहस्तमुक्तावल्यादयोऽनेके ग्रन्था अपि अन्यत्र लुप्ता नेपालदेशे एवोपलभ्य प्रकाशकैः प्रकाशिता इति विद्वांसो जानन्त्येव । अन्यत्र दुर्लभानि निष्पन्नयोगावल्यादिग्रन्थहस्तलिखितपुस्तकान्यपि नैपालग्रन्थागारेष्वेव सुलभानीति हरप्रसादशास्त्रिसूनुर् विनयतोषो भट्टाचार्यो नेपालदेशम् अद्ध्येतुस् स्वर्गम् भणतीति च नेपालविद्याविदो विदन्त्येव ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपालदेशे लिच्छविसम्प्रशासनकाले संस्कृतभाषाविद्याप्रचारस् स्वधर्म-रक्षाप्रयासश् च प्रशंसनीय आसीदिति तदानीन्तनाः प्रथममानदेवाऽनुपरमगुप्त-भारवि–द्वितीयजयदेव-बुद्धकीर्तिप्रभृतीनाम् प्रौढाः प्राञ्जलाश् शिलाभिलेखा-दयो लेखास् स्फुटम् प्रकाशयन्ति । कर्णालीप्रदेशे गण्डकीप्रदेशे च संस्कृतभाषा-विद्या–स्वधर्म–रक्षाप्रयत्न उल्लेखनीय एवासीदिति तत्रत्यसुवर्णपत्र–ताम्र-पत्रशिलापट्टोट्टङ्कितशासनलेखादयो लेखा अवगमयन्ति। मल्लकालेऽपि निगमा-ऽऽगमविद्याया अन्येषाञ् विषयाणाञ् च संस्कृतग्रन्थानाम् प्रणयनमविच्छिन्न-तया प्रचलद् दृश्यते ।

अर्वाचीने काले ऽपि नेपालदेशे प्रचलन्ती संस्कृतग्रन्थप्रणयनपरम्परा नेपा-लानाञ् जनानां संस्कृतभाषाविद्यासु अनुत्कटमपि गभीरमनुरागञ् व्यनक्त्येव ।

वैदिकसनातनवर्णाश्रम–धर्मानुयायिनामस्माकं राष्ट्र–समाज–कुटुम्ब-व्यक्ति–प्रकृतिविषयाणाञ् विचाराणाम् अजस्रस्रोतोरूपेण वर्तमाना संस्कृत-शिक्षाऽपि अनादेः कालात् प्रभृति नेपालदेशे गृहेगृहे स्वतन्त्रतया धर्माङ्गतया च पण्डितैर् ब्राह्मणैः, धनिकैर् बलिभिश् च कुटुम्बिभिरपि पण्डितब्राह्मणद्वारा सञ्चाल्यते स्म। एतया प्रणाल्यैव संस्कृतशिक्षालँ लब्धवन्तो जनाः पुराकाले महान्तो विद्वांसो ग्रन्थप्रणेतारश् च जाता विज्ञायन्ते । अर्वाचीने काले नेपाल-देशे विद्याविवृद्धये महत उल्लेखनीयस्य राष्ट्रियप्रयासस्याऽभावाद् विद्यायाम् महती प्रगतिर् नैव दृश्यते स्म, तथापि संस्कृतभाषाश्रितविद्यया राष्ट्रियचरित्रस्य साधारणतया संरक्षणन् तु क्रियमाणमेवाऽऽसीत् । यमलपर्वत-मण्डलाधिपतिना श्रीवत्सराजेन वैक्रमाब्दानां षोडशस्य शतकस्य प्रारम्भेऽ-भिनवानि विद्याकेन्द्राणि स्थापितानीति,वैक्रमाब्दानामेकान्नविंश्याश् शताब्द्याः पूर्वेऽर्धे कास्किमण्डलराजेन सिद्धिनारायणसाहेन तु जगन्नाथ–मणिभद्र-कुलराज–हर्षदेवादिपण्डितान् अध्येष्य छात्रावासादिव्यवस्थाञ् च कृत्वा भूमिदानेन विद्यालयोऽपि सञ्चालित इत्यपि ऐतिहासिका वदन्ति ।

३.नेपालदेशे संस्कृतशिक्षाया वर्तमाना शोचनीयाऽवस्था

एतादृशे व्यतिकरे नेपालदेशे जङ्गबाहादुरेण १९०८ तमे वैक्रमेऽब्दे(?) विद्यालये सञ्चालनीयाया आङ्लशिक्षाया बीजे रोपिते शनैश्शनैस् संस्कृत-शिक्षाऽपि विद्यालये सञ्चालनीयत्वेन परिणता किल । प्रथममेतादृशस् संस्कृत-विद्यालयो जङ्गबाहादुरपुत्रेण सेनापतिना जितजङ्गेन विष्णुहरि–रिमालम् पण्डितन् नियुज्य काष्ठमण्डपनगरस्थे पशुपति देव–पत्तने राजराजेश्वरीघट्टे स्थापित इति सोमनाथसिग्देलो वदति स्म। अन्ये त्वन्यथैव प्रदर्शयन्ति।१९२५-तमे वैक्रमेऽब्देऽपि नीलदेवपण्डित-वाचस्पति-पण्डितौ नेपाल–सम्प्रशासनेन

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दत्तवँ वेतनमुपभुज्य नैपालसम्प्रशासनदत्तवृत्तिभोजिनो विद्यार्थिनः पाठयतस् स्मेति तत्थ्यमिदानीम् प्रकाशमागतन् दृश्यते । विद्यालयेषु वेतनभोगिषु पण्डितेषु संस्कृतशिक्षान् दातुलँ लग्नेषु तत्प्रभावाद् गृहेगृहे स्वतन्त्रतया निर्वेतनतया निश्शुल्कतया च सञ्चाल्यमाना संस्कृतशिक्षा शैथिल्यम् प्राप्ता किल ।

यदा ख्रिस्तधर्मप्रचारकविद्यालयान् सञ्चाल्य नेपालदेशस्स्य शासनसूत्रधारत्त्वेनाऽर्थवलवत्त्वेन च प्रभावशालिनाञ् जनानां सन्ततीस् तेषु प्रवेश्य तन्मस्तिष्केषु स्वीयधर्मसंस्कृतिपरम्पराम् प्रति घृणामनादरभावमुपेक्षाभाववँ वोत्पादयितुम् पाश्चात्त्यजनेभ्यो नैपालशासकेनाऽनुमतिर् दत्ता, नेपालदेशस्स्य स्वायत्तताशक्तेर् निधानत्त्वेन शासनशक्तेस् स्रोतस्त्वेनाऽऽत्मानङ् घोषयिष्यञ् जनोऽपि निस्सङ्कोचङ् ख्रिस्तधर्मप्रचारकविद्यालये शिक्षाङ् ग्रहीतुम् प्रवेष्टुलँ लग्नः, तदा तु परम्परागतसंस्कृतशिक्षायाञ् जनानामादरोऽपि शिथिलताम् प्राप्तुलँ लग्नः । २०११तमे वैक्रमेऽब्दे पाश्चात्त्यानाम् प्रभावान् नेपालसम्प्रशासनेन २०११तमाद् वैक्रमाब्दात् पूर्वन् नेपालदेशे सर्वन् देशमभिव्याप्य स्थितान् २३३ सङ्ख्याकान् संस्कृतविद्यालयान् रूपान्तरम् प्रापय्य तेषु परम्परागतरूपेण प्रचलितन् दुर्गाकवच-चण्डी–रुद्री-श्राद्धपद्धत्त्यादिकर्मकाण्डशीघ्रबोध-मुहूर्तमार्तण्ड-भास्स्वत्त्यादि-ज्योतिषग्रन्थ-चाणक्यनीतिदर्पणहितोपदेशपञ्चतन्त्रादि–नीतिशास्त्रग्रन्थाऽमरकोष-लघुकौमुदी–रघुवंशादिपाठनन् निषिद्ध्य नेपालदेशे संस्कृतशिक्षाया मूलम् प्रायेणोन्मूलितम् । तच् च राज्ञा त्रिभुवनेन महेन्द्रेण चाऽनुमोदितम् । संस्कृतोच्चशिक्षाया अपि रूपान्तरणन् तदानीन्तनैः पाश्चात्त्यानुग्रहापेक्षिभिरीहितम्, किन्तु तदा संस्कृतशिक्षोच्चपरीक्षाणावँ वाराणसेय–राजकीय–संस्कृतमहाविद्यालयेन सम्बद्धत्त्वादन्यैश् च कारणैस् तदा तैस् तथा कर्तुन् न पारितम् । किन्तु यदा २०२८ तमे वैक्रमेऽब्दे राष्ट्रियत्त्वेन रूपिता अराष्ट्रिया नव्या शिक्षापद्धतिर् नेपालसम्प्रशासनेन वृद्धानावँ विदुषां सम्मतौ असत्त्यामपि प्रचालिता, द्वारेद्वारे आङ्लविद्यालयान् स्थापयित्वा संस्कृतविद्यालया उन्मूलिताः, संस्कृतविद्यालयानां सम्पत्तयो ऽन्यतो ऽपवाहिताः, षष्ठ्यां सप्तम्याङ् कक्षायाञ् च प्रचलतो विशिष्टसंस्कृतशिक्षणस्स्य निरोधेन संस्कृतशिक्षणसंस्थासङ्ख्याया न्यूनीकरणेन साधारणमाद्ध्यमिकविद्यालयस्स्य षष्ठसप्तमकक्षयोरुपेक्षणीयतया निर्धारितस्स्य संस्कृतविषयस्स्याऽपि विद्यालयेषु पठनपाठनयोर् दृढायास् समीचीनायाश् च व्यवस्थाया अकरणेन अष्टम-नवम-दशमकक्षाणाम् पाट्ठ्यक्रमाद् अनिवार्यसंस्कृतपत्त्रस्स्य निरसनेन च ग्रामीणानाञ् जनानाङ् कृते संस्कृतशिक्षा सर्वथा दूरस्स्था दुर्लभा अपरिचिता च कृता, कूटप्रयोगपूर्णतया संस्कृतमाद्ध्यमिकशिक्षापाट्ठ्यक्रमन्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्माय तत्र जनानाम् प्रवृत्तौ अर्गला आहिता, जनाभिरुचौ तुषारापातश् च कृतः, वाराणसेय-संस्कृत – विश्वविद् द्यालय-पाट्ठ्यक्क्रम–निरपेक्षतया स्ववैशिष्ट्यरक्षाऽनुपयोगितया संस्कृत–शिक्षा–संरक्षणमिषेण संस्कृतशिक्षा–वैशिष्ट्यविनाशनाय स्वधर्मनिष्ठा–दूरदर्शितोत्साहशून्याऽऽशापाशबद्ध–प्रमाण-पत्रमात्रधारकजनद्द्वारा कूटप्प्रयोगपूर्णतया संस्कृतोच्चशिक्षापाट्ठ्यक्रम–योजना निर्मापिता, आचार्यकक्षा–पर्यन्तम् प्रचलिता आयुर्वेद–शिक्षा मद्ध्यम-कक्षा–पर्यन्ता कृता, संस्कृत–शिक्षा–प्रेमि–निकाये 'चण्डाल–चतुष्कम्' इति परिचितानाम् पुरुषाणान् तेषाम् परिचराणामेव च संस्कृत-शिक्षा-सञ्चालने नेतृत्त्वस्स्य स्स्थाने स्थापनस्स्य परम्परा च स्स्थापिता, संस्कृतशिक्षा-संरक्षणाय राष्ट्रेण क्रियमाणस्स्य अर्थविनियोगस्स्य वर्गविशेषनेतृत्त्वस्वार्थ-संरक्षणदृष्ट्यैव परिचालनस्स्योपक्क्रमश् च कृतः, तदा तु पूर्वमेव कर्षितमूलस् संस्कृतशिक्षावृक्षो राज्ञो वीरेन्द्रस्स्य शासनस्स्य काले पुनरप्प्युत्खेदितजटस् सर्वथा शुष्कतान् निर्जीवताञ् च प्प्रापितः।विद्यालयादिसङ्ख्या विद्यार्थिसङ्ख्या च काऽपिदृश्श्यमानाऽपि स्वविद्याधर्मनिष्ठादृष्ट्याऽकिञ्चित्करी एव प्प्रतीयते ।

२०२६तमे वैक्रमेऽब्दे समुद्भूता, नव्व्यशिक्षापद्धत्त्या निगीर्णा नेपालदेशे संस्कृत–विश्वविद्यालयस्स्थापनस्स्य चर्चा २०३९तमे वैक्रमेऽब्दे कूटप्प्रयोग-पूर्णतया पुनरुद्भूता। तथा च राजकीयशिक्षाऽऽयोगेन नेपालदेशे संस्कृतविश्व-विद्यालयस्स्य स्स्थापनं संस्कृतशिक्षाया विकासाय विस्ताराय सुदृढीकरणाय च न, घुष्ट–हिन्दुराज्ज्य–नेपालदेशस्स्य वितंसरूपेण पाश्चात्त्यानुसन्धानाऽभिविनयनिकायानुकृत्त्यात्मकतया वर्तुम् मार्गो निर्मितः । तथापि २०४१तमे वैक्रमेऽब्दे संस्कृत–विश्व–विद्यालयस्स्य शिक्षण–प्प्रशासनाऽर्थव्व्यवस्थानाव् विषये विस्तृतायँ योजनाङ कर्तुं संस्कृतज्ज्ञानां समितिर् नेपालसम्प्रशासनेन निर्मिता, तया समित्त्या तु राजकीयशिक्षाऽऽयोगस्स्य धारणामस्स्वीकृत्त्य नेपालदेशे संस्कृतशिक्षाया विकासवँ विस्तारं सुदृढीकरणञ् च कर्तुं संस्कृतविश्वविद्यालयस्स्य शिक्षणप्प्रशासनार्थव्यवस्थानायँ योजना प्रस्तुता । किन्तु सा योजना नेपालप्रशासनेनाऽवकरकरण्डिकायान् निक्षिप्ता ।

२०४३ तमे वैक्रमेऽब्दे नेपाल–सम्प्रशासनेन संस्कृतविश्वविद्यालयस् स्थापितत्त्वेन घुष्टः । अयवँ विश्वविद्यालयो राजकीयशिक्षाऽऽयोगानुसारी नाममात्त्रेण च विश्वविद्यालयः, एतस्स्य शैक्षिककार्यक्रमस् सर्वथा निष्प्राणो नेपालदेशे संस्कृतशिक्षाया विकासविस्तारसुदृढीकरणानाङ कृते अकिञ्चित्करश् च दृश्श्यते ।

संस्कृतशिक्षाया इदानीन् नेपालदेशे प्रचलितः पाट्ठ्यक्क्रम आङ्गलभाषायाः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिवार्यत्वाद् विशेषतो धर्मबुद्ध्या संस्कृतशिक्षाङ् ग्रहीतुमिच्छुकान् संस्कृतविद्यालयान् सञ्चालयितुमिच्छुकांश् च बाधमानो वर्तते; हितोपदेशशैलीक-नीतिशास्त्रादीनावँ विषयाणामसमाविष्टत्त्वाद् गुरुतरशास्त्रीयभारयुक्तत्त्वाच् च साधारणानाञ् जनानां सर्वासाञ् जातीनाञ् छात्त्राणाम् महिलानाञ् च प्रवृत्तये प्रतिकूलो वर्तते; वार्ता त्रयी दण्डनीतिः आन्वीक्षिकी इत्त्येतासां सर्वासावँ विद्यानान् न्यूनतमेन प्रातिनिद्ध्येनापि रहितत्त्वाच् च सैद्धान्तिकरूपेणाऽतीव विकलोऽपि वर्तते ।

इदानीन् नेपालदेशे आसन्नचत्त्वारिंशास् संस्कृतमाद्ध्यमिकविद्यालया वर्तन्ते; येषु अष्टम-नवम-दशमकक्षासु (१) नैपालीयभाषा- (२) गणिता- (३) ऽऽङ्गलभाषा-(४) व्यावसायिकविषय-(५) स्वैच्छिकविषयाणामेकैकम् पत्त्रम्, (६) संस्कृतभाषाया एकम् पत्त्रम्, (७) वेद-व्याकरण-ज्योतिष-न्याय-साहित्त्यानामेकतमस्स्य विषयस्स्यैकम् पत्त्रञ् चेति सप्त पत्त्राणि पाठ्ठ्यन्ते । शिक्षा निश्शुल्काऽस्ति । नेपालदेशे इदानीं सप्त महाविद्यालयास् सन्ति; येषु कुत्त्र चिद् उत्तरमद्ध्यमान्तम्, कुत्त्र चिच् शास्त्र्यन्तम्, कुत्त्र चिदाचार्यान्तम्, कुत्त्र चिद् विद्यावारिद्ध्यन्तम् पाठ्ठ्यते ।

किन्तु तेषावँ विद्यालयानाम् महाविद्यालयानाञ् च शैक्षिककार्यक्रमस्स्य निष्प्राणत्त्वात् ते सर्वेऽपि वितंसमात्त्रतयैव सञ्चालिताः प्रतीयन्ते ।

संस्कृतशिक्षाया एतादृश्याः स्थितेः परिणामश् च समाजेऽधुना दृश्श्यमानो वर्तते यदिदानीन् नेपालदेशे पठितवत्सु जनेषु स्वधर्मे स्वदेशे च स्थित्त्वा स्वजन्मभूमिम् पुण्ण्यभूमिङ् कर्मभूमिञ् च स्स्वीकृत्त्य सुकर्माणि संसेव्य पाश्चात्त्यांस् तद्भृत्त्यांश् चाऽनपाश्रित्त्याऽपि मानवोचितञ् जीवनञ् जीवितुम् अस्माभिरस्मत्सन्ततिभिश् च शक्क्यते इति विश्श्वासेन युतो जनस् सुदुर्लभो जायमानोऽस्ति । इतोऽधिकवँ वैदिकार्य-भारतवर्षीय राष्ट्रियताविनाशस्स्य वास्तविकनैपालीयराष्ट्रियताविनाशस्स्य च किम् मूलम् भवितुं शक्नुयात् ।

४. नेपालदेशे वर्तमानायाः संस्कृतशिक्षायाः शोचनीयावस्थाया निराकरणस्स्य मार्गः

अस्माकवँ विचारे नेपालदेशे संस्कृतशिक्षाया विकासाय विस्ताराय सुदृढीकरणाय चाऽधोलिखिता व्यवस्था कार्या—

१. इदानीन् नेपालदेशे प्रचलन् संस्कृतशिक्षायाः पाठ्ठ्यक्क्रम आर्थिकदृष्ट्या विपन्नानामेव, उद्बुद्धस्स्य समर्थस्स्य स्नेहवतश् चाऽभिभावकस्स्य मार्गदर्शनमप्राप्नुवताम्, प्रायेण संस्कृतशिक्षाम् प्रति हार्दश्रद्धया रहितानामेव च शिक्षार्थिनाम् प्रवृत्तेर् विषयताम् प्राप्तोऽस्ति । तत्त्र प्रवर्तमानशिक्षार्थिहृद्गतोद्देश्श्यदृष्ट्या विचारणे एष पाठ्ठ्यक्क्रमः 'काशीगमनङ् कुतिमार्गेण' इति नैपालीयाऽऽ-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भाणकस्स्य चरितार्थत्त्वङ कुर्वन्नस्ति। एतन् दोषम् परिहर्तुं स पाट्ठ्यक्क्रमः खलु प्रमुखतया (क) धार्मिकोद्देश्यप्रधानैः, (ख) वेदवेदाङ्गादिशास्त्राणाङ गभीर-मद्ध्ययनङ कर्तुमुत्सुकैः, (ग) ज्योतिषायुर्वेदादिप्राच्च्यविज्ज्ञानानावँ विशिष्ट-मद्ध्ययनङ कर्तुमिच्छद्भिः, (घ) शास्त्रीयतया गुरुकम् भारवँ विनैव स्वधर्म-संस्कृतिवाङमयपरम्पराणां साधारणञ् ज्ञानङ कृत्वा व्यवहारोपयोगिनीं सामान्यां संस्कृतशिक्षामूलां शिक्षाङ ग्रहीतुवँ वाञ्छद्भिस् साधारणैर् जनैर् महिलाभिश् च स्वस्स्वानुकूला विषया यथा चेतुं शक्क्यास् स्युस् तथा निर्धारणीयः। वर्त-मानस् संस्कृतशिक्षापाट्ठ्यक्क्रम उक्तेषु चतुर्विधेषु जनेषु मद्ध्ये एकविधस्स्याऽपि जनस्स्य आकाङ्क्षायास् साधुतयाऽनुकूलो नाऽस्ति । एतन् दोषन् निराकृत्त्य संस्कृतशिक्षायाः पाट्ठ्यक्क्रमं समुचितङ कर्तुम् [अ] धार्मिकोद्देश्यप्रधानतया संस्कृतशिक्षाङ ग्रहीतुं संस्कृतविद्द्यालयं सञ्चालयितुञ् च वाञ्छताम् बाधि-काया आङ्लभाषाया अनिवार्यक्षेत्त्रादपसारणङ कर्तव्व्यम्; [आ] शास्त्रीयाणावँ वेदादिविषयाणां समकक्क्षतया हितोपदेशशैलीकं नीतिशास्त्रम् इति विषयश् च समावेशनीयः; [इ] अनिवार्यसंस्कृतव्याकरणे कौमुदीपद्धतेर् विकल्पे भट्टिकाव्व्य-पद्धतिः, संस्कृतभाषाशिक्षणाधुनिकपद्धतिश् च स्वीकार्या; [ई] व्यावसायिक-विषयेषु व्यावहारिकज्योतिषम्, सङ्गीतम्, गृहविज्ञानम्, आयुर्वेदीयस्वास्थ्य-कार्यकर्तृशिक्षणञ् च स्वीकार्यम् ; [उ] ऐच्छिकविषयेषु गणितम्, विज्ज्ञानम्, इतिहासः, भूगोलविद्या, समाजशास्त्रम्, नेवारभाषा, मैथिलभाषा, हिन्दभाषा, फ्रेञ्चभाषा, आङ्लभाषा, जर्मनभाषा, रुसभाषा, चीनभाषा चेत्त्यादयो विषया देयाः; [ऊ] शास्त्रीयमुक्ख्यविषयस्स्योत्तरमद्ध्यमायाम् प्रतिखण्डन् द्वे द्वे पत्त्रे, शास्त्रि-परीक्षायाञ् च प्रतिखण्डन् त्रीणित्रीणि पत्त्राणि निर्धारणीयानि; [ऋ] ऐच्छिका-ऽऽधुनिकविषयविकल्परूपेण शास्त्रीयसहायकविषयस्स्य द्वे द्वे पत्त्रे उत्तरमद्ध्यमायाम्, त्रीणित्रीणि पत्त्राणि शास्त्रिपरीक्षायान् निर्धारणीयानि; [ॠ] साधारणमाद्ध्यमिक-विद्द्यालयादिषु तत्तत्कक्क्षासु साधारणपत्त्रत्त्वेन निर्धारितमाङ्लभाषापत्त्रं षष्ठकक्क्षातः प्रभृति शास्त्रिकक्क्षायँ यावद् अतिरिक्तैच्छिकपत्त्ररूपेण निर्धारणीयम्।

२. नैपालीयहिन्दुराष्ट्रस्स्य राष्ट्रियचरित्त्रस्स्य संरक्षणाय परिपोषणाय च यावत्कालपर्यन्तम् माद्ध्यमिकविद्द्यालयेषु प्रतिशतन् दश संस्कृतमाद्ध्यमिक-विद्द्यालयाः, माद्ध्यमिकपरीक्क्षार्थिषु च प्रतिशतन् दश संस्कृतमाद्ध्यमिकविद्-द्यालयच्छात्त्रा न भवन्ति तावत्कालपर्यन्तं संस्कृतशिक्षा सर्वथा निश्शुल्का यथोचिति सवृत्तिका च कार्या ।

३. संस्कृतशिक्षणसंस्थानाम् पर्यावरणं संस्कृतशिक्षाया आदर्शस्स्य अनुरूपङ कर्तुं समुचितशैक्षिकनेतृत्त्वस्य विकासनम्; शिक्षकाणाङ कर्मचारिणाञ् चोक्ताऽऽदर्शानुरूपाऽऽचार-व्यवहार-वेषभूषा-विचार-वचनादीनामवलम्बनस्स्य व्यव-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थायाः करणम्; अधिकारिणामपि शिक्षककर्मचारिविद्यार्थिनः प्रति विद्या-धर्म-सत्य-न्याय-वीरता-पराक्रम-कौशल-परिश्रमादिष्वास्थावर्धयितुमनुकूलया रीत्या व्यवहरणस्य व्यवस्थाया विधानञ्च कर्तव्यम्। संस्कृतशिक्षाकेन्द्रेषु विद्याधर्मसाधनाकार्यं सम्यग् भवतु, संस्कृतशिक्षास्नातकद्वारा समाजे विद्यायाः प्रचारणेन धर्मस्य संस्थापनेन च राष्ट्रस्य आधिभौतिकी आधिदैविकी आध्यात्मिकी चोन्नतिर् भवतु इति हृदि निधाय सर्वैस् संस्कृतशिक्षा-सम्बद्धैर् व्यवहर्तव्यम्।

४. शास्त्रीयपाण्डित्यपरम्परारक्षायै आचार्यकक्षायान् तत्तद्-विषयेषु प्रविष्टानाँ विद्यार्थिनाम् मध्ये इच्छुकेभ्यो योग्येभ्यश्च कतिपये-भ्यो विद्यार्थिभ्यो विशिष्टस्य सौविध्यस्योपलम्भनम्, तैस् सफलतापूर्वकम् अध्ययने पूर्णे कृतेऽध्यापनादिक्षेत्रेऽन्यस्या आकर्षकवृत्तेः प्राप्तियँ यावत् तेभ्यस् सहायकप्राध्यापकवेतनतुल्याया अनुसन्धानविद्वद्वृत्तेः प्रदानम्, योग्यनिर्देशकस्य निर्देशकत्वे आवश्यकविषयेऽनुसन्धानकार्ये तेषान् नियोजनञ् च कार्यम्। एतादृश्यावँ व्यवस्थायाङ् कृतायामेव शास्त्रीयपाण्डित्यपरम्परायास् संरक्षणं सम्भवेत्। स्वपुत्रान् अन्यत्रैव प्रवर्तयताम्, अनाथा विपन्ना बाध्यता-वशेनैव संस्कृतशिक्षायाम् प्रवृत्ता जीविकोपार्जनचिन्ताग्रस्ताश् शिक्षार्थिनो वेदवेदाङ्गादिशास्त्रपाण्डित्यपरम्परासंरक्षणरूपमतिगहनङ् कार्यं सम्पादयेयुरिति बालिशस्यपूर्णवँ विचारन् धारयतावँ विद्यावैतंसिकानान् धर्मवैतंसिकानाञ् च दिवास्वप्नरूपेण विचारेण किमपि फलन् नैव सिद्ध्येत्।

५. संस्कृतविद्यालयादिसम्पत्तीनां संस्कृतशिक्षाविकासविस्तारसुदृढी-करणेष्वेवोपयोजनवँ विधेयम्।

६. व्यावहारिकाणावँ विषयाणामाधुनिकञ् ज्ञानन् तत्तद्विषयाणामस्मा-कम् प्राचीने ज्ञाने मेलयित्वाऽस्माकन् तानितानि प्राचीनानि ज्ञानानि परिष्कृ-तानि आधुनिकावश्यकतापूर्तिक्षमाणि च विधाय विकसितानि कृत्वा तेषा-मध्ययनाध्यापने सञ्चाल्य तत्तद्विषयाणां स्ववैशिष्ट्ययुतायाः परम्परायाः स्थापनस्योद्देश्येन कार्यङ् कृत्वा परदेशमूलकाऽऽयातीकृतशिक्षायाः क्षेत्रङ् क्रमेण न्यूनन् न्यूनतरन् न्यूनतमञ् च कर्तुवँ विशिष्टप्रकारकस्य स्वकीय-शिक्षाक्षेत्रस्य विस्तारङ् कर्तुञ् च राष्ट्रेण प्रयत्नः कर्तव्यः, तदनुकूलङ् गहनं शास्त्रीयमनुसन्धानकार्यञ् च सञ्चालयितव्यम्।

७. संस्कृतच्छात्रावासानां स्थापनम्, तेषां सुसञ्चालनम्, तेषु शास्त्रीय-स्याऽध्ययनस्य सदाचारस्य च समुचितवँ व्यवस्थापनञ् च कार्यम्।

८. पुस्तकालयानाङ् कृते सौविध्ययुतानाम् भवनानाम्, पर्याप्तानाम् पुस्तकानाम्, अनुसन्धानपत्रिकाणाम्, पुस्तकादीनां सुवर्गीकृतस्य व्यवस्थापनस्य,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शीघ्रतायुतायास् सुलभायास् सेवायाः, वाचनालयस्स्य, दैनिकसाप्ताहिकादिपत्रिकाणाञ् च व्यवस्थायाः करणे प्रयतितव्यम् ।

९. शोधग्रन्थानां शोधपत्रिकाणां समुचितसामयिकपाठ्यग्रन्थानाञ् च प्रकाशनस्स्य व्यवस्था कार्या ।

१०. साधारणमाध्यमिकविद्यालयादिष्वपि उच्चकक्षापर्यन्तयँ यथासम्भवं संस्कृतपत्रमनिवार्यङ् कर्तव्यम् ।

११. स्वमादर्शन् धर्मन् दर्शनं संस्कारमाचारवँ विचारवँ व्यवहारवँ वेषम्, स्वाम् भाषाम् भूषान् नीतिं संस्कृतिम्, स्वराष्ट्रं स्वगौरवं स्वाभिमानञ् च रक्षितुमिच्छद्भिस् तेषु विषयेषु रममाणैस् संस्कृतशिक्षाविकासविस्तारसुदृढीकरणकामैर् नैपालैर् जनैः परस्परं समागमाः, सलँलापाः, आवश्यका उपयोगिनोऽन्ये च कार्यक्रमा आयोजनीयाः ।

५. नेपालदेशे संस्कृतशिक्षायास् संरक्षणाय पण्डितानाम् प्रयासः

एतस्मिन् विषये २०११तमाद् वैक्रमाब्दात् प्रभृत्येव केचन वैदिकसंस्कृतिसंस्कृतास् संस्कृतानुरागिणस् स्वाभिप्रायम् प्रकटयन्तोऽभूवन् । २०२८तमाद् वैक्रमाब्दात् प्रभृति तु केचन विद्वांसो नेपालदेशे संस्कृतशिक्षाया वैशिष्ट्यस्स्य पृथगस्तित्वस्स्य च संरक्षणाय प्रक्रोशङ् कुर्वाणास् सन्ति । ते हि पश्चायत्तकालरात्रिसमयेऽपि नेपालसम्प्रशासनस्स्य कूटप्रयोगयुक्तस्स्य संस्कृतमाध्यमिकशिक्षा- पाठ्यक्रमनिर्माणकार्यक्रमस्स्य बहिष्करणेन, सभासूपस्थितेरवसरे प्राप्ते सभायामुपस्थितौ सभानिर्णये आत्मनोऽसम्मतौ असम्मतिटिप्पणीलेखनेऽधिकारस्स्य मार्गणेन[1], अपेक्षितविषयाणां सुदृढतयोपस्थापनेन, सभापारिश्रमिकनिरपेक्षतया व्यवहरणेन, अन्याय्यरूपेणाऽधिकृतेन व्यवहारे कृते सभायाः परित्यागेन, पाठ्यक्रमनिर्माणपारिश्रमिकपरित्यागेन, अधिकृतानाम् अन्याय्यस्स्याऽऽदेशस्स्य तिरस्कारेण, निरधिकारक-वितंसरूप-सदस्स्यधर्मस्स्याऽस्वीकारेण चेत्त्येववँ विधैः कार्यैः; गोष्ठ्यादीनामायोजनेन, बहूनावँ विदुषां हस्ताक्षरैस् सहितानाम् मार्गणपत्राणामधिकारिषूपस्थापनेन, दैनिकसाप्ताहिकादिपत्रिकासु एतद्विषयकाणालँ लेखानाम् प्रकाशनेन[2], संस्कृतविश्व-

---

१. ये खलु इदानीमात्मानलँ लोकतन्त्रवादिनमुद्घुष्य अग्रपङ्क्तौ स्थित्त्वा स्वार्थं साधयन्ति, तेऽपि वैतंसिकास् सखायस् तदैताद्‌गणस्स्याऽधिकारस्स्याऽन्वेषकन् नानाविधैश् छद्मपूर्णव्यवहारैरेकाकिनङ् कृत्त्वाऽऽत्मानङ् कृतार्थयन्ति स्मेति चाऽनुभूतोऽयवँ विषयः ।

२. गोर्खापत्रे (२०२५।१२।३०, २०२६।६।२१, ३०३९।२।२२, २०४२।५।३, २०४३।११।४,२०४३।११।२८),दैनिकसमाजे(२०४२।१२।२२,२०४३।३।३१) साप्ताहिकमञ्चे (२०४४।१।१, २०४४।१।२९, २०४४।४।२८, २०४४।५।४ २०४४।६।२८) गाण्डीवे (वाराणस्स्याम् ट१९ श२१, १९८३ फरवरि २२-२८) ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्यालयपाठ्यक्रमनिर्माणकार्यबहिष्कारेण च स्वाभिप्रायम् प्रकटयन्तस् सन्ति। सर्वस्स्य स्वकुटुम्बस्स्य संस्कृतशास्त्राद्ध्ययनादौ नियोजनेनाऽप्येके नेपालदेशे संस्कृतशिक्षापरम्परायास् संरक्षणे प्राणपणेनाऽपि सलँग्नास् सन्ति। तथापि कथमपि शासनाधिकारमारूढाः पाश्चात्त्यशिक्षापक्षपातिनः परान्नदूषितविचारा आकृत्या नैपाला विचारेण पाश्चात्त्यास् सदैव एतेषामभिप्रायाणान् तिरस्कारङ् कुर्वन्तः कूटप्रयोगपूर्ण- संस्कृतशिक्षापाठ्यक्रम- संस्कृतशिक्षण- संस्थावातावरणञ् च निर्माय नेपालदेशे संस्कृतशिक्षाया मूलस्स्योन्मूलने परेषाङ्कृते उपकरणीभूय प्रवर्तमानास् सन्तीति बहुभ्यो वर्षेभ्योऽनुभूयमानमस्ति। इदानीमप्येतस्मिन् विषये उल्लेखनीयम् परिवर्तनन् नाऽनुभूयते। इदानीन्तन- नैपाल- राष्ट्रिय- शिक्षाऽऽयोगेऽपि संस्कृतनिष्ठानावँ वास्तविकानां संस्कृतप्रेमिणाम् प्रातिनिद्ध्यन् नैव दृश्यते। संस्कृतविश्वविद्यालयोऽपि वर्तमानान् विभागानपि विभागान्तरे विलीनान् कुर्वन् आचार्यकक्षाद्ध्यापन- समय-सङ्कोचादिकञ् च कुर्वन् संस्कृतशिक्षायास् सङ्कोचनायैव प्रक्रमङ् कुर्वलँ लक्ष्यते।

एतस्स्याम् परिस्थितौ नेपालदेशे संस्कृतशिक्षा- विकास- विस्तार- सुदृढीकरणकार्याय कामपि चेष्टाङ् कर्तुम् प्रस्तूयमानः कतिपय- नैपाल- संस्कृतग्रन्थकार-परिचय-सङ्ग्रहस् संस्कृतशिक्षानुरागिणावँ वैदिकानामार्याणाम् अस्माकङ् कृते केनाऽपि रूपेणोपयोगी भवेदित्त्याशास्स्यते।

स्वाद्ध्यायशालाकुटुम्बेन वैदिक- समाजवादि- लोकतान्त्रिक- संस्कार- प्रवर्धनसभायास् सहकारितया २०४८।५।७-८ दिनयोः उपाकर्मपर्वणः पावने प्रसङ्गे वेद- स्मृति- पुराण- रामायण- महाभारतादि-संस्कृतवाङ्मयाऽनुशीलनाय नैपाल- समाजेऽभिरुचिञ् जागरिताङ् कर्तुम् एका 'नैपालानां संस्कृतज्ज्ञानाम् मुद्रितानां संस्कृतग्रन्थानाम् प्रदर्शनी' वाल्मीकिविद्यापीठभवने काष्ठमण्डपनगरस्थे समायोजिताऽभूत्। तस्स्याः प्रदर्शन्न्या आपूर्तिमन्त्रिणा श्रीचिरञ्जीविवाग्ले- महोदयेनोद्घाटनङ् कृतमासीत्। तत्र १३४ संस्कृतग्रन्थाः प्रदर्शिता अभूवन्। तत्प्रदर्शनीप्रसङ्गेनाऽस्माभिरस्स्य कतिपयनैपालसंस्कृतग्रन्थकारपरिचयग्रन्थस्स्य रचना कृता। अत्र यथाशक्ति यथोपलब्धि नैपालानां संस्कृतग्रन्थकाराणां सङ्क्षिप्तः परिचय उपस्थापितो वर्तते। अत्र साधारणस्स्याऽद्ध्ययनस्स्य फलम् प्रस्तुतवँ वर्तते, विशिष्टेनाऽद्ध्ययनेनास्स्य विषयस्स्य परिष्करणवँ विस्तृतीकरणञ्च यथावसरम् भविष्यति। उक्तायाः प्रदर्शन्न्या आयोजनाय एतस्स्य ग्रन्थस्स्य प्रकाशनाय च यैर् धनवद्भिर् मनोवद्भिश् च साहाय्यङ् कृतन् तेभ्य उदारेभ्यो महानुभावेभ्यस् साधुवादास् समर्प्यन्ते।

स्वाद्ध्यायशालायाम् **– स्वाद्ध्यायशालाकुटुम्बगृहस्थैः।**

२०४८।९।२१ इति मिते दिने।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपोद्घात

संस्कृतवाङ्मयको महत्त्व

नेपालमा संस्कृतवाङ्मयको संरक्षण–संवर्धनको प्रयास
संस्कृत शिक्षाको वर्तमान शोचनीय अवस्था
तथा
तेस अवस्थाको निराकरणको मार्ग

१. सम्पूर्ण मानवजातिका लागि संस्कृतवाङ्मयको महत्त्व

भूमण्डलको जुनसुकै पनि भागमा बस्ने सम्पूर्ण मानवजातिका लागि संस्कृतवाङ्मयको धेरै महत्त्व छ भन्ने कुरा सबैले बुजेकै छन्। प्राचीनकालमा संस्कृत-भाषाको प्रचारको क्षेत्र विशाल थियो भन्ने कुराको प्रमाणका लागि फ्रेञ्च, अङरेजि, रोमन, जर्मन, रुसि, ग्रिक आदि युरोपीय भाषाहरुमा र पारसि भाषामा समेत पाइने संस्कृत-शब्दमूलक शब्दभण्डारलाइ अगाडि सार्न सकिन्छ। नेपालि, हिन्दि, मैथिलि, गुजराति, मराठि, बङ्गालि आदि भारतवर्षभित्रका आधुनिक भाषाहरुको मूल संस्कृत भाषा नै हो भन्ने कुरा त कसैबाट पनि छिपेको छैन।

संस्कृतवाङमयमा विद्याका विविध विधा पाइन्छन्। वार्ताविद्याका कृषिशास्त्र, पशुशास्त्र, (अश्वशास्त्र, गजशास्त्र), वाणिज्यशास्त्र, स्थापत्य-शास्त्र, मूर्तिशास्त्र, यन्त्रशास्त्र, विमानशास्त्र, शल्यतन्त्र–शालाक्यतन्त्र–कौमार-भृत्यादि-अष्टाङ्गयुक्त आयुर्वेदशास्त्र इत्यादि शास्त्रहरु, कामशास्त्र, सङ्गीतशास्त्र, चित्रशास्त्र, काव्यशास्त्र, नाट्यशास्त्र इत्यादि ललितकलाशास्त्रहरु र अरु चौसट्ठि–कला–अन्तर्गत पर्ने कलाशास्त्रहरु; काव्य–नाट्य–कथा–आख्यायिका-लक्षणादिरूपका अनेकशास्त्रहरु; त्रयी विद्याका वेदहरु, वेदाङ्गहरु (१. शिक्षा २. कल्प ३. व्याकरण ४. निरुक्त ५. छन्द ६. ज्योतिष), स्मृतिसंहिताहरु, पुराणहरु, उपपुराणहरु, इतिहास, वेदाऽविरोधि वैष्णव–शैव–शाक्त–सौर–गाण-पत्य–कौमारादि–तन्त्रहरु समेत अनेक शास्त्रहरु, दण्डनीति- विद्याका नीतिशास्त्र, प्रशासनशास्त्र (अध्यक्षप्रचार), न्यायशास्त्र (धर्मस्थीय), युद्धशास्त्र, आयुध-शास्त्र, खरपट्ट (चौर्यशास्त्र) इत्यादि शास्त्रहरु, आन्वीक्षिकीविद्याका तर्कशास्त्र, पदार्थशास्त्र, साङ्ख्यशास्त्र, योगशास्त्र इत्यादि लोकायतविचारका समेत शास्त्रहरु संस्कृतवाङमयमा छन्। अनेक विद्याहरुले र सिद्धान्तहरुले अनुप्राणित

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्य–नाट्य–कथा–ऽऽख्यायिकादिरूप ललितकलाप्रधान अनेक ग्रन्थहरु संस्कृत-वाङमयमा पाइन्छन्। संस्कृतवाङमयमा जस्तो प्राचीनता र अविच्छिन्नता अन्यत्र पाउन सकिन्न। मानवसभ्यताका विभिन्न पक्षहरुको इतिहासको र उपलब्धिको अनुसन्धान गर्न चाहनेहरुका लागि संस्कृतवाङमय अक्षय भण्डार छ भन्ने तथ्य सबैले स्वीकारेकै छन्।

एसप्रकार मानवहरुका लागि सार्वजनिकनिधिका रूपमा रहेको संस्कृत-वाङमय कोलाहलपूर्ण आधुनिक समाजमा नैतिकता–मानवता-र–विश्वबन्धुताको प्रसारका लागि पनि महत्त्वपूर्ण हुनसक्छ भन्ने कुरा संस्कृतवाङमयको उपनिषद्-गीतादि–ग्रन्थहरुको अलिकति पनि परिचय पाएका मान्छेहरुबाट छिपेको छैन। रोगनिवारणका लागि, मानसिकसन्तुलन–स्थापनका लागि, मानसिकबल प्राप्त गर्नका लागि र शान्तिका लागि समेत योगशास्त्र प्रक्रियाहरुको महत्त्व बहुचर्चित छँदैछ। उपनिषद्हरुको अद्ध्ययनबाट सोपन् हावर्, बर्ट्रण्ड् रसल्, टोमस् ष्टर्न्ज् एलिअट् इत्यादि चर्चित पाश्चात्त्य दार्शनिक-ग्रन्थकारहरु र कवि-हरु पनि गम्भीर रुपले प्रभावित भएको कुरा विज्ज्ञहरुले जानेकै छन्। मानव-जीवनको रहस्यको खोजिका लागि संस्कृतवाङमयको सर्वोपकारकता पनि विचारशीलहरुले मानेकै कुरा हो।

तेति मत्रै हैन, भौतिकविज्ञानको अनुसन्धानका लागि प्रेरक अनेक वस्तुहरु पनि संस्कृतवाङमयमा पाइन्चन्। जगदीशचन्द्र वसु, चन्द्रशेखर बेङ्कट-रमण आदि सुविख्यात भारतवर्षीय वैज्ज्ञानिकहरुले संस्कृतवाङमयले वा तेसको एक शब्दले दिएको प्रेरणाले प्रयोगहरु गरेर नएँ वैज्ज्ञानिक ज्ञान पाएका हुन् भन्ने कुरा उनिहरुको जीवन – चरित्रका अभिज्ज्ञहरु भन्दछन्। कम्प्युटर्का लागि पनि सर्वाधिक उपयुक्त भाषा संस्कृत नै हुन सक्च भन्ने विचार पनि चर्चामा आइसकेको छ। एसबाट संस्कृतभाषाको स्वरूपै पनि व्यवस्थित र वैज्ज्ञानिक छ भन्ने बुजिन्च।

वैदिक आर्यहरुका लागि र सबै भारतवर्षनिवासिहरुका लागि संस्कृतवाङ्मयको विशिष्ट महत्त्व

'हिन्दुधर्म' वैदिक सनातनवर्णाश्रमधर्मको नैं आधुनिक लौकिक व्याव-हारिक नाम हो। ऋग्वेदप्रतिपादित–सिन्धुसभ्यताका पालक वैदिक आर्यहरु नै लोकमा हिन्दु भनिन्छन्। अत: हिन्दुहरुका लागि वेदवेदाङ्गस्मृति–पुराणादिसंकृत-वाङमयको महत्त्व वर्णनातीत छ। हिन्दुहरुसित वेदवेदाङ्गादि संस्कृतवाङमयको सम्बन्ध सर्वथा विच्छिन्न गरियो भने हिन्दुहरुको हिन्दुत्व नै नष्ट हुन्छ। हिन्दुहरुको जन्मदेखि मरणसम्मका सबै धार्मिकक्रियाकलाप वेदवेदाङ्गादि संस्कृतवाङमयकै आधारमा संस्कृतभाषाकै प्रयोग गरेर गरिन्चन्। हिन्दुराष्ट्र-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यताको स्रोत वेदबाट नै बहन्छ । हिन्दुनैतिकता संस्कृतवाङ्मयबाटै थाहा हुन्छ। हिन्दुजीवनपद्धति वेदवेदाङ्गहरुबाटै निर्दिष्ट छ । हिन्दुहरुको विशिष्ट शिक्षापद्धतिको परम्परालाइ स्थिर राखि हिन्दुराष्ट्रियतालाइ बलियो बनाउन र हिन्दुहरुको गौरव बडाउनका लागि पनि संस्कृतविद्यापरम्पराको विशिष्ट भूमिका हुन्छ । तेस कारण हिन्दुहरुका लागि संस्कृतवाङ्मयको विशिष्ट महत्त्व स्पष्ट रूपमा देखिन्छ । हिन्दुहरुको मूल थलो भारतवर्षका प्रदेशहरुमा हिन्दुप्राय जनसमुदायहरुमा वर्तमान अहिन्दुहरुका लागि पनि हिन्दुहरुका बिचमा समन्न्वयपूर्ण र शान्तिपूर्ण जीवनयात्त्रा सञ्चालनगर्नका निमित्त आवश्श्यक उपयोगि ज्ञान दिने वाङ्मयका दृष्टिले पनि संस्कृतवाङ्मयको महत्त्व प्रचुर मात्त्रामा छ ।

नेपालिहरुका लागि संस्कृतवाङ्मयको विशेष महत्त्व

भूमण्डलमा नेपाल एकमात्त्र हिन्दुराज्ज्य भनिन्छ । अतः याँहाँका बासिन्दाका लागि संस्कृतवाङ्मयको महत्त्व धेरै छ । नेपालिहरुको राष्ट्रिय एकताको एक प्रबल सूत्रको रूपमा रहेको नेपालि भाषा संस्कृतमूलक भाषा हो । अतः नेपालि भाषामा अभिव्यक्तिक्षमता र सौन्दर्य बडाउनका लागि समेत पदेपदे संस्कृतभाषाका शब्दहरु प्रयोगगरिन्छन् । नेपाल देशको धर्म–संस्कृति–प्रशासन- र- कलासित सम्बद्ध इतिहासादिको महत्त्वपूर्ण अंश संस्कृतवाङ्मयमा सुरक्षित छ । नेपालिजनतामद्ध्ये धेरैजसोमा धर्मभावनाको, सांस्कृतिक जागरणको नैतिकताको, कलात्मक अनुभूति समेतको सम्पादनमा र चरित्त्रबल बडाउनमा पनि संस्कृतवाङ्मयको भूमिका ठुलो छ । नेपालमा भौतिक विकासको मूल आधारका रूपमा रहन सक्ने वास्तविक हिन्दु राष्ट्रनीतिको विकासका लागि संस्कृतवाङ्मयको नितान्त आवश्यकता छ । दैनन्दिनजीवनयात्त्राका लागि पनि बहुसङ्ख्यक नेपालिहरु संस्कृतवाङ्मयमा रहेको ज्ञानको अपेक्षा राख्दछन् । हामि हिन्दुहरुको मुक्ख्य परम्पराको राम्म्रो परिचय प्रदान गर्न समर्थ वेद- स्मृति–पुराणहरुको व्याक्ख्या गर्ने विद्द्वान्हरुको; धार्मिककृत्त्यव्यवस्थापनमा सहयोगि हुने धर्ममीमांसकहरुको, धार्मिककृत्यापेक्षितकालनिर्णयसहयोगि ज्योतिषिहरुको; वेदस्मृति- पुराणादि–प्रतिपादित–धार्मिककृत्त्य–पद्धतिहरुका ज्ञाता र प्रयोक्ता पण्डितहरुको; वैदिक–दर्शनको व्याक्ख्या गर्ने विद्द्वान्हरुको; वैदिक दर्शनको तर्कले संरक्षण र पोषण गर्न सक्ने तार्किकहरुको; आयुर्वेद जान्ने कुशल चिकित्सकहरुको; सङ्ग्रहालयादिमा रहेका शिल्पकला-स्थापत्त्यकला–आयुर्वेदविज्ञानादिविषयहरुको र अरु अनेक महत्त्वपूर्णग्रन्थहरुको अनुसन्धान गरेर त्याँहाँ भएका नएँ व्यावहारिक र शास्त्रीय विषयहरुको प्रतिपादन–प्रकाशनमा समर्थ अद्ध्येताहरुको; उक्त सबै विद्द्याहरुको परम्पराको संरक्षणमा समर्थ विशिष्ट शिक्षकहरुको,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा औपनिवेशिक विदेशि विधर्मि शासकका कार्यकर्ता जस्ता वैदिकधर्मसंस्कृति-परम्पराऽऽचारविचारशून्य संस्कृतवाङ्मयपरिचयरहित कथित समाजसेवक कथित राष्ट्रसेवकहरुका स्थानमा साधारण शिक्षा पाएका मान्छेले गर्न सक्ने समाज-सेवाका र राष्ट्रसेवाका विविध कार्य गर्न समर्थ, आँफ्नो धर्मसँस्कृतिपरम्परा-आचारविचारहरुमा आदर गर्ने, संस्कृतवाङ्मयपरिचययुक्त, संस्कृतमूलक-साधा-रण-शिक्षा पाएका समाजसेवकहरुको, राष्ट्रसेवकहरुको र राष्ट्रनीतिसम्बद्ध काम गर्ने राष्ट्रनेताहरुको पनि भूमण्डलको अद्‌द्वितीय हिन्दुराष्ट्र भनिने नेपाल-राष्ट्रमा परमावश्यकता छ। एसबाट नेपालिहरुका लागि संस्कृतवाङ्मयको अत्यन्तै महत्त्व र आवश्यकता छ भन्ने कुरा स्पष्ट हुन्छ।

ऐले नेपालि राष्ट्रियताका विषयमा विचार गर्दा अधोनिर्दिष्ट तत्थ्य देखा पर्दछ। नेपालि राष्ट्रका लागि आवश्यक तत्त्वहरुमद्ध्ये वर्तमान नेपालको निश्चित भूभाग, कामचलाउ रूपमा रएको साजा नेपालि भासा; नेपालदेशमा बसोबास गर्ने बाउन, छेत्रि, नेवार, मगर, गुरुम्, राइ, लिम्बु, सेर्पा, तमाङ, थकालि, भोटे, सार्कि, कामि, दमै, गाइने, माझि, दनुवार, सुनुवार, दरै,कुमाल, कायस्थ, कुर्मि, केवट, धानुक, थारु, कोचे, मेचे, सतार, धिमाल, धाङड, दुसाद डोम, मुसलमान, क्रिस्तान इत्यादि विभिन्न जातजाति-भाषाभाषि-धर्मानुयायि-हरुको परस्परमा परिचय, हेलमेल, परम्परागत विशिष्ट प्रकारको सहअस्तित्व र मिलिजुलि एउटा राष्ट्रका रूपमा रहि व्यक्तिगत,सामाजिक र राष्ट्रिय रूपमा जीवन-यात्रा चलाउने इच्छा नै प्रमुख पुँजिका रूपमा रएका देखिन्छन्। इनै पुँजिको बुद्धिमत्तापूर्वक परिचालन गरि नेपालि राष्ट्रलाइ भारतवर्षीय उपमहाद्वीपमा स्वतन्त्र, सुसमन्वित, सुविकसित, समृद्ध, शान्तिपूर्ण र सुखि रूपमा उब्भ्याउन र अनन्त कालपर्यन्त जीवन्त राख्न विचारपूर्वक काम गर्न पर्ने देखिन्छ। एस्तो नेपालि राष्ट्रियताका दृष्टिले पनि नेपालमा संस्कृतशिक्षाको विकास विस्तार र सुदृढीकरण उचित, आवश्यक र लाभदायक देखिन्छ।

२.नेपालमा सस्कृत-वाङ्मय-संरक्षण-संवर्धन-प्रयास

भूमण्डलको जम्बूद्वीपान्तर्गत भारतवर्षमा हिमालयका मद्ध्यभागका दक्षिणपार्श्वमा नेपाल देश रहेको छ। यो देश अनादिकालदेखि नै वैदिक आर्य-हरुको पुण्यभूमिका रूपमा रहेको कुरा वेदमा, स्मृतिपुराणहरुमा, रामायण-महाभा-रतमा र रघुवंश-कुमारसम्भवादिकाव्यमा समेत पर्वतराज हिमालयको महिमा गाइएकाले ज्ञात हुन्छ। शान्तिप्रिय ऋषिहरु जनसम्मर्द नभएका तथा कोलाहल-शून्य हिमालयका प्रत्यन्तपर्वतका उपत्यका-अधित्यकाहरुमा आश्रम-संस्थापन गरेर विद्याको साधना गर्दथे। देउघाटप्रदेशादिस्थानमा वसिष्ठादि ऋषिका आश्रम

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रएका थिए भन्ने कुरा ऐतिह्यविद्हरु भन्दछन् ।

भारतवर्षमा यवन–शक–हुण–मुसलमान–मुगलहरुका आक्रमण भएपछि त वेद–स्मृति–पुराणादि–विद्याको र वर्णाश्रमधर्मको अनुपालन विशेष रूपमा नेपालमा नै भएको कुरा पनि इतिहासज्ज्ञहरुबाट छिपेको छैन ।

रामायणको र महाभारतको पनि प्राचीनतम हस्तलिखित पुस्तक नेपालमा नै सुरक्षित रएको पाइन्छ । शाक्ततन्त्रका र बौद्धतन्त्रका पनि धेरै ग्रन्थहरुका प्राचीनतम हस्तलिखित पुस्तकहरु नेपालका पुस्तकालयमा नै सुरक्षित रएका देखिन्चन् । अश्श्वघोषको सौन्दरनन्द, सागरनन्दिको नाटकलक्षणरत्नकोष, शुभङ्करको हस्तमुक्तावली इत्त्यादि अनेक ग्रन्थ अन्न्यत्त्र लुप्त भएका र नेपालमा नै प्राप्त गरि प्रकाशकहरुले प्रकाशित गरेको कुरा पनि विद्वान्हरुलाइ अवगत भएकै विषय हो । अन्न्यत्त्र दुर्लभ भएपनि निष्पन्नयोगावली आदि ग्रन्थका हस्तलिखित पुस्तकहरु नेपालका पुस्तकालयहरुमा सुलभ भएका कुराहरुबाट समेत प्रभावित भै हरप्रसाद शास्त्रिका सुपुत्र विनयतोष भट्टाचार्यले 'नेपाल अद्ध्येताहरुका लागि स्वर्ग हो' भनेर भनेको कुरा पनि नेपालविद्याविद्हरुले सुनेकै छन् ।

नेपालमा लिच्छवि–सम्प्रशासनकालमा संस्कृतभाषानिबद्ध विद्याको प्रचार र स्वधर्मरक्षाको प्रयास पनि प्रशंसनीय थियो भन्ने कुरा तेस समयका प्रथममानदेव–अनुपरमगुप्त–द्वितीयजयदेव–बुद्धकीर्ति–प्रभृतिका प्रौढ र प्राञ्जल शिलालेखहरुबाट स्पष्ट बुजिन्छ ।

कर्णाली–प्रदेशमा र गण्डकी–प्रदेशमा पनि संस्कृतभाषानिबद्ध विद्याको र स्वधर्मरक्षाको प्रयास उल्लेखनीय रूपमा हुँदै आएको कुरा पनि सुवर्णपत्त्र–ताम्म्रपत्त्र–शिलापट्ट–आदिमा उट्टङ्कित शासन–लेखहरुबाट बुजिन्च । मल्लहरुका शासनक्षेत्त्रमा र समयमा पनि निगमाऽऽगमविद्याहरुको अनुशीलन-अनुपालन र संस्कृतग्रन्थप्प्रणयन–कार्य उल्लेखनीय रूपमा भएको देखिन्छ ।

आजसम्म पनि नेपालमा अविच्छिन्न रूपमा चल्दै रहेको संस्कृत–ग्रन्थप्प्रणयनको परम्पराले नेपालि जनताको संस्कृतभाषानिबद्ध विद्याहरुमा र संस्कृतभाषामा गैरो अनुराग रएको कुरालाइ स्पष्ट गर्दछ ।

वैदिक–सनातन–वर्णाश्रमधर्मका अनुयायि हामिहरुका राष्ट्र–समाज–कुटुम्ब–व्यक्तिका प्रकृति–सम्बन्धि विचारका अजस्र स्रोतका रूपमा रहेको संस्कृतशिक्षा पनि अनादिकालदेखि नै नेपालमा घरघरमा धर्मका अङ्गका रूपमा पण्डित– ब्राह्म्मणहरुले स्वतन्त्ररूपमा र धनि–वलि–कुटुम्बिहरुले पनि पण्डित-ब्राह्म्मणहरुद्वारा चलाइँदैगरेको बुजिन्च । एस्तै प्रणालिद्वारा संस्कृतशिक्षा पाएका

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मानिसहरु उइलेइ ठुला विद्द्वान् र ग्रन्थकार समेत भएको देखिञ्च । अर्वाचीन कालमा नेपालमा उल्लेखनीय ठुलो राष्ट्रिय प्रयास केइ नभएको हुँदा विद्यामा धेरै प्रगति भएको त देखिन्थेन, तथापि संस्कृतभाषानिबद्ध विद्याद्वारा राष्ट्रिय-चरित्त्रको साधारणतया संरक्षण भने गरिइरएकै थियो । यमलपर्वत-मण्डलाऽधिपति वत्सराजले सोरौँ शताब्दीका प्रारम्भमा नएँ विद्याकेन्द्रहरुको स्थापना गरेका थिए भन्ने कुरा तथा कास्किका राजा सिद्धिनारायण साहले जगन्नाथ, मणिभद्द्र,कुलराज, हर्षदेव इत्त्यादि पण्डितहरुलाइ राखेर छात्त्रावास,पुस्तकालय इत्त्यादि सुविधाको व्यवस्था समेत गरेर भूमिदानद्वारा विद्यालय–सञ्चालन गरेका थिए भन्ने कुरा गोपीनाथशर्माको 'नेपालमा शिक्षाको इतिहास' भन्ने ग्रन्थबाट देखिञ्छ ।

३. ऐले नेपालमा संस्कृतशिक्षाको शोचनीय अवस्था

नेपालमा उपर्युक्त प्रकारको परम्परा रँआएकामा जङ्गबाहादुरले १९०८ संवत्मा (?) विद्यालयमा चलाइने अङ्ग्रेजि शिक्षाको बीजारोपण गरेपछि विस्तारै संस्कृतशिक्षा पनि विद्यालयमा चलाइने रूपमा परिणत भएच । सबैभन्दापैला एस्तो संस्कृतविद्यालय जङ्गबाहादुरका छोरा जनरलजितजङ्ले पण्डित विष्णुहरि रिमाललाइ नियुक्त गरेर काठमाण्डुको पशुपति–देवपत्तनमा राजराजेश्वरीघाटमा स्थापित गरेका थिए भन्ने कुरा सोमनाथ सिग्देलले 'नेपालमा शिक्षा' भन्ने ग्रन्थको नेपालि संस्करणमा भनेका छन् । अरुहरुले भने एस सम्बन्धमा आर्कै किसिमको कुरा देखाएका छन् । १९२५ वैक्रमाब्दमा नीलदेव पण्डित र वाचस्पति पण्डित नेपालको सम्प्रशासनले दिएको वेतन खाएर नेपालको सम्प्रशासनले नै दिएको वृत्ति खाने विद्यार्थिहरुलाइ पडाउँथे भन्ने कुरा प्रज्ञाको त्रिपन्नौँ अङ्कमा प्रकाशित शरच्चन्द्र भट्टराइको लेखबाट प्रकाशमा आएको छ । एस प्रकारसित विद्यालयहरुमा वेतनभोगि पण्डितहरुले संस्कृत –शिक्षा दिन थालेपछि तेसका प्रभावले घर–घरमा स्वतन्त्ररूपमा निर्वेतनरूपमा र निश्शुल्क–रूपमा सञ्चालित हुँदै गरेको संस्कृतशिक्षा शिथिल हुन थालेच ।

जब क्रिश्चियन–धर्म–प्रचारक– विद्यालयहरु सञ्चालित गरेर नेपालको शासनतन्त्रका र अर्थतन्त्रका प्रभावशालि व्यक्तिहरुका सन्तानलाइ भर्ना गरि पडाइ तिनका मस्तिष्कमा आँफ्नु सनातन–हिन्दु–धर्म–संस्कृति–परम्परा प्रति घृणा वा अनादर वा उपेक्षाभाव उत्पन्न गराउन पाश्चात्त्य (पश्चिमा) मानिसहरुलाइ नेपालका सम्प्रशासकहरुले अनुमति दिए, नेपालको सार्वभौमसत्ता–स्वायत्तताशक्ति का निधानका रूपमा र नेपालको संविधानको स्रोतका रूपमा उब्बिनेवाला व्यक्तिले पनि क्रिश्चियन मिसनरि–स्कुलबाट शिक्षा लिन थाले,तेस

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पछि त परम्परागत संस्कृतशिक्षामा जनताको आदरभाव पनि शिथिल हुन थालेको देखियो ।

२०११वैक्रमाब्दमा नेपालि हिन्दुजनताका ससाना धार्मिककेन्द्रका रूपमा रएका दुर्गाकवच-वेद-रुद्री-चण्डीहरु, अग्निस्स्थापना, श्राद्धपद्धति आदि कर्मकाण्ड, शीघ्रबोध-मुहूर्तमार्तण्ड-भास्वती-आदि ज्योतिषग्रन्थ, चाणक्यनीतिदर्पण-हितोपदेश-पञ्चतन्त्रादि नीतिशास्त्रग्रन्थ तथा अमरकोश-लघुकौमुदी-रघुवंशादिग्रन्थको पठन-पाठन हुने २३३ भाषापाठशालाहरु सातसमुद्रपारका सल्लाहकारका सल्लाहका र तिनका आशामुखिहरुले गरेका सिफारिसका भरमा रूपान्तरित गरेर तिनमा उपर्युक्त ग्रन्थहरुको पठनपाठन प्रतिबन्धित गरियो । तेसलाइ राजा त्रिभुवनले र महेन्द्रले अनुमोदनगरे । एसरि नेपालमा संस्कृतशिक्षाको फेदैमा प्रहार गर्न थालियो । संस्कृतका उच्चशिक्षाको पनि रूपान्तरण गर्न तेस वेलाका पाश्चात्यानुग्रहापेक्षिहरुले चाहेका थिए । तर तेस वेला संस्कृतको उच्चशिक्षा वाराणसेय-राजकीयसंस्कृत-महाविद्यालयसित सम्बद्ध भएकाले र अन्य कारणहरुले गर्दा तेस वेला तिनिहरुले तेसोगर्न सकेनन् ।

तर जब २०२८सालमा राष्ट्रिय भनिएको अराष्ट्रिय नएँ शिक्षायोजनालाइ वरिष्ठ विद्वान्हरुको असम्मति र विरोध हुँदाहुँदै पनि नेपालको सम्प्रशासनले लागुगर्‍यो; दैलादैलामा अङरेजि-शिक्षापद्धति-अन्तर्गतका विद्यालयहरु खोलेर संस्कृत शिक्षापद्धति-अन्तर्गतका विद्यालयहरुको उन्मूलन गर्‍यो; छैटो र सातौँ कक्षामा चलिरहेको बिशिष्ट–संस्कृत-शिक्षणमा रोक लगाएर, संस्कृत–शिक्षण-संस्थाहरुको सङ्ख्या घटाएर, संस्कृत-शिक्षण-संस्थाहरुको सम्पत्तिमा लुछाचुँडि गराएर, साधारण माध्यमिक विद्यालयका छैटो र सातौँ कक्षामा राखतैमा उपेक्षणीय रूपमा राखिएको संस्कृत विषयको पनि विद्यालयहरुमा पठनपाठनको दृढ र राम्रो व्यवस्था नगरेर, आठौँ – नवौँ-र-दशौँ कक्षाहरुमा रहेको अनिवार्य संस्कृतपत्र पाठ्यक्रमबाट हटाएर र इ सबै उपायहरुको प्रयोग गरेर ग्रामीण जनताका लागि संस्कृतशिक्षा टाढाको, दुर्लभ र अपरिचित वस्तु बनाइयो; षड्यन्त्रपूर्ण रूपमा संस्कृत - माध्यमिक - शिक्षाको पाठचक्रम बनाएर मानिसहरुको प्रवृत्तिमा आउलो हालियो र जन-अभिरुचिमा तुषारापात गरियो; वाराणसेय-संस्कृत-विश्वविद्यालयको पाठचक्रमसँग निरपेक्ष गराउनुका साथै आँफ्नु वैशिष्टयको रक्षाका लागि पनि अनुपयोगि हुने गरि संस्कृतको सरक्षण गर्ने छलले संस्कृत शिक्षाको वैशिष्टय नष्ट गर्नका लागि स्वधर्मनिष्ठा – दूरदर्शिताउत्साह–शून्य आशापाशबद्ध प्रमाणपत्रे मानिसहरुद्वारा षड्यन्त्रपूर्ण रूपमा संस्कृतको उच्चशिक्षाकोपाठचक्रमयोजना बनाइयो; आचार्यसम्मचलेको आयुर्वेद-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिक्षालाइ मद्ध्यमासम्म मात्त्र सीमित गरियो [1], संस्कृतशिक्षाप्रेमिहरुमा 'चण्डालचौकडि' भनेर प्रसिद्ध माञ्छे र तिनैका पिछलग्गुहरुलाइ मात्त्र संस्कृत-शिक्षाको सञ्चालनमा नेतृत्वका स्थानमा राख्ने परम्पराको स्थापना गरियो; संस्कृतशिक्षाको संरक्षणका लागि राष्ट्रले गरेको आर्थिक लगानिको पनि धनि-वलि-शोषक-सामन्तका र तिनका परिधिका व्यक्तिको नेतृत्व र स्वार्थ संरक्षणगर्ने दृष्टिले मात्त्र परिचालन हुने, संस्कृतशिक्षाको र संस्कृतवाङ्मयको श्रीवृद्धि गर्ने काममा उक्त लगानिको कुनै उल्लेख्य उपयोग हुन नपाउने स्थिति बनाइयो; तब त पैलेइ नै फेदमै प्रहारगरिएको संस्कृतशिक्षावृक्ष राजा वीरेन्द्रका शासनकालमा जरै उखेलिएर सर्वथा शुष्क र निर्जीव हुन पुग्यो। संस्कृतका मा.वि. हरुका, विद्यापीठहरुका र विद्यार्थिका सङ्ख्या केइ देखिए पनि स्व-विद्या-धर्म-निष्ठाका दृष्टिले ति सर्वथा अकिञ्चित्कर हुन गएका देखिए। वर्णमालाको पनि यथार्थ ज्ञान नभएका माञ्छे वैयाकरण - कोषकार - प्राज्ञशिरोमणि समेत बनाइने कुरा साधारणजस्तो हुन गयो।

२०२६ सालमा निस्किएर २०२८ सालमा हराएको संस्कृतविश्वविद्यालयस्थापनाको कुरा २०३९ सालमा षड्यन्त्रकारिरूपमा उठ्यो। २०३९ भाद्र १ गते गठित भै २०४० श्रावण ८ गते आफ्नो प्रतिवेदन प्रस्तुत गर्ने साहि-उच्च-शिक्षा–आयोगले नेपालमा संस्कृत–शिक्षाको विकास विस्तार र सुदृढीकरणका लागि हैन,हिन्दुराज्ज्य भनिएको नेपालको सम्प्रशासनको मुकुण्डोकारूपमा र पाश्चात्यका अनुसन्धान-सम्बन्धि तालिम दिने सँस्थाका नक्कलका रूपमा मात्त्र रहने गरि नेपालमा संस्कृत-विश्श्व-विद्यालयको स्थापना गर्ने बाटो बनायो। तथापि २०४१ सालमा संस्कृत- विश्वविद्यालयको शैक्षिक, प्राशासनिक र आर्थिक व्यवस्थाका विषयमा विस्तृत योजना तयार गर्न संस्कृतज्ञहरुको जुन संस्कृत-विश्श्वविद्यालय-तयारि-समिति नेपाल-सम्प्रशासनले बनायो, तेस समितिले त साहि-उच्चशिक्षाआयोगको धारणालाइ अस्वीकारगरि नेपालमा संस्कृतशिक्षाको विकास विस्तार र सुदृढीकरण गर्ने संस्कृत-विश्श्वविद्यालयको शिक्षणव्यवस्था -

---

१. नेपालमा संस्कृतभाषानिबद्ध विभिन्न आर्षणास्त्रहरुको अध्ययन - अध्यापनमा शिथिलता ल्याउन परचक्रिबाट चलाय्येको चालवाजिको तिरस्कार गर्दै वेला-वेलामा पत्रिकाहरुमा लेख छपाइ ति शास्त्रहरुको पठनपाठनपरम्पराको संरक्षण गर्न तिर सबैको ध्यानाकर्षण गर्ने प्रयास गर्दै आइएको हो। आयुर्वेद-शिक्षाका विषयमा पनि 'आयुर्वेदलाइ कसरि लोकप्रिय बनाउने' भन्ने लेख (गो. प. २०२६।६।२१) र 'आयुर्वेदको प्रगति कसरि?' भन्ने लेख(विश्वात्मदर्शन २०२९ चैत्र)प्रकाशितगराइ विचारहरु जनसमक्ष राखिएका हुन्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रशासनव्यवस्था - र - अर्थव्यवस्थाको योजना प्रस्तुत गरेको थियो । तर तेस योजनालाइ नेपालको सम्प्रशासनले रद्दिको टोकरिमा फ्याँकिदियो ।

२०४३ सालमा नेपालको सम्प्रशासनले 'संस्कृत-विश्वविद्यालय स्थापित गरियो' भनेर घोषणा गऱ्यो । तर यो विश्वविद्यालय साहि-उच्चशिक्षा आयोगले परिकल्पना गरेजस्तो नाममात्रको विश्वविद्यालयको रूपमा रएको छ । एस विश्वविद्यालयको शैक्षिककार्यक्रम सर्वथा निष्प्राण र नेपालमा संस्कृतशिक्षाको विकास विस्तार र सुदृढीकरण गर्ने दिशामा सिन्को पनि नसार्ने खालको भएको देखिन्छ [2] ।

ऐले नेपालमा चलेको संस्कृतशिक्षाको पाठचक्रमले अङरेजि भाषाको अनिवार्यताले गर्दा विशेष गरि धार्मिक दृष्टिले संस्कृत शिक्षा लिन चाआने मान्छेलाइ र धार्मिक दृष्टिले संस्कृत-विद्यालय सञ्चालनगर्न चाआने मान्छेलाइ बाधा पारेको देखिन्च । यो पाट्ठचक्रम नीतिशास्त्र जस्तो विषयको समावेश नभएको हुनाले र तल्ला तहमा नै शास्त्रीयताको गरुङ्गो भारले लादिएको हुनाले (क) साधारण शिक्षार्थिका लागि (ख) सबै जातिका छात्रका लागि र (ग) महिलाहरुका लागि पनि प्रतिकूल देखिन्छ । वार्ता त्रयी दण्डनीति र आन्विक्षिकी इ सबै विद्याहरुको न्यूनतम प्रतिनिधित्व पनि नभएको हुनाले सैद्धान्तिक रूपमा त्रुटिपूर्ण र विकलाङ्ग (अपाङ्ग) पनि भएको छ [3] ।

---

२. (क) २०४३ संवत्मा स्थापित संस्कृत-विश्वविद्यालयको अँइन्मा रएका त्रुटिहरुको र छात्त्रस्रोतका समस्याहरुको निराकरणका सम्बन्धमा शासनतन्त्रले संस्कृतशिक्षाको पाठचक्रमको निर्धारणमा र पाठ्यपुस्तक लेखाउनमा गरेका उपेक्षापूर्ण वा षड्यन्त्रपूर्ण कामका विषयमा समेत वस्तुस्थिति जनसमक्ष राख्तै गो.प.मा २०४३।११।४ मा 'संस्कृत-विश्वविद्यालय : छात्त्रस्रोतको व्यवस्था' भन्ने लेख र २०४३।११।२८ मा 'सत्य कुरामा विवेकदृष्टि रहोस्' भन्ने सम्पादकलाइ चिठि प्रकाशित गरिएका थिए । (ख) संस्कृत-विश्वविद्यालय खुलेपछि पनि नेपालमा संस्कृतशिक्षाको विकास विस्तार र सुदृढीकरण हुने लक्षण नदेखिएको र तेसका प्रतिकूल लक्षणहरु देखिएका हुनाले राष्ट्रका अभिभावक-र-उद्‌वुद्धजानपद (नागरिक)हरुको ध्यान आकृष्ट गर्न २०४४।६।२८ को साप्ताहिक मञ्चमा आवश्यक-विवरण-युक्त 'नेपालमा संस्कृत-शिक्षाको विकास विस्तार र सुदृढीकरण हुने आशा अत्यन्तै क्षीनो' भन्ने लेख प्रकाशित गराइएको थियो ।

३. संस्कृतशिक्षालाइ पूजाकोठाका विषयमा सीमित गरेर वा आधुनिक विषयको

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऐले नेपालदेश-भोरिमा करिब चालिस ओडा जति संस्कृतमाध्यमिक विद्यालयहरु छन्; जसमा आठौँ नवौँ र दशौँ कक्षामा (१) नेपालि (२) गणित (३) अङरेजि (४) व्यावसायिक विषय (५) ऐच्छिक विषयहरुको एक पत्र (६) संस्कृतभाषाको एक पत्र र (७) वेद, व्याकरण, ज्योतिष, न्याय र साहित्य इ पाँच विषयमद्ध्ये एक विषयको एक पत्त्र गरि जम्मा सात पत्र पडाइन्छन्। शिक्षा निश्शुल्क छ। तेस्तै नेपालदेश-भोरिमा ऐले सात संस्कृत-महाविद्यालय (विद्यापीठ) छन्; जसमा कतै उत्तरमध्यमासम्म, कतै शास्त्रिसम्म, कतै आचार्यसम्म र कतै विद्यावारिधिसम्म पडाइ हुन्छ। तर ति माध्यमिक विद्यालयका र विद्यापीठहरुका शैक्षिककार्यक्रम निष्प्राण भएका हुनाले ति सबै नै मुकुण्डोको रूपमा मात्र चलाइएका प्रतीत हुन्छन्।

संस्कृतशिक्षाको एस्तो अवस्थाले गर्दा समाजमा अत्यन्त शोचनीय अवस्था उत्पन्न भएको देखिन्छ। ऐले पडेलेखेका नेपालिमद्ध्ये आँफना सन्तति स्वधर्मगा र स्वदेशमा नै रएर आँफनो जन्मभूमिलाइनै पुण्यभूमि र कर्मभूमि मानेर सुकर्मै गरेर पाश्चात्त्यहरुको र तिनका पिछलग्गुहरुको आश्रय नलिएरैपनि मानवोचित जीवन जिउन सक्छन् भन्ने विश्श्वास भएका मान्छे नेपालमा अत्यन्तै दुर्लभ हुन गएका छन्। वैदिकार्यभारत-वर्षीय राष्ट्रियताको वा वास्तविक नेपालि राष्ट्रियताको विनाशको योभन्दा ठुलो जड अरु के हुनसक्ला र।

४. नेपालमा संस्कृतशिक्षाको शोचनीय अवस्थाको निराकरणको मार्ग

हाम्रो विचारमा नेपालमा संक्रतशिक्षाको विकास, विस्तार र सुदृढीकरण गर्न तल-लेखिए-अनुसारको व्यवस्था गर्न पर्छ–

१) ऐले नेपालमा चलेको संस्क्रतशिक्षाको पाट्ठचक्रम आर्थिक दृष्टिले विपन्न, उद्‌वुद्ध र समर्थ अभिभावकको स्नेहपूर्ण मार्गदर्शन नपाउने, तथा प्राय

अत्यधिक चापले स्ववैशिष्टचशून्य बनाएर तथा संस्कृतशिक्षाकार्यक्रमलाइ चतुरस्र हुन नदिएर नेपालमा संस्कृतशिक्षाको सार्थक पृथक् अस्तित्त्व समाप्त गर्न २०११ सालदेखि परचक्रिहरुले जमर्को गरेको र सो कुरा २०२८ साल पछि बर्ता स्पष्ट हुँदै आएको कुरामा ध्यान आकृष्ट गरि तेसको प्रतीकार गर्न आह्वान गर्दै २०४४।४।२८मा र २०४४।५।४ मा साप्ताहिक मञ्च पत्रिकामा 'संस्कृत शिक्षाको वैशिष्टच र पृथक् अस्तित्त्व समाप्त गर्ने योजना अझै सक्रिय ?' भन्ने लेख प्रकाशित गरिएको थियो।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्कृतशिक्षाप्रति हार्दिक श्रद्धा नभएका शिक्षार्थिहरुको मात्त्र प्रवृत्ति हुने खालको भएको छ। एसमा प्रवृत्त हुने शिक्षार्थिका हृदयको उद्देश्यका दृष्टिले हेर्ने हो भने एस पाट्ठचक्क्रमले "काशि जानु कुतिको बाटो" भन्नि नेपालि उखान-लाइ चरितार्थ गर्दछ भन्न सकिञ्च।

यो दोष हटाउन संस्कृतपाठ्यक्रम (१) धार्मिक उद्देश्य प्रधान भएका व्यक्तिले (२) वेदवेदाङ्गादिशास्त्रको गहन अद्ध्ययन गर्ने उद्देश्य लिने व्यक्तिले (३) ज्योतिष आयुर्वेद जस्ता प्राच्च्य विज्ञानको विशिष्ट अद्ध्ययन गर्न चाहनेहरुले र (४) शास्त्रीयताको गरुङ्गो भार नबोकिकन हाम्म्रो आँफ्नो धर्म–संस्कृति–वाङमय–परम्पराको सामान्न्य ज्ञान गर्दै व्यवहारोपयोगि सस्कृत-मूलक साध्यारणशिक्षा लिन इच्छा गर्नेहरुले तथा महिलावर्गले र नेपालि समा-जका विविध समुदायका व्यक्तिहरुले समेत आँफुलाइ अनुकूल पर्ने विषयहरु रोज्न पाउने गरि निर्धारण गरिनु पर्छ। वर्तमान संस्कृतशिक्षापाठ्यक्रम उक्त चार प्रकारका व्यक्तिमद्ध्ये एकप्रकारका व्यक्तिको पनि आकाङक्षाको अनुकूल छैन।

एस दोषको निराकरण गरि संस्कृतशिक्षाको पाट्ठ्चक्रम समुचित र सन्तुलित पार्न --(१) धार्मिक उद्देश्य प्रधान भएका संस्कृतशिक्षार्थिलाइ र संस्कृतविद्द्यालयस्थापनेच्छुकहरुलाइ वाधा पार्ने अङरेजि भाषालाइ **अनिवार्य-क्षेत्त्रबाट** हटाउन पर्छ, (२)शास्त्रीय वेदादिविषयको समकक्ष रूपमा हितोपदेश-शैलीको नीतिशास्त्र विषयको पाट्ठचक्रममा समावेश गर्नुपर्दछ[४] (३) अनिवार्य-संस्कृतव्याकरणमा कौमुदीपद्धतिका विकल्पमा भट्टिकाव्यपद्धति र संस्कृतभाषा-शिक्षणको आधुनिक-पद्धति पनि समाविष्ट गर्नुपर्दछ।(४)व्यावसायिक विषयमा

---

४. बास्तविक संस्कृतानुरागिपण्डितहरु नेपालका सबै समुदायका लागि समुचित संस्कृतशिक्षाको व्यवस्था गर्न तत्पर भएको र 'हितोपदेश-शैलीको नीतिशास्त्रजस्तो सबैका लागि विशेष उपयोगि हुने विषय पाठचक्रममा समावेश-गर्ने, तथा अनिवार्य व्याकरणमा कौमुदीपद्धतिका विकल्पमा भट्टिकाव्यपद्धति र आधुनिक संस्कृतभाषाशिक्षणपद्धतिको व्यवस्था गर्ने आदि कार्य गरि तेसो गर्नुपर्छ' भनि जोडदिइरहेका देखिएको; तर सम्प्रशासनले भने तेसो गर्न नचाहेको तथा केइ संस्कृतज्ञहरु पनि दबाबमा वा बहकाइमा परेर एस विषयमा विरोधि वा उदासीन हुन गएको देखिएको कुरालाइ २०४२।५। ३ को गो. प. मा र २०४३। ३।३१ को दैनिक समाजमा सम्पादकलाइ पत्र लेखि स्पष्ट पारिएको थियो । २०४७ सालको परिवर्तनपछि पनि संस्कृत–विश्श्व– विद्यालयले अरु विषयहरु थप्ता पनि एक मुख्य विषयका रूपमा नीतिशास्त्र विषय राख्न आजसम्म पनि आनाकानि गरिराखेको छ। यो कुरा शोच्च्य छ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यावहारिक-ज्योतिष, सङ्गीत, गृहविज्ञान, आयुर्वेदीय स्वास्थ्यकार्यकर्तृ शिक्षा इत्यादि विषयहरु पनि थप गर्नपर्च ।(५) ऐच्छिक विषयमा गणित, विज्ञान, स्वास्थ्यशिक्षा, इतिहास, भूगोल, संस्कृति, राजनीतिशास्त्र, समाजशास्त्र, अर्थशास्त्र, पत्रकारिता, नेवारिभाषा, मैथिलिभाषा, हिन्दिभाषा, फ्रेञ्चभाषा, -अङ्रेजिभाषा, जर्मनभाषा, रुसिभाषा, चिनियाभाषा, जापानिभाषा इत्यादि विषयहरु राखिन-पर्च । (६) शास्त्रीय मुक्ख्य विषयको उत्तरमद्ध्यमामा प्रत्येक खण्डमा(१/२पूर्णाङ्कका) २/२ पत्र र शास्त्रीमा प्रत्येक खण्डमा३/३पत्त्र निर्धारित हुन पर्च । (७) ऐच्छिक आधुनिक विषयका विकल्पका रूपमा शास्त्रीय सहायक-विषयका पनि (१/२ पूर्णाङ्कका)२/२ पत्त्र उत्तरमध्यमामा र ३/३ पत्त्र शास्त्रीमा प्रत्येक खण्डमा निर्धारित हुनपर्च । (८)साधारण माध्यमिक विद्यालयहरुमा र क्याम्पसहरुमा त्योत्यो कक्षामा साधारण(अनिवार्य) पत्त्रका रूपमा राखिएको अङ्रेज़िभाषाको पत्त्र छैटोकक्षादेखि शास्त्रिकक्षासम्म अतिरिक्तऐच्छिक पत्त्रका रूपमा राखिन पर्च ।

२) नेपालि हिन्दुराष्ट्रको राष्ट्रियचरित्त्रको संरक्षणका र परिपोषणका लागि माद्ध्यमिक-विद्द्यालयमद्ध्ये प्रतिशत दश संस्कृतमाद्ध्यमिकविद्द्यालय र प्रवेशिकापरीक्षार्थिमद्ध्ये प्रतिशत दश संस्कृतमाध्यमिकविद्यालयका परीक्षार्थि जवसम्म हुँदैनन्, तबसम्म संस्कृतशिक्षा सर्वथा निश्शुल्क र यथोचितरूपमा सवृत्तिक पनि हुनपर्दछ ।

३) संस्कृतशिक्षणसंस्थाहरुको पर्यावरण संस्कृतशिक्षाको आदर्शको अनु-रूप गर्न समुचित शैक्षिकनेतृत्त्वको विकास गर्ने; शिक्षक-कर्मचारिहरुले पनि उक्त-आदर्श-अनुरूप-आचार-व्यवहार-वेषभूषा-विचार-वचनको अवलम्बन गर्ने परिपाटि बसाल्ने, अधिकारिहरुले पनि शिक्षक-कर्मचारि-र-विद्यार्थिहरु प्रति विद्द्या-धर्म-सत्त्य-न्याय-वीरता-पराक्रम-कौशल-परिश्श्रम इत्त्यादिमा आस्था बडाउन अनुकूल हुने गरि व्यवहार गर्ने व्यवस्था मिलाउने इत्त्यादि कार्यहरु गर्न आवश्श्यक छ । संस्कृतशिक्षणसंस्थाहरुमा विद्द्याधर्मको साधना राम्म्रोसँग होस् तथा संस्कृतशिक्षाका स्नातकद्वारा समाजमा विद्याको प्रचारले र धर्मसंस्था-पनले राष्ट्रको आधिभौतिक, आधिदैविक र आद्ध्यात्मिक उन्नतिका विषयमा गहकिलो काम होस् भन्ने कुरा मनमा राखेर संस्कृतशिक्षासँग सम्बद्ध सबै व्यक्तिहरुले र सबै संस्कृतप्रेमिले तदनुरूप व्यवहार गर्नुपर्छ । संस्कृतशिक्षाप्रति राष्ट्रिय नीति पनि उक्त कुराहरुको अनुकूल रूपमा निर्धारित हुनपर्दछ[5] ।

---

५. (क) संस्कृतशिक्षाका विषयमा समुचित र स्पष्ट राष्ट्रिय नीतिको निर्धारण गर्नमा र तेसको कार्यान्न्वयनको सुव्यवस्था मिलाउनमा शासनले ध्यान

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४) शास्त्रीय पाण्डित्यको परम्पराको संरक्षण गर्न आचार्यकक्षामा त्योत्यो विषयमा भर्ना भएका विद्यार्थिमद्ध्ये योग्य र इच्छुक विद्यार्थिहरुलाइ विशेष सुविधा दिने र तिनिहरुले सफलतापूर्वक अद्ध्ययन पूरा गरेमा तिनलाइ अद्ध्यापनादिक्षेत्रमा आर्को आकर्षक जीविका प्राप्त नभएसम्म सहायकप्राद्ध्यापक-वेतनसरहको अनुसन्धानविद्द्वृत्ति दिने र योग्यनिर्देशकद्वारा आवश्यक विषयमा अनुसन्धानकार्य गराउने गर्नु आवश्यक देखिन्छ।एस्तो व्यवस्था गरेमा मात्र शास्त्रीय पाण्डित्यको परम्पराको संरक्षण हुन सक्ने देखिन्छ । आँफ्ना छोराछोरिलाइ अन्तैं लगाएका, अनाथ विपन्न बाध्यतावश संस्कृतशिक्षामा लागेका जीविकोपार्जनको चिन्ताले ग्रस्त शिक्षार्थिहरुले वेदवेदाङ्गादिपाण्डित्यको परम्पराको संरक्षण जस्तो गहन कार्य गर्लान् भन्ने मूर्खतापूर्ण विचार लिएका विद्याको रधर्मको मुकुण्डो लाएकाहरुको दिवास्वप्न जस्तो विचारले कुनैं फल सिद्ध हुने देखिँदैन[६]।

५) संस्कृतविद्यालयादिका सम्पत्तिको संस्कृतशिक्षाविकास-विस्तार-र-सुदृढीकरणमा नैं उपयोग गर्नु पर्दछ ।ऐलेजस्तो हिनामिना गर्न हुँदैन ।

६) व्यावहारिक विषयका आधुनिक ज्ञानलाइ तेसतेस विषयको हाम्म्रो प्राचीन ज्ञानमा मिलाएर हाम्म्रा तिति प्राचीन ज्ञानलाइ परिष्कृत र हाम्म्रा आधुनिक आवश्यकतालाइ पनि पूर्ति गर्ने खालका बनाएर विकसित गरि तिनको अध्ययनअध्यापनको परम्परा बसालि तिति विषयको स्वत्रैशिष्ट्ययुक्त परम्पराको स्थापना गर्ने उद्देश्यले कार्य गर्नुपर्दछ । एसरि कार्य-गरेर विदेशि आयातित शिक्षाकोक्षेत्र सीमित गर्दै विशिष्ट प्रकारको स्वकीय-शिक्षाको क्षेत्रको विस्तार गर्न पनि राष्ट्रले प्रयास गर्नुपर्दछ । तेस-अनुरूपको गहन शास्त्रीय-अनुसन्धान-कार्य पनि सञ्चालित गर्नपर्छ ।

७) संस्कृतच्छात्रावासहरुको स्थापना सुसञ्चालन र तिनमा शास्त्रीय अद्ध्ययनको र सदाचारको समुचित व्यवस्था पनि गर्नपर्छ ।

८) पुस्तकालयहरुका लागि सुविधायुक्त भवन, पर्याप्त पुस्तकहरुको

नदिनु नै नेपालमा संस्कृतशिक्षासम्बन्धि सबै समस्स्याको मूल जरो हो भन्ने कुरा दैनिक समाजमा २०४२।१२।२२ मा प्रकाशित "संस्कृतशिक्षा : स्पष्ट समुचित नीति र कार्यान्न्वयनको खाँचो" भन्ने लेखद्वारा सप्रमाण जनसमक्ष राखिएको थियो।

(ख) नेपालमा संस्कृतशिक्षाको विकास नहुनमा मुक्ख्य रूपमा पण्डितहरुको हैन, शासकहरुको नै दोष भएको कुरा २०४४।१।१ को र २०४४।१।२९ को साप्ताहिक मञ्चमा लेख लेखि उदाहरणहरुद्वारा स्पष्ट पारि देखाय्येको थियो ।

६. संस्कृतशिक्षामा जनअभिरुचि नहुनुमा मुक्ख्य कारण संस्कृतशिक्षाको उपेक्षापूर्ण वा षड्यन्त्रपूर्ण, बोक्रे र आर्थिकदृष्टिले विपन्न अनाथ अबोध र यत्किञ्चित् सुविधाका लोभले नाम लेखाउने शिक्षार्थिको मात्र प्रवृत्ति हुने

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यवस्था, पुस्तकको सुरक्षा, तिनको राम्रो वर्गीकरण र व्यवस्थापन, अनुसन्धान-पत्रिका र दैनिक साप्ताहिक मासिक आदि पत्रिकाहरुको व्यवस्था, छिटोछरितो सुलभ सेवाको व्यवस्था इत्यादि कुराहरु गर्न प्रयास गर्नुपर्छ ।

९) शोधग्रन्थहरुको, शोधपत्रिकाहरुको तथा समुचित सामयिक पाट्ठयग्रन्थहरुको प्रकाशनको व्यवस्था गरिनुपर्छ ।

१०) साधारण-माध्यमिक-विद्यालयहरुमा र विद्यापीठहरुमा पनि उच्चकक्षासम्म नै संस्कृतपत्र अनिवार्य गरिनुपर्छ ।

११) आफ्नो आदर्श, धर्म, दर्शन, संस्कार, आचार, विचार, व्यवहार, वेष, भाषा, भूषा, नीति, संस्कृति, स्वराष्ट्र, आत्मगौरव, स्वाभिमान आदिको रक्षा गर्न चांहने तथा संस्कृतशिक्षाको विकास विस्तार र सुदृढीकरण होस् भन्ने चाहने नेपालिहरुले परस्पर भेटघाट, परिचय र छलफल गरि अज्ञान र भ्रम हटाइ आवश्यक र उपयोगि कार्यक्रमहरुको आयोजना पनि गर्नपर्च र जनस्तरबाट पनि काम गर्नपर्च । अतः वर्तमान अवस्थामा हाम्रो वेदवेदाङ्गादि–शास्त्रमूलक संस्कृतशिक्षालाइ नेपालमा सम्प्रशासन (सर्कार) ले उचित र पर्याप्तप्रश्रय नदिएसम्म सामाजिकरूपमा पनि संस्कृतशिक्षा गामगाममा चलाइन पर्च । संस्कृतशिक्षाविना हाम्रो धर्मसंस्कृति मात्रै हैन वैदिकराष्ट्र पनि जाग्दैन । तसर्थ ऐलेलाइ प्रथमतः बुडा-पाका नियतकार्यनिवृत्त पण्डितहरुलाइ पत्रम्पुष्पम् गरि तिनैद्वारा सप्तम-अष्टम कक्षासम्मको गणित र दुर्गाकवच, चण्डी, रुद्री, नित्यकर्मवेदमन्त्रसङ्ग्रह, कर्मकाण्डपद्धति, वेद, अमरकोश, लघुकौमुदी, रघुवंश, हितोपदेश, चाणक्यनीति आदि यथारुचि यथाशक्ति यथौचिति गाम-गाममा पडाउनि व्यवस्था गर्नपर्छ; अरु विषय पैलेइ नपडाए पनि हुन्छ, पछि आँफै समाल्चन्; आँफ्ना सन्ततिलाइ स्वधर्मानुकूल संस्कृतशिक्षा नै विशेष रूपमा दिन चाआनिहरुले विशेष संस्कृत-शिक्षाको व्यवस्था नभएका अङ्रेजि शिक्षापद्धति-अन्तर्गतका इस्कुलहरुमा छोरा-छोरि भरसक नपठाउने र अष्टम कक्षाको पडाइ समाल्न सक्ने भएपछि संस्कृत-विद्यालयमा पठाउने तथा सं. मा. वि. खोल्ने र तिनलाइ स्वीकृति माग्ने गर्नुपर्छ । संस्कृतशिक्षाको पाठ्यक्रमलाइ तलदेखि माथिसम्मै माथि व्याख्या गरिएजस्तो विविध उद्देश्ययुक्त, सबै किसिमका शिक्षार्थिकालागि अनुकूल, युक्तियुक्त र परिष्कृत बनाउन लगाउन दबाव दिन प्रयास पनि गर्नपर्छ । एसरि प्रयास गर्दा पनि संस्कृत-विद्यालयहरु नपाय्येमा तथा पाठ्यक्रममा उचित सुधार नभएमा र आंफ्ना देशमा आँफ्नो अभीष्ट शिक्षा प्राप्त हुन केइगरेपनि नसकेमा हुर्केका १४-१५

खालको शैक्षिक कार्यक्रम हो भन्ने कुरामा २०४२।५।३मा गो. प. मा 'संस्कृतशिक्षा प्रति अभिरुचिको कारण' भन्ने शीर्षक दिइ केइ छोडि प्रकाशित गरिएको सम्पादकलाइ चिठि लेखि जनताको ध्यान आकृष्ट गर्न प्रयास गरिएको थियो ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्षका स्वस्थ किशोरहरुलाइ काशि-प्रयाग-हरिद्वार-हृषीकेशतिर जाँहाँ आँफ्नो अभीष्ट शिक्षा प्राप्त हुन सक्छ त्याँहाँ पठाइ शिक्षा दिने समुचित व्यवस्था मिलाउन पनि आवश्श्यक हुन आउला। विशेषरुपमा संस्कृतशिक्षा लिन नचाआनेले पनि यथोचित स्वधर्मानुकूल अनौपचारिक संस्कृतशिक्षा लिनि व्यवस्थागर्नुपर्छ[7]।

५. संस्कृतशिक्षाको संरक्षणकालागि विद्द्वान्हरुको प्रयास

नेपालमा परम्परागत परिष्कृत संस्कृतशिक्षाको संरक्षणका लागि २०११ सालदेखि नै केहि संस्कृतानुरागिहरु आँफ्ना अभिप्राय प्रकट गर्दै आएका देखिञ्छन्[8]। २०२८ सालदेखि त केहि विद्द्वान्हरुले नेपालमा संस्कृत-शिक्षाको वैशिष्ट्यको र पृथक् अस्तित्त्वको संरक्षणका लागि निरन्तर प्रयास चलाइरहेका छन्। उनिहरु पञ्चायतको कालरात्त्रिका समयमा पनि नेपालसम्प्रशासनको षड्यन्त्रपूर्ण-संस्कृत-माध्यमिक-शिक्षा-पाठ्यक्रमनिर्माणको बहिष्कार गरेर, सभामा उपस्थित हुने अवसर पाउँदा उपस्थित भै आँफ्नो पक्ष सवल रूपमा उपस्थापित गरेर, सभामा पैलेइ नै उपस्थितिमा हस्ताक्षर गर्न पर्ने, निर्णय हेर्रेपछि मात्त्र हस्ताक्षर गर्ननगर्न नपाइने कुराको विरोध गर्दै सभावाट पारित लिखित निर्णय हेरेर निर्णयमा आँफ्नो असम्मति हुँदा असम्मतिटिप्पणी लेखि हस्ताक्षर गर्ने वैदिक परम्पराका सभासद्ले अनादिकालदेखि उपभोग गर्दै आएको अधिकारको माग गरेर[9], अपेक्षित विषयलाइ अधिकारिहरुका र जनताका समक्षमा सुदृढ रूपमा प्रस्तुत गरेर, सभाका पारिश्श्रमिकको परित्त्याग गरिकन पनि सभामा न्याय्य रूपमा व्यवहार गरेर, अरु उपाय नहुँदा सभाको परित्त्याग समेत गरेर[10], अधिकारिको अन्न्याय्य आदेशको तिरस्कार गरेर, अधिकार

७. एस विषयको अरु विशेष चर्चा "वैदिक धर्म मूलरुपमा" भन्ने ग्रन्थ (२०४५) का उपोद्घातमा ट-ठ-ड-ढ-ण-त- पृष्ठहरुमा द्रष्टव्व्य छ।

८. एस सम्बन्धमा संस्कृतशिक्षालाइ लोकग्राह्य बनाउन संस्कृतको शैक्षिक कार्यक्रममा नै समुचित परिष्कार गर्नपर्ने कुरा गोर्खापत्त्रमा २०३९।२।२२ मा 'संस्कृतशिक्षालाइ लोकग्राह्य बनाउने उपाय' भन्ने लेख प्रकाशित गराइ जनसमक्ष राखिएको थियो। एस सम्बन्धमा 'नेपालमा संस्कृतशिक्षा किन?' भन्ने लेख पनि गो.प मा२०२५।१२।३०मितिमा नै प्रकाशित गराइसकिएकोथियो।

९. जो ऐले आँफुलाइ प्रजातन्त्रवादि घोषित गरि अग्रपङ्क्तिमा गएर स्वार्थसाधन गरिराखेका छन्, ति मुकुण्डे मित्त्रहरुले पनि एस्तो अधिकारको माग गर्नेलाइ नाना- प्रकारका छलछद्मपूर्ण व्यवहार गरि एक्लो पारेर पञ्चायतकालमा आँफुलाइ कृतार्थ गर्ने गरेको पनि अनुभवगरिएकै कुरा हो।

१०. संस्कृत-विश्वविद्यालयको स्थापना भएपछि सर्वप्रथम पाठ्यक्रमका विषयमा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नभएको मुकुण्डोको रूपमा मात्र प्रयोगगरिने सदस्यतालाइ अस्वीकृत गरेर, गोष्ठी आदिको आयोजना गरेर, धेरै विद्द्वान्हरुको हस्ताक्षरसहितका मागपत्र अधिकारिहरुका समक्ष प्रस्तुत गरेर, दैनिक-साप्ताहिकादि पत्रिकाहरुमा एस विषयका लेखहरु प्रकाशित गरेर [11], संस्कृत-विश्वविद्यालयको पाठचक्रम-निर्माणकार्यको बहिष्कार गरेर, तथा एस्तै अन्न्य कार्य पनि गरेर आँफ्ना विचार-हरु प्रकट गरिरहेका छन् । कोइ पूरा आँफ्नो कुटुम्बलाइ नै संस्कृतशास्त्राद्ध्य-यनमा लगाएर पनि नेपालमा संस्कृत-शिक्षाको संरक्षणं गर्न प्राणपणले लागिपरेका पनि छन् । तथापि कुनै प्रकारले शासनाधिकारमा बसेका पाश्चात्यशिक्षापक्ष-पाति, परान्नदूषित, आकृति मात्र नेपालिको लिएका विचारले पाश्चात्य भएकाहरु सँधै नै वास्तविक संस्कृतशिक्षाप्रेमिहरुका विचारहरुको तिरस्कार गर्दै संस्कृतशिक्षाको पाठचक्रमको तथा संस्कृतशिक्षणसंस्थाको वातावरणको षड्यन्त्र-पूर्ण रूपमा प्रयोग गरेर नेपालमा संस्कृतशिक्षाको मूलोच्छेदन गर्न परचक्रिहरुको हतियार भएर काम गरिरहेका छन् भन्ने कुरापनि धेरैवर्षदेखि अनुभवगर्दै आय्येको छ । अैने पनि एस विषयमा उल्लेखनीय परिवर्तन भएको अनुभवमा आएको छैन। ऐलेको शिक्षा-आयोगमा पनि संस्कृतनिष्ठ वास्तविक संस्कृतप्रेमिको प्रतिनिधित्त्व भएको देखिँदैन । संस्कृत-विश्वविद्यालयले भएका विभागहरु पनि अरु विभा-गमा गावेर, आचार्यकक्षाका अद्ध्यापनलाइ गौण रूपमा लगेर, संस्कृत-विश्वविद्यालयलाइ अन्न्य विश्वविद्यालयभन्दा तल्लो श्रेणिको देखाउने खालका छनोटसमिति पूर्ववत् राख्ने र नियुक्तिप्रक्रियामा अनियमितता गर्ने कामहरु समेत गरेर आजसम्मनै अनुचित व्यवहार गरिरहेको देखिएको छ । एस्ता सबै कुरामा सुधार ल्याउन संस्कृतप्रेमिहरुले जाँगर चलाइ लागिपर्नपर्छ ।।

विचार गर्न २०४४।११।१४।६ मितिमा सबै विषयसमितिहरुको संयुक्त बैठक काठमाण्डुको वाल्मीकिविद्यापीठभवनमा बोलाय्येकामा विभिन्न विषय समितिका४७ जाना सदस्यअद्ध्यक्षहरुका उपस्थितिमा आँफ्नो मन्तव्य स्पष्ट रूपमा अगाडि राखि पाठ्चक्रमसम्बन्धि शुद्ध शैक्षिक केहि प्रस्तावहरु स्वीकृत होउन् भनि प्रस्तुत गर्दा संस्कृत-विश्वविद्यालयका तात्कालिक शिक्षाध्यक्षले कुनै प्रस्तावमा विचारै गर्न नदिइ प्रस्ताव निरस्त गरिदिँदा प्रस्तावकले सभा परित्त्याग गरेको र तेस विषयमा अरु महानुभावहरुबाट उक्त प्रस्तावमा छलफल भै प्रस्ताव स्वीकृत वा अस्वीकृत होस् भन्ने माग गर्ने सम्मको समुचित व्यवहार पनि हुन नसकेको कुरा अनुभवमा आएको हो ।

११. माथि दिय्येका टिप्पणीहरुमा उल्लिखित श्रीशिवराजआचार्य-लिखित लेखहरु पढ्नुहोस् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एस्तो परिस्थितिभा नेपालमा संस्कृतशिक्षाको विकास-विस्तार-र-सुदृढीकरणका लागि कुनै प्रकारले प्रयास गर्न जाँगर चलाउने दिशामा प्रस्तुत "कतिपय-नैपाल-संस्कृत-ग्रन्थकार-परिचय"-ग्रन्थ हामि संस्कृत-शिक्षाऽनुरागि वैदिक आर्यहरुका लागि उपयोगि होला भन्ने आशा गरिन्छ ।

स्वाद्ध्यायशालाकुटुम्बको र वैदिक-समाजवादि-लोकतान्त्रिक-संस्कार-प्रवर्धन-सभाको सहकारितामा २०४८।५।७–८ मितिमा उपाकर्मपर्वका पावन प्रसङ्गमा वाल्मीकिविद्यापीठभवन[काठमाण्डु]मा वेद-स्मृति-पुराण-रामायण-महाभारतादि संस्कृतवाङमयको अनुशीलनका लागि नेपालि समाजमा अभिरुचि जागरित होस् भन्ने उद्देश्यले दुइदिने "नेपालि संस्कृतज्ज्ञका मुद्द्रित संस्कृत-ग्रन्थहरुको प्रदर्शनी" आयोजित गरिएको थियो । तेस प्रदर्शनीको आपूर्तिमन्त्रि श्रीचिरञ्जीवि वाग्लेले उद्घाटन गर्नुभएको थियो । उक्त प्रदर्शनीमा दाताहरुबाट आर्थिक सहयोग प्राप्त भएको थियो । श्रीविश्वराज आचार्य, श्रीपराशर आचार्य; कुमारीहरु सत्यवदा आचार्या, अमृतवदा आचार्या, कान्ता आचार्या र मिता आचार्या; श्रीअजय ढुङ्गेल आदिबाट विविध प्रकारले सहयोग पुऱ्याइएको थियो। श्रीसनत्-कुमार वस्तिले मोतिका दाना जस्ता अक्षरले आवश्यक पट्टहरु लेखिदिइ सहयोग गर्नु भएको थियो । उक्त प्रदर्शनीमा पूर्व-पश्चिम पाहाड-मदेस सबै भेकका नेपालि संस्कृतग्रन्थकारहरुका १३४ संस्कृत-ग्रन्थहरु प्रदर्शित गरिएका थिए । एसबाट जागरण आइ अरु ग्रन्थहरुका र ग्रन्थकारहरुका परिचय उपलब्ध हुँदै छन्, आर्थिक सहयोग पनि प्राप्त भएको छ । तेस प्रदर्शनीका प्रसङ्गले एस'कतिपय-नैपाल-संस्कृत-ग्रन्थकार-परिचय'-ग्रन्थको रचना गरिएको हो । याँहाँ यथाशक्ति यथोपलब्धि नेपालि संस्कृत-ग्रन्थकारहरुको सङ्क्षिप्त परिचय उपस्थापित गरिएको छ । याँहाँ साधारण अद्ध्ययनको र प्रयासको फल प्रस्तुत गरिएको छ । विशिष्ट अद्ध्ययनले र प्रयासले एस विषयको परिष्कार र विस्तृतीकरण यथासमय हुँदै जाला। उक्त प्रदर्शनीको आयोजनाका लागि र एस ग्रन्थका प्रकाशनका लागि पनि जोजो संस्कृतप्रेमिहरुले उदारतापूर्वक सहयोग गर्नुभयो वाँहाँहरुलाइ एस अवसरमा हामि विशेष साधुवाद टक्क्ऱ्याउँचम् ।

–स्वाद्ध्यायशालाकुटुम्बका गृह्यहरु

स्वाद्ध्यायशाला, २०४८।९।२१

अनुरोध– फेरिफेरि पनि नेपालि संस्कृतग्रन्थकारहरुका मुद्द्रित संस्कृतग्रन्थ-हरुको प्रदर्शनी गर्दैरहने र एस परिचय-ग्रन्थको परिष्कार गर्दैजाने पनि कार्य-क्रम भएकाले तेस्ता नवीन ग्रन्थ र ग्रन्थकारहरुको परिचय उपलब्ध गराउनुहुन सबै संस्कृतप्रेमिहरुमा हार्दिक अनुरोध गरिन्छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कतिपय-नेपाल-संस्कृतग्रन्थकार-परिचयानुक्रमः

१. याज्ञवल्क्यस्स्मृतिकारः
२. प्रथम-मानदेव-शिलालेखकारः
३. अनुपरमः [गुप्तः]
४. राजा जयदेवः
५ बुद्धकीर्तिः
६. सुमतितन्त्रकारः
७. स्थविर-ज्ञानश्रीमित्रः
८. राजा नान्यदेवः
९. चण्डेश्वरः
१०. ज्योतिरीश्वरः
११. गोल्हणः
१२. विद्याकरपण्डितः
१३. जयतः
१४. शिवदेवपण्डितः
१५. वालसरस्वतिसुमतिः
१६. धर्मगुप्तः
१७. धर्मराजो ज्योतिषी
१८. मणिकः
१९. विद्यानन्दनाथः
२०. राजा यक्षमल्लः
२१. गयपतिः
२२. मुरारिमिश्रः
२३. शुभराजश् शूद्रः
२४. बलभद्रो ज्योतिर्विद्
२५. महेशष् ठक्कुरः
२६. राजा द्रव्यसाहः
२७. चित्रविलासः
२८. रामोपाद्ध्यायः
२९. राजा जगज्ज्योतिर्मल्लः
३०. वंशमणिः
३१. राजा लक्ष्मीनरसिंहः
३२. काशिनाथः
३३. रामभद्रशर्मा (कुनुशर्मा)
३४. राजा प्रतापमल्लः
३५. मान्धातृसिंहः
३६. वीरेश्वरोऽर्ज्यालः
३७. नवमीसिंहो भण्डेलः
३८. राजा भूपतीन्द्रमल्लः
३९. गोपालः
४०. घनश्यामः
४१. राजा जगज्जयमल्लः
४२. राजा रणजिन्मल्लः
४३. नीलकण्ठः
४४. गणेशः
४५. प्रेमनिधिपन्तः
४६. गौरीश्वरः
४७. जयमङ्गलसूरिः
४८. राजा त्रिविक्रमसेनः
४९. गङ्गाविष्णुः
५०. कुलनिधिशर्मा
५१. टीकारामः
५२. लक्ष्मणकविः
५३. राजीवलोचनपण्डितः
५४. राजा पृथ्वीनारायणः
५५. ललितावल्लभः
५६. शक्तिवल्लभो भट्टाचार्यः
५७. राधावल्लभोऽर्ज्यालः
५८. चक्रपाणिरर्ज्यालः
५९. राजा प्रतापसिंहः
६०. शशिधरः
६१. रामभद्र उपाद्ध्यायः
६२. गोकुलानन्दशर्मा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६३. राघवशर्मा
६४. उदयानन्दोऽर्ज्याल:
६५. लक्ष्मीपतिः पाँडे:
६६. दैवज्ञकेसरि अर्ज्याल:
६७. देवकीनन्दनोऽर्ज्याल:
६८. वाणीविलास: पाँडे:
६९. गौरीदत्तशर्मा पौड्याल:
७०. रङ्गनाथ: पौड्याल:
७१ पृत्थ्वीपालसेन:
७२. अग्निधरदेवकोटा:
७३. भवदत्त:
७४. इन्द्रसेन:
७५. मकरन्दपण्डित:
७६. अमृतानन्द: पण्डित: [बाँडा:]
७७. सुन्दरानन्द: पण्डित: [बाँडा:]
७८. राजा गीर्वाणयुद्धविक्रम:
७९. वाणीनिधि:
८०. धरणीधरपन्त:
८१. शिवशर्मा सूरि:
८२. राजा राजेन्द्रविक्रमसाह:
८३. सुकृतिदत्त: पन्त:
८४. वाचस्पति: पन्त:
८५. पतञ्जलि:
८६. तारानिधि: [मणिराम:]
८७. रामचन्द्रो जोसि:
८८. छविल'लस् सूरिर् ढुङ्ग्याल:
८९. मनोहरशर्मा झा:
९०. हरिनाथ: प्याकुर्‍याल:
९१. त्रिपुरानाथ:
९२. प्रयागदत्त: पण्डित:
९३. विश्वनाथ आचार्य:
९४. खडगपाणि: अर्ज्याल:
९५. जयदेव: सूरि:
९६. क्षमादेव: पाँडे:
९७. डिल्लिसम्सेरवर्मा
९८. सदाशिवो दीक्षिताचार्य:
९९. गिरीशवल्लभो जोसि:
१००. उमानाथ: अर्ज्याल:
१०१. श्रीकान्तो घिमिरे:
१०२. भुवनेश्वरप्रसाद: पण्डित:
१०३. करुणाकर:
१०४. कुलचन्द्रो गौतम:
१०५. हेमराजशर्मा
१०६. वेदनाथो लामिछाने:
१०७. करुणाकर: पनेरु:
१०८. दधिरामशर्मा मरासिनि:
१०९. सोमनाथशर्मा सिग्देल:
११०. फत्यजङ्गपराक्रमसाह:
१११. दैवरात:
११२. नित्यानन्दस् सिग्देल:
११३. धनसम्सेरजङ्गो राणा:
११४. शिवप्रसादस् सिग्देल:
११५. पद्मप्रसादो भट्टराइ:
११६. जयराजशर्मा
११७. दामोदरशर्मा झा:
११८. शिवशङ्करो झा:
११९. पुष्पराजो राजभण्डारी
१२०. रामनाथ आचार्य:
१२१. उमानाथ आचार्य:
१२२. कुसुमाकर उपाद्ध्यायो रेग्मि:
१२३. गणेशप्रसाद: अर्ज्याल:
१२४. माधवप्रसादो देवकोटा:
१२५. अग्निप्रसाद: खरेल:
१२६. उमानाथ: पन्थि:
१२७. छविलाल: पोख्रेल:
१२८. बद्रिनाथस् सुवेदी
१२९. नरनाथ आचार्य:
१३०. जीवनाथो झा:

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३१. रविनाथष् ठक्कुरः — १३२. शेषराजो रेग्मिः
१३३. चिरञ्जीवी पोख्रेलः — १३४. जुननाथः पण्डितः
१३५. मीनप्रसादो नेपालः — १३६. लोकनाथो ढकालः
१३७. सोमनाथो घिमिरेः — १३८. हेमन्तरामो भट्टराइः
१३९. बुद्धिसागरः पराजुलिः — १४०. यदुनाथः खनालः
१४१. नयराजः पन्तः — १४२. गुणराजः खनालः
१४३. हरिनाथ उपाद्ध्यायो ढुङ्गेलः — १४४. कृष्णप्रसादशर्मा लम्सालः
१४५. कृष्णप्रसादो घिमिरेः — १४६. सुरेशो झाः
१४७. भीमकान्तः पन्थिः — १४८. पूर्णप्रसादो ब्राह्मणो दुवाडिः
१४९. चूडानाथो भट्टरायः — १५०. भोलानाथः पौडेलः
१५१. मेघराज उपाद्ध्यायो नेउपानेः — १५२. गिरिधारी भट्टराइः
१५३. शालग्रामः पोख्र्यालः — १५४. गणेशप्रसादो गौतमः
१५५. भरतराजो घिमिरेः — १५६. पशुपतिर् झाः
१५७. हरिशरण उपाद्ध्यायो लम्सालः — १५८. पुण्यप्रसादो रेग्मिः
१५९. भेषराजशर्मा सापकोटाः — १६०. मणिप्रसादस् तिवारिः
१६१. हरिप्रसाद आचार्यः — १६२. रोहिणीवल्लभशर्मा पोख्रेलः
१६३. टीकारामः पन्थिः — १६४. खेमराजः केशवशरणः
१६५. शिवराज आचार्यः — १६६. रामकृष्णप्रपन्नः
१६७. ज्योतिःप्रकाशो जोसिः — १६८. मुकुन्दशरणउपाद्ध्यायःपौडेलः
१६९. ठाकुरप्रसाद आचार्यः — १७०. विष्णुराज आत्रेयः
१७१. स्थानेश्वरो गौतमः — १७२. पवनकुमारः खनालः
१७३. ऋषिप्रसादशर्मा रिजालः — १७४. गोविन्दप्रसादशर्मा सापकोटाः

१७५. राघवदेवः

१७६. भिक्षुपूजितश् श्रीज्ञानः — १७७. गोविन्दशीलः
१७८. हरिवंशशर्मा — १७९. राजा सुमतिजयजितामित्रमल्लः
१८०. नरहरिर् नाथः

श्लाघ्याश्च तेऽमलधियस् सुधियः प्रशान्ता
विद्याप्प्रचारणधियस् समयन् नयन्ते ।
नो वा मुधाऽत्र समये क्षणिके य आशा-
पाशाशतैर् निगडिता विषये रमन्ते ॥

—प्राणाचार्यस्य उमानाथस्याऽऽचार्यस्य
(संहितासारवाङमय्यां सत्यसवनकाण्डे पूर्वसर्गेश्लो. ४९) ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

"इदन् नम ऋषिभ्यः पूर्व्वजेभ्यः"

कतिपय-नैपाल-संस्कृतग्रन्थकार-परिचयः

देववाणीसुसम्पर्कपवित्त्रीकृतजन्मनाम् ।
यथोपलब्धि कृतिनान् नेपालावनिवासिनाम् ।।१।।
नाम्नामभिजनादीनाङ् कृतीनाञ् चापि कीर्तनात् ।
यत् पुण्यन् तेन तुष्टस् स्याद् देवो वाणीपतिः प्रभुः।।२।।
तुष्टस् संस्कृतशिक्क्षां स सफलां सुविकासिनीम् ।
विस्तृताम् बद्धमूलाञ् च कर्त्तुं सर्वान् प्रवर्तयेत् ।।३।।

१. याज्ञवल्क्यस्स्मृतिकारः (अज्ज्ञायमाननिश्चितसमयः)

"योगीश्श्वरयँ याज्ज्ञवल्क्यं सम्पूज्ज्य मुनयोऽब्ब्रुवन् । वर्णाश्श्रमेतराणान् नो ब्रूहि धर्मानशेषतः ।। मिथिलास्स्थस् स योगीन्द्रः क्षणन् ध्यात्वाऽब्ब्रवीन् मुनीन् । यस्मिन् देशे मृगः कृष्णस् तस्मिन् धर्मान् निबोधत" इति याज्ज्ञवल्क्यस्मृत्यारम्भवाक्क्यदर्शनाद् याज्ज्ञवल्क्यस्स्मृतेर् मिथिलायामुत्पत्तिरभूदित्त्यवगम्म्यते । मिथिलामण्डलमद्ध्यव्ञ् जनकपुरञ् च वर्तमाननेपालदेशान्तर्गतमिति नेपालदेशे एव याज्ज्ञवल्क्यस्स्मृत्त्युत्पत्तिरित्त्यनुमीयते । उपलब्भ्यमानयाज्ज्ञवल्क्यस्स्मृतिकारश् च याज्ज्ञवल्क्यशिष्ष्यः कोऽपि मुनिरिति **"याज्ज्ञवल्क्यशिष्ष्यः कश्चित् प्रश्नोत्तररूपयँ याज्ज्ञवल्क्यमुनिप्प्रणीतन् धर्मशास्त्रं सङ्क्षिप्प्य कथयामास, यथा मनुप्प्रणीतम् भृगुः"** इति विज्ज्ञानेश्श्वरवचनादवगम्म्यते । विशेषेण तु स न ज्ज्ञायते । इययँ याज्ज्ञवल्क्यस्स्मृतिश् च आचार-व्यवहार-प्रायश्चित्तरूपैर् मुक्ख्यैस् त्रिभिरेव स्स्मृतिविषयैः परिपूर्णा मनुस्स्मृतिसदृशी महास्मृतिरस्ति ।

२. प्रथम-मानदेव-शिलालेखकारः
(५२० तमे [वैक्रमे?] अब्दे वर्तमानः)

ऊनविंशत्त्या शार्दूलविक्क्रीडितवृत्तपद्द्यैर्युतो नेपालमण्डलमद्ध्यवर्तिकाष्ठमण्डपोपत्त्यकासमीपावस्थिते दोलाद्द्रौ नारायणमन्दिरसमीपे स्थितः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रथम-मानदेवस्स्तम्भशिलालेखः कालोल्लेखयुत उपलभ्यमानो नेपालदेशेतिहासेऽतीव महत्त्वपूर्णः प्रथमश् शिलालेखो वर्तते । सोऽयं शिलालेखः केन प्रसङ्गेन किमर्थन् देवालयसमीपे स्थापित इति तु शिलालेखान् न ज्ञायते । सरलायां स्फुटायां संस्कृतभाषायां रचितोऽयं शिलालेखः उत्कटान्यालङ्कारसादिरहितोऽपि उपमालङ्कारयुतस् स्वभावोक्तिमयो मनोहर एव वर्तते । एतस्य रचयितुः कवेर् नामादिकन् तु न ज्ञायते । एष शिलालेखस् संस्कृतसन्देशाख्यमासिकपत्त्रिका-प्राचीनाभिलेखसङ्ग्रहादिषु मुद्रित उपलभ्यते ।

३. अनुपरमः [गुप्तः]
(५६६ तमाद् [वैक्रमात् ?] अब्दात् पूर्वः)

अनुपरमो गुप्तवंशज आसीदिति अनुपरमभार्यया आभीर्या ४६२ तमे [शाके ?] अब्दे अनुपरमेश्वरदेवालयस्स्थापनासमये स्थापिताच् शिलालेखादवगम्यत इति वदन्ति । तत्त्र अनुपरमाऽऽभीरीपुत्त्रस्स्य भौमगुप्तस्स्योल्लेखोऽस्ति । अनुपरमस्स्य पितुर् नाम परमाभिमानी इत्त्यासीत्, अनुपरमस् तच्छिलालेखसमये कालधर्मम् प्राप्त आसीदिति च तत एव ज्ञायते । अनुपरमकृतन् द्वैपायनस्तोत्त्रन् त्रुटितपूर्वभागवह्वंशङ्ग गरुडद्ध्वजस्स्तम्भोट्टङ्कितमुपलभ्यते । तच् च विविधैर् वृत्तैर् निवद्धञ् चतुस्त्रिंशत्पद्यात्मकन् धर्मदर्शनमहिमविचारेण गभीरम् अनुपरमस्स्य परमवेदभक्तत्त्वङ्ग ख्यापयच् च दृश्यते । एतत् स्तोत्त्रकाव्यन् च संस्कृतसन्देशादिषु मुद्रितमुपलभ्यते ।

द्वितीयनरेन्द्रदेवशिलालेखे [७०० तमे (वैक्रमे?) अब्दे स्थापिते] "**शौर्यन् नीतिगुणैर् गुणैरकलितैरात्मानमुद्भासिभिः, शक्त्या बाहुबलम् मतिं स्मृतिमतीं शास्त्रागमैर् भूरिभिः । मर्यादास् स्थितिभिर् दिशोऽपि यशसा राज्ज्यश्रिया मेदिनीम्, जात्या लिच्छविराजवंशमनघं योऽलङ्करोत्त्युच्चकैः**" इति पद्येन यो नरेन्द्रदेवं वर्णयाञ्चकार स नूनमुत्तमः कविः । किन्तु तस्स्य नामाऽस्माभिर् ज्ञातुन् नैव प्राप्तम् । एतादृशा अन्येऽपि बहवो नैपालाः कवयो विद्वांसश् च लिच्छविकालजा लिच्छवीनामनौदार्यात् प्रमादाद् वा वलिना कालेन निश्शेषङ्ग कवलिता अवगम्यन्ते ।

४. राजा जयदेवः [द्वितीयः] (७७०–७९० वै. ?)

द्वितीयनरेन्द्रदेवपौत्त्रो द्वितीयशिवदेवपुत्त्रो मौखरिभोगवर्मदौहित्त्रश् श्रीवत्सदेवीगर्भजो जयदेवः कवी राजा पशुपतये राजतम् पद्मं समर्प्य तदवसरे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(७६० वै. ?) शिलालेखं स्थापयामास । तत्र शिलालेखे चतुस्त्रिंशत् पद्यानि दृश्यन्ते । तेषु पञ्च पद्यानि राज्ञा जयदेवेनैव रचितानीति तत्त्वैवोट्टङ्कितमुपलभ्यते । तत्र राजा एकेन पद्येन पशुपतिवँ वर्णयति–"यं स्तौति प्रकटप्रभावमहिमा ब्रह्मा चतुर्भिर् मुखैर् यन् च श्लाघयति प्रणम्य चरणे षड्भिर् मुखैष् षण्मुखः । यन् तुष्टाव दशाननोऽपि दशभिर्वक्त्रैस् स्फुरत्कन्धरैस् सेवायँ यस्य करोति वासुकिरलन् जिह्वासहस्त्रैस् स्तुवन्" इति । एतेन राज्ञो जयदेवस्य संस्कृतपद्यरचनाभ्यासश् शोभन एवाऽवगम्यते ।

५. बुद्धकीर्तिः (७६० वै. ?)

अस्य बुद्धकीर्तेर् विषयेऽन्यत् किमपि न ज्ञायते । राज्ञो जयदेवस्य उपर्युक्ते शिलालेखे स्थितानि जयदेववंश्यावलिवर्णनपराणि एकानूनत्रिंशत् पद्यानि अनेन बुद्धकीर्तिना रचितत्त्वेनोक्तानि दृश्यन्ते । यतः खलु "श्लोकान् पञ्च विहाय साधु रचितान् प्राज्ञेन राज्ञा स्वयं स्नेहाद् भूभुजि बुद्धकीर्तिरकरोत् पूर्वामपूर्वामिमाम्" इति तत्त्वैवोल्लेखः प्राप्यते । एवञ्च बुद्धकीर्तिना लिच्छविकुलमाहात्म्यख्यापने जयदेवस्य साहाय्यङ्कृतमवगम्यते । राज्ञो जयदेवस्य वर्णने प्रवृत्ता "अङ्गश्रिया परिगतो जितकामरूपः काञ्चीगुणाढ्यवनिताभिरुपास्यमानः । कुर्वन् सुराष्ट्रपरिपालनकार्यचिन्तायँ यस् सार्वभौमचरितम् प्रकटीकरोति" इत्यादिरूपा, पशुपतेर् वर्णने प्रवृत्ता "ख्यात्या यः परमेश्वरोऽपि वहते वासो दिशाम् मण्डलवँ व्यापी सूक्ष्मतरश् च शङ्करतया ख्यातोऽपि संहारकः । एकोऽप्यष्टतनुस् सुरासुरगुरुर् वीतत्रपो नृत्यति स्थाणुः पूज्यतमो विराजति गुणैरेववँ विरुद्धैरपि" इत्यादिरूपा च रचना बुद्धकीर्तेरुत्तमकवित्वमालङ्कारिकत्त्वञ् च व्यनक्ति ।

६. सुमतितन्त्रकारः (६३३–६३७ वै. ?)

सुमतितन्त्रन् नाम एकस् सिद्धान्तज्योतिषग्रन्थ इदानीन् नेपालदेशे मुद्रितः प्रकाशित उपलभ्यते । एष ग्रन्थ इदानीम् प्रसिद्धात् सूर्यसिद्धान्ताद् भिन्नम् प्राचीनं सूर्यसिद्धान्तमुपजीवति, नेपाललिच्छविकालवर्षगणनापद्धत्यवबोधायाऽनन्यसाधारणतयोपयुज्यते चेति तदभियुक्तैरादरेण परिशील्यते । एतस्य ग्रन्थस्य रचयिता क इति न ज्ञायते । एष ग्रन्थस् त्रयस्त्रिंशदुत्तर-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षट्शततमवैक्रमाब्द-सप्तत्रिंशदुत्तरनवशततमवैक्रमाब्दयोर् मद्ध्ये कस्मिंश्चिदब्दे नेपालोपत्यकायां रचित इति च तदद्ध्येतार आहुः ।

७. स्थविर-ज्ञानश्रीमित्त्रः

स्थविर-ज्ञानश्रीमित्त्रेण नेपालदेश एव स्स्थित्वा विरचितत्त्वेन सम्भाविता नैपाललिच्छविकाललिपिलिखिता वृत्तमालास्तुतिर् भक्तपुरराज-रणजिन्मल्लहस्ताच् चक्रपाणेरर्ज्यालस्स्य हस्ते समागता, पण्डितपद्मनाभकेसरिहस्तादवाप्य पण्डितवरबुद्धिसागरपराजुलिमहाभागैस् सम्पादिता वाराणसीस्थ-योगप्रचारिणीप्रकाशिता समुपलभ्यते । तत्र ग्रन्थकर्तृकालप्रसिद्धसर्ववृत्तेषु विरचिता महायानबौद्धधर्मानुसारिणी बुद्धस्तुतिर् वर्तते ।

८. राजा नान्यदेवः (११५४ वै.)

कर्णाटदेशाभिजनो साम्प्रत-नैपाल-बारा-मण्डलान्तर्गत-सिम्म्रौनगडस्थो मिथिलादेशपालो भूपालो नान्यदेवो भरतनाट्ट्य-शास्त्रव्याक्ख्यां रचयामास किल । सा च व्याक्ख्या सरस्स्वतीहृदयालङ्कार इत्त्युच्च्यते, भरतभाष्ष्यम् इति चोच्च्यते इति तद्विद आहुः । नान्यदेवकृतम् भरतभाष्ष्यम् भाण्डारकर-प्राच्च्यग्रन्थसङ्ग्रहे सङ्गृहीतमस्तीति केचन आहुः । ग्रन्थमहार्णवाक्ख्योऽपि तदीयो ग्रन्थः कैश्चिदुल्लिखितो दृश्श्यते । शार्ङ्गदेवेन सङ्गीतरत्नाकरे नान्यदेवस्स्योल्लेखः कृतोऽस्तीति सङ्गीतशास्त्रानुशीलनकर्तार आहुः ।

९. चण्डेश्श्वरः (१३७१ वै.)

साम्प्रत-नैपाल-बारा-मण्डलान्तर्गतसिम्म्रौनगडनिवासी स्वर्णतुलादानादिमहादानदष् षडङ्गसहितान् वेदान् ग्राहयित्त्वा स्वधनदानेन ब्राह्म्मणान् गार्हस्थ्ये निवेशयिता सान्धिविग्रहिक-देवादित्त्यपौत्त्रस् सान्धिविग्रहिक-वीरेश्श्वरपुत्त्रो हरिसिंहदेवसान्धिविग्रहिकश् चण्डेश्श्वरष् ठक्कुरःखलु गृहस्थरत्नाकर-कृत्त्यरत्नाकर-पूजारत्नाकर-दानरत्नाकर-शुद्धिरत्नाकर-विवादरत्नाकर-व्यवहाररत्नाकराक्ख्यान् सप्त स्मृतिवाक्क्यरत्नाकररूपान् रत्नाकरान् रचयामास किल । तेनाऽष्टमो राजनीतिरत्नाकरोऽपि रचितो दृश्श्यते । दानवाक्क्यावलिरिति शिववाक्क्यावलिरिति च द्वौ ग्रन्थौ तस्स्यान्न्यावपि श्रूयेते । ज्योतिषोक्त्याधारे उत्सवानान् निरूपणाय कृत्त्यचिन्तामणिरपि तेन रचितोऽस्तीति वदन्ति । चण्डेश्वरीप्रश्नविद्द्येति सूर्यसिद्धान्तभाष्ष्यमिति तदीयौ द्वावन्न्यौ ग्रन्थौ च टीकारामशर्मणोल्लिखितौ दृश्श्येते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०. ज्योतिरीश्वरः

मिथिलाधिप-सिम्म्रौनगडराजस्य हरिसिंहदेवस्य सभायाः पण्डितो रामेश्वरपौत्रो धीरेश्वर-पुत्रोऽयम् ज्योतिरीश्वरो धूर्तसमागमन् नाम प्रहसनं रचयामास किल। एष ग्रन्थो नैपाल-राष्ट्रियाभिलेखालये सङ्गृहीतोऽस्ति। पञ्जीसङ्ख्या—प्र. १५३६ (ता.)।

११. गोल्हणः (१३६३ वै.)

काश्मीरकजननामसदृशनामको गोल्हणोऽयन् नैपालयमलपर्वतप्रान्तराजम् पुण्यमल्लमाश्रितः कश्चन कल्पितार्थक—संस्कृतभाषावाक्यरचनानिपुणस् संस्कृतज्ञोऽवगम्यते। एतेन रचितस् स्वर्णपत्रलेख इतिहासप्रकाशे प्रकाशितोऽस्ति। बाणभट्टरचनाकौशलातिशायिन एतद्रचनाकौशलस्य परिचयाय तस्य लेखस्य संस्कृतभागोऽधस्तात् प्रस्तूयते—

ओं स्वस्ति । सुमेरुसानुसन्निभादभ्राऽभ्रलँ लिहकनककलशसंशोभितवरविहारमनोहर-विपणिश्रेणिसमुपविष्टसौराज्यसन्तुष्टमहाजनतरुणीविहित-नृत्योत्सवप्रहतमञ्जुमुरजजीमूतस्तनितप्रमुदितशिखण्डिमण्डल-बिहितताण्डवाडम्बरे, अम्बरधुनीबन्धुबन्धुरवंह्वीयससमुल्लसद्विमलकल्लोल— गिरिकल्लोलिनीलोलकल्लोलहिन्दोलखेलन्मरालीपक्षपालीपक्षविक्षोभविक्षिप्त-शिशिरशीकरासारवाहिगन्धवाहावधूनितपूगपुन्नागचम्पका — ऽशोक—कुरवक-बकुल-लवली-लवङ्गसवँ विद्ध—मुग्धस्कन्ध—माकन्द-मञ्जुल-मञ्जरीरजःपुञ्ज-पिञ्जरितपरिसरे, श्रीमति सेञ्जाभिधानवरनगरे, गरुडद्ध्वजावताराऽपारसंसार-सागरोत्तारसेतुभूतापघनश्रीघनाराधनाधिग तप्राज्यराज्यरक्षाक्षम-प्रचण्डनिजभुजदण्डचण्डिमसमाक्रान्तविराटपीठाधिष्ठितप्रतिष्ठितेष्टदेवता—परिचर्यापरायण-राजचक्रनारायण—गार्ग्यायण—गौतमाऽत्रिहारीतापस्तम्बादिधर्म-राजनीतिशास्त्र-निपुणप्रष्ठा-ऽपाडराज-जगज्ज्येष्ठराजताराऽतरणिप्रभृति-विरुदावली-विराजमान-परमभट्टारक—महाराजाधिराजपरमेश्वरश्श्रीमत्पुण्यमल्ल-देवास् सान्तःपुर-परिवारास् सकुमाराश् चिरञ् जयन्तु ॥

१२. विद्याकरपण्डितः (१३६४ वै.)

विद्याकरपण्डितोऽपि यमलपर्वतप्रान्तराजम् पुण्यमल्लमाश्रितः कश्चन आहार्यार्थक—संस्कृतवाक्यरचनाकुशलो विपश्चित् प्रतीयते। एतेन रचितत्वेन सम्भावितस् स्वर्णपत्रलेख इतिहासप्रकाशे मुद्रितो दृश्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्यपि सम्बद्धे लेखेऽस्य रचयितृत्वं स्फुटन् नास्ति, तथापि गोल्हणरचनातः पृथग् दृश्यमानेयं रचना विद्याकरविपश्चित एव प्रतीयते । सुबन्धु-दण्डि-बाणभट्टादि-रचनाकौशलातिशायिन एतद्रचनाकौशलस्य परिचयाय तस्य लेखस्य संस्कृतभागोऽधस्तात् प्रस्तूयते—

ओं स्वस्ति । समस्तमेदिनीवलयतलमिलदमन्द-स्फारसम्भारसौरभ्य-सुन्दर-सरल-सालतालतमाल-हिन्तालतालीलवलीलवङ्गपूग-पुन्नागचम्पकाशोक-तिलक–कुरवकवकुलकुलसवँ विद्ध–मुग्धस्कन्ध–माकन्द–मञ्जुलमञ्जरीरजः-पुञ्जपिञ्जरितपर्याप्तपरिसरे, सरससरभससलँ लापलीलाविलोलयौवनोद्दाम-काममकमनीयकामिनीकेलिचङ्क्रमणरणरणायितकनकनूपुररवाकर्णनाकण्ठोत्कण्ठि-ताक्रीडसरसीसुकुशेशयोद्दण्डनालकाण्डकण्डूयन–कुण्डलित–कन्धरालीमराली-मल्लिकाक्षपक्षपालीविक्षोभविक्षिप्तशिशिरशीकरासारवाहिगन्धवाहापनीत-सुरतभरखिन्न-सुप्तसीमन्तिनीनिदाघशीकरकणनिकरे, करदीकृतकोङ्कणकर्णाट-लाट-मुरल–केरल–डहालाऽङ्गवङ्गकालिङ्गमिथिलामालवनेपालगुर्जरजालन्ध-रान्ध्रप्रमुख-मेदिनीनाथसंसेव्यमानास्थाननिकेतनाजिरे श्रीमति सेञ्जापुरे परम-भट्टारकमहाराजाधिराजपरमेश्वरपरमसौगतकुलकमलविकाशनैकमार्त्तण्डः (?) प्रचण्डनिजभुजदण्डचण्डिमाक्रान्तविराटपीठाधिष्ठितप्रतिष्ठितेष्टदेवता-परिचर्यापरायण–राजचक्रनारायणः (?) गार्ग्यायणगौतमादिप्रणीतनीति-शास्त्रनिपुणप्रष्ठाऽपाडराजजगज्ज्येष्ठाऽदीक्षितराजदीक्षाशिक्षागुरु-राजतारा-तरणिप्रभृतिनिज–विमलविरुदावलीविराजमान–धर्मपालमहीपालश्श्रीपुण्य-मल्लदेवाः सान्तःपुरसकुमारास् सुचिरवँ विजयिनो भवन्तु ।

१३. जयतः (१३९४ वै.)

अरिमल्लदेवमहामात्यम् जयसिंहमाश्रितो नेपालोपत्यकानिवासी चन्दनवर्मणः पुत्रो जयतः १३९४ तमे वैक्रमेऽब्दे जयसिंहाज्ञया बुङ्गेश्वर-यात्रोत्सवप्रसङ्गे प्रमुदितद्विजराजपुत्रादीनां समाजेऽभिनयाय महीरावण-वधनामकन् नाटकं रचयामासेति ऐतिहासिका वदन्ति । एष ग्रन्थो नैपाल-राष्ट्रियाभिलेखालये वर्तते । पञ्जीसङ्ख्या तृ. ३६२ (ता.) अस्ति । इदानीमेष ग्रन्थो मुद्रितोऽपि दृश्यते । भक्तपुरे सामन्तरूपेण स्थितस्य स्थितिमल्लस्य मन्त्रित्वङ् कुर्वाणस्याऽस्य जयतस्यैवाज्ञया केनाऽपि पण्डितेन मानवन्याय-शास्त्रन् नाम ग्रन्थविशेषो रचित इति च केचन ऐतिहासिकाः प्रतिपादयन्ति । नाटककारजयतान् मन्त्री जयतस् सर्वथा पृथगित्यन्ये । वस्तुतस् तु "नेपाले

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थितिराजमल्लनृपतिर् भूपालचूडामणिस् तस्याऽमात्यवरोऽयिकल्प-विटपी सन्नीतिवारान्निधिः । तस्याऽर्थे मणिकाभिधेन कृतिना नेपाल-वाचा कृता, टीका न्यायविकासिनी सुविदिता ब्रह्मोक्तधर्मस्मृतेः"
इति वचनाज् जयताज्ज्ञया न्यायविकासिनी नेपालभाषामयी टीकैव कृता न तु मानवन्यायशास्त्रमेव कृतमित्यवगम्यते । इदम् मानवन्यायशास्त्रन् तु नारदस्स्मृतिरेवाऽस्तीति वदन्ति । तर्हीदम् 'मानवन्यायशास्त्रम्' इति नाम केनाभिप्प्रायेण प्प्रयुक्तमिति विचारणीयम् भवति । "टीका न्यायविकासिनी सुविदिता ब्रह्मोक्तधर्मस्स्मृतेः" इति मणिकोक्तिरपि विचारणीया दृश्श्यते । यद्यपि तत्र 'ब्रह्म्मोक्तधर्मः स्मृतः' इति पाठोऽपि दृश्श्यते तथापि सोऽनन्वितो भाति । ब्रह्म्मोक्तधर्मस्स्मृतेरित्त्यस्स्य तु मनूक्तधर्मशास्त्रस्स्येत्त्यर्थस् स्यात् । तथा च मानवधर्मशास्त्रमित्त्यस्स्यापि मनूक्तधर्मसंहितेत्त्येवाऽर्थोऽवगम्म्यते । यथा भृगुप्प्रोक्ता मनुस्स्मृतिरस्ति तथैव नारदप्प्रोक्ताऽपि मनुस्स्मृतिरस्तीति च वेदितव्व्यम् ।

१४. शिवदेवपण्डितः (१४१२ वै.)

शिवदेवपण्डितोऽयं हिमवत्खण्डान्तर्गत-यमलपर्वतप्रान्तराजम् पृथ्वीमल्लं समाश्रितः कश्चन संस्कृतवाक्क्यदण्डकप्प्रणयनपटुः पण्डितः प्रतीयते । एतेन रचितस् स्वर्णपत्रलेख इतिहासप्प्रकाशे प्रकाशितो दृश्श्यते । एतद्रचना-सौष्ठवपरिचयाय तस्स्य लेखस्स्य संस्कृतभागस्याऽऽद्योंऽशोऽधः प्रदर्श्यते–

ओं स्वस्ति । स्वस्तिकनन्द्यावर्तश्श्रीविशालचतुश्शालसुधाधवल-सौधोत्सङ्गसङ्गताङ्गनासङ्गीतमनोहरे, हरहुङ्काराशुशुक्षणिक्षपितप्प्रतीककुसुमाशुगजीवातुरमणीयरमणीकटाक्षविक्षेपवारिवाहप्प्रमुदिततरुणजनमनश्शिखावलापारे, अपारसौरभ्भ्यलुब्भ्यन्मधुकरमुखरसहकाराशोक–पुन्नागसुरभित–परिसरे श्रीमति सेञ्जानगरे गरुडद्ध्वजाऽवताराऽपारसंसार–सागरोत्तारसेतुभूतापघन–श्श्रीघनाराधनाधिगतप्प्राज्ज्यराज्ज्यरक्षाक्षमप्प्रचण्डनिजभुज-दण्ड–कुण्डलितकठि-नकोदण्डनिर्मुक्तनिशितशरनिकर-निर्भिन्नारातिप्प्रतीकोच्छलत्क्षतजाऽऽसवपानोन्मत्तोत्कट–कट–पूतनोत्ताल–वेतालकोलाहलकाहलीकृतसमरधरणीमण्डलमण्डलाधीशोपायनीकृतमत्तवेतण्ड-गण्डस्स्थल–गलन्मदामोदमुदितमधुकर–मधुरझाङ्कारमुखरिताऽऽस्थाननिकेतनाजिर-वलिनारायण-सूर्यचन्द्रविमुक्तोत्तपमान-राजभतार–सरस्स्वतीराजकण्ठाभरण–तन्तिकारराज–प्प्रथितनारद–परमभट्टारक–महाराजाधिराज–राजपरमेश्श्वर–राजतारातरणि- श्श्रीमत्पृथ्वीमल्ल–देवाः सान्तःपुरपरिवारा विजयिनः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१५. बालसरस्वतिसुमतिः (१४१४ वै.)

बालसरस्वतिसुमतिरिति प्रशस्तिकारत्वेन यमलपर्वतप्रान्तराज-पृथ्वीमल्लाधिरोपितदुर्लङ्घ्यनगरस्थकोटिस्तम्भे समुल्लिखितोऽयम् प्रशस्ति-ग्रन्थकारः पृथ्वीमल्लमाश्रितो दुल्लुप्रान्तनिवासी कश् चन कविः प्रतीयते। एतस्य रचनायाङ काव्यसौष्ठवन् तु दुर्लभमस्ति । तथापि "**धनानि दत्ताऽर्थिभ्यो धर्मकर्माणि कुर्वता। पृथ्वीमल्लेन भूभर्त्रा तिष्यः कृतयुगीकृतः**"इत्यत्र भणितिभङ्गी मनोहारिण्येव दृश्यते। कोटिस्तम्भलेखोऽयमितिहासप्रकाशे मुद्रितोऽस्ति। पृथ्वीमल्लस्यौदार्येणाऽत्र कवेः, लेखकस्य जयसिंहस्य, शिल्पिनश् शिवराजस्य चोल्लेखः कृतोऽवगम्यते ।

१६. धर्मगुप्तः (१४२७ वै.)

राजगुरु–विद्यार्णवापराभिधान–रामदास–पुत्रो धर्मगुप्तो जसकीर्तिरामस्य प्रेरणया अभिनवपुरप्रतिष्ठामहोत्सवप्रसङ्गे नानादिग्देशागतानां सभ्यानाम् पुरस्तादभिनयाय १४२७ तमे वैक्रमेऽब्दे रामाङ्कनाटिकां रचयामास किल। एषा नाटिका नेपालदेश एव मुद्रितोपलभ्यते । अस्यान् चत्वारोऽङ्कास् सन्ति। विषयश् चाऽस्या रामराज्याभिषेकपर्यन्तो रामायणविषय एव। नाटिकालक्षणन् तु नाट्यशास्त्रीयमस्यान् नाटिकायान् न सम्यग् घटत इति तद्विवेचकाः । रामाभिषेकनाटकम्, रामायणनाटकञ् चेत्यन्यौ द्वौ ग्रन्थावपि धर्मगुप्तकृतौ नैपालराष्ट्रियाभिलेखालये काष्ठमण्डपनगरस्थे सङ्गृहीतौ दृश्येते । किन्तु तावपि रामाङ्कनाटिकया तुल्यौ क्वचित्क्वचिदेव अल्पेन चैव भेदेन युक्तौ स्त इति तत्परीक्षकाः।

१७. धर्मराजो ज्योतिषी (१४२७ वै.)

उदुम्बरपुरीं श्वेतसरित्प्रदेशस्थामधिवसन्तम् अभयमल्लं समाश्रितोऽभयमल्लताम्रपत्राभिलेखस्य रचयिता धर्मराजो ज्योतिषी संस्कृत–वाक्यरचनानिपुणः कोऽपि कविर् वर्तते । तस्येयमभिलेखरूपा रचना इतिहासप्रकाशे प्रकाशिता वर्तते । तद्रचनाचातुरीपरिचयायाऽधस्तात् तदंश उद्ध्रियते–

ओं स्वस्ति। अविकलभुवनभरोद्वहन धैर्य-प्राचुर्य–कीर्तिकदम्बेनेवाऽशेषकवलितकलेवरस्य नीहारगौरस्याऽनन्तस्येवाऽपरवं वपुरुद्वहतस् तुहिनगिरेर् नितम्बे वर्तमानामभिगलितदुकूलशङ्कामिवोद्वहन्त्या श्वेतसरिता

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समलङ्कृतपरिसरप्रदेशामुदुम्बरपुरीमधिवसन्नतुलभुजबलविजितरिपुवलकामिनीजननयननिर्गतवारिपूरसुदूर-समुत्सारित–मत्सरिक्षितिपतिप्रतापानलः प्रचण्डभुजदण्डकुण्डलितकोदण्डखण्डनिर्गच्छच्छरनिकरप्रवाहजर्ज्जरीकृतारिभूधराऽध्वर-संहरण-बालगोपालः काम्बोजवानायुजवाल्हीकपारसीकाद्युद्गतार्वरत्न–सङ्घसाहर(?)–समुद्रः शवल(?)–सामन्तमण्डलीमौलिमण्डितचरणसरोजस् सपरिवारश् श्रीमानभयमल्लश् चिरन् जयतु ।

१८. मणिकः (१४३४ वै.)

नाट्यवेदविशारद–राजवर्धन-सूनुर् मणिकोऽयन् नेपालराज-स्थितिमल्लमाश्रितः कश् चन कविः प्रतीयते । अनेन १४३४ तमे वैक्रमेऽब्दे स्थितिमल्लज्येष्ठ-पुत्रस्य धर्ममल्लस्य व्रतबन्धोत्सवस्य प्रसङ्गेऽभिनयाय [अभिनव-]राघवानन्दन् नाम नाटकं रचितम्, धर्ममल्लस्यैव विवाहोत्सवस्य प्रसङ्गेऽभिनयाय च भैरवानन्दन् नाम नाटकं रचितन् दृश्यते इत्यैतिहासिका आहुः । तत्र द्वितीयन् नाटकं षष्ठादङ्कात् परङ खण्डितन् नैपालराष्ट्रियाभिलेखालये सङ्गृहीतम् प्राप्यते । पञ्जीसङ्ख्या प्र. १०७८ (ता.) । एतन् नाटकमिदानीम् मुद्रितञ् चोपलभ्यते ।

१९. विद्यानन्दनाथः

नेपालराज-स्थितिमल्ल–शासनकाले (१४३७–१४५२ वै.) विद्यानन्दनाथेन ज्ञानदीपविमर्शिनी नाम ग्रन्थो विरचितोऽवगम्यते । स च ग्रन्थो नैपालराष्ट्रियाभिलेखालये सुरक्षितो वर्तते । पञ्जीसङ्ख्या प्र. १२६१ (ता.), १५५९ (ता.) ।

२०. राजा यक्षमल्लः (शासनकालः १४८५-१५३९ वै.)

ज्योतिर्मल्लपुत्रो नेपालेश्वरो यक्षमल्लः [आर्यतारा-]स्रग्धरास्तोत्रन् नाम स्तव-काव्यं रचयामास किल । अस्य हस्तलेखो नैपाल-राष्ट्रियाभिलेखालये सङ्गृहीतो वर्तते । पञ्जीसङ्ख्या– द्वि. २३६ [सु. र.]; [सटीकम्] तृ. ६०४; च. ३ (च. ७०?) ।

२१. गयपतिः

यक्षमल्लशासनकाले (१४८५–१५३९ वै.) वर्तमानो नैपाल–ललित-पुरनिवासी तेजोवर्धनकुलजस् तेजरामपौत्रः पञ्चाग्निसेविनो वेदज्ञस्याऽ-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्निचितस् तेजहर्षस्य पुत्रो रुद्रदास-पाण्डुकयोरनुजो गयपतिः क्षत्त्रियान्वय-चूडामणेर् यक्षमल्लदेवभूपतेः कुमारस्य रायमल्ल-देवस्य कनकतुलापुरुष-महादानयज्ञोत्सवस्य प्रसङ्गे प्रयोक्तुम् चतुरङ्क-महाभारतम् नाम नाटकं रचयामास । तत्पुस्तकम् नैपालराष्ट्रियाभिलेखालये सङ्गृहीतम् दृश्यते । पञ्जीसङ्ख्या प्र. ४४९ । अतश् चतुरङ्कमहाभारतनाटककारो मणिनाग-राज इति टीकारामशर्मणः प्रतिपादनम् त्रुटिपूर्णम् दृश्यते । तत्र "तेजो-वर्धनवंशपङ्कज-रविश् श्रीतेजरामात्मजः पञ्चाग्न्यर्चन-वेदशास्त्र-विदितश् श्रीतेजहर्षोऽग्निचित् । पुत्रस् तस्य च रुद्रदास इति यस् तस्याऽनुजःपाण्डु-कस् तस्यैवाऽनुज एव यो गयपतिस् संराजतेऽसौ सुधीः ।। तेनेदं रचितम्" इति ग्रन्थकारोक्तिर् द्रष्टव्या । एतद्विषये पूर्णिमायाष् षट्त्रिंशत्तमेऽङ्केऽपि सामग्री उपलभ्यते ।

२२. मुरारि-मिश्रः

नैपाल-मोरङमण्डलनिवासी मुरारिर् मिश्रश्रष् षोडश्श्याश् शताब्दयाः पूर्वेऽर्धे शुभकर्मनिर्णयाख्यम् धर्मशास्त्र(निबन्ध)ग्रन्थं रचयामासेति नेपाल-परिचयग्रन्थे रामकुमारः पांडेः कथयति । अधिकवं विवरणम् तेन नैव दत्तम् । नैपालराष्ट्रियाभिलेखालयस्स्य मुद्रिते सङ्क्षिप्ते सूचीपत्त्रे तु स ग्रन्थो नैवो-ल्लिखितोऽस्ति ।

२३. शुभराजश् शूद्रः

'नैपाल-वैणापुर्यां (भक्तपुरे ?) रायमल्ल-शासन-काले (१५३८-१५५३ वै.) वर्तमानः स्ववर्णगौरवमाकलय्य **"अस्तिशूद्रान्वये जातोऽ-भयराजकवीश्वरः। तत्पुत्त्रश् शुभराजोऽसौ तेनेदं रचितं शुभम्"** इति वाक्येनाऽऽत्मानं शूद्रकुलजमुद्घोषयन् शुभराजः खलु पाण्डवविजय-नाटकम्, रूपमञ्जरीपरिणयनाटकम् च रचयामास । तयोर् ग्रन्थयोर् हस्तलिखितपुस्तके राष्ट्रियाभिखालये सङ्गृहीते दृश्येते । पञ्जीसङ्ख्या प्र. ६९४; च. ४८ । पूर्णिमायाष् षट्त्रिंशत्तमेऽङ्केऽप्ययं विषय उल्लिखितोऽस्ति ।

२४. बलभद्रो ज्योतिर्विद् (१५५२ वै.-?)

नैपाल-यमलपर्वतमण्डलनिवासी कमलाकरप्रनप्ता हरिपालनप्ता वसन्तपुत्त्रो कौशिकान्वयजन्मा बलभद्रो ज्योतिर्वित् खलु शररसमनुमित-शाके (१४६५+१३५=१६०० वै.) चैत्त्रे शुक्लेतरद्द्वितीयायाङ् गुरुवासरे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भास्स्वत्या बालावबोधिनीण् टीकां हर्षकरां (?) रचयित्वा पूर्णाञ्चकार किल । तस्स्याष् टीकायास् समाप्तौ "श्रीमहाराजाधिराजश्रीमान-साहि-भुज्ज्यमानराज्ज्ये श्रीमज्जुमिलादेशे···सञ्ज्ञके नगरे कौशिकान्वयजन्मा बलभद्द्रनामा ज्योतिर्विद् बालावबोधिनीमिमाण् टीकाङ्कृतवान्" इत्युल्लिखितमिति नेपाल-राष्ट्रियपुस्तकालयप्रकाशिते ज्योतिषग्रन्थसूचीपत्त्रे द्वितीये खण्डे दृश्श्यते । एषा टीका वाराणस्स्यादिषु भारतप्प्रदेशेष्ष्वपि प्रतिष्ठाम् प्रापेत्त्यवगम्म्यते । पूर्णिमाया: एकान्नत्रिंशेऽङ्केऽप्यवँ विषय उल्लिखितो दृश्श्यते ।

२५. महेशष् ठक्कुरः (१६१३ वै.)

जनकपुरनिवासित्त्वेन सम्भाव्व्यमानः खण्डबलाकुले जातस् थेघठक्कुराऽपरनामधेयो महेशष् ठक्कुरोऽनेकान् ग्रन्थांश् चकार किल । तत्सम्बन्धे धनुषाक्षेत्त्रे एकस्मिन् शिलालेखे "आसीत् पण्डितमण्डलाग्ग्रगणितो भूमण्डलाऽऽखण्डलो जातः खण्डबलाकुले गिरिसुताभक्तो महेशः कृती । शाके रन्ध्रतुरङ्गमश्श्रुतिमहीसलँ लक्ष्क्षिते हायने वाग्देवीकृपयाऽऽशु येन मिथिलादेशस् समस्तोऽर्जितः" इत्युट्टङ्कितमस्तीति वदन्ति । महीरावणवधनाटकपरिशिष्टे ज्ञानमणिनेपालेनाऽप्यवँ विषय उल्लिखितो दृश्श्यते ।

२६. राजा द्रव्व्यसाहः (शा.का. १६१६–१६२७ वै.)

चित्त्रविलासेन द्रव्व्यसाहिरित्त्युल्लिखितो धरणीधरशर्मलिखित-गोरक्षराजवंशावलौ दर्वैनामेत्त्युल्लिखितः कवितानिकषोपलकारेण लक्ष्मणकविना दर्भवर्मेत्त्युट्टङ्कितो गोर्खाराज्ज्यस्स्य प्रथमो राजेति प्रसिद्धस् सम्प्रति द्रव्व्यसाह इति उच्च्यमानोऽयन् जनश् चमत्कारमञ्जरीञ् चकार किल । तस्स्याश् चमत्कारमञ्जर्यां राज्ज्याभिषेकविधाननामकष् षष्ठः प्रकाश इत्त्युच्च्यमानो ग्रन्थो नेपालदेश एव मुद्द्रितः सम्प्रत्त्युपलब्भ्यते । 'चमत्कारयोगरहस्स्यम्' इति ग्रन्थोऽपि द्रव्व्यसाहकृतित्त्वेन केनचिदुल्लिखितो दृश्श्यते; तत्परिचयतदुपलब्धिस्स्थानादिकन् तु तेन किमप्प्युल्लिखितन् न दृश्श्यते ।

२७. चित्त्रविलासः

रामसाहिराज्ज्यकाले (१६६३–१६९० वै.) वर्तमानोऽयङ्कवी रामसाहिप्प्रेरणया राजवंशावलीञ् चकार । इयं राजवंशावली इतिहासप्प्रकाशादिषु मुद्द्रितोपलब्भ्यते । अस्स्यावँ वंशावल्यौ केवलं सप्तैव पद्द्यानि सन्ति । अस्स्यावँ वंशावली रामसाहिपूर्वजानामुल्लेखोऽस्ति । अस्स्याः प्रथमम् पद्द्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"जगत्कर्ता विजयते करुणावरुणालयः। राजरूपेण रमते यः प्रजाऽनुग्रहेच्छया" इति, अन्तिमम् पद्यम् च" कृत्वा चित्रविलासेन कारिता रामसाहिना। राजवंशावली भूयादभितो वृद्धिगामिनी' इति वर्तते।

२८. रामोपाद्ध्याय:

अस्मत् पूर्वश् चतुर्दशोऽस्मन्मातृवंशजस् त्रितुङ्गाचलमण्डलान्तर्गतमानुङ्ग्रामनिवासी त्रितुङ्गाचलमण्डलराजस्य अहवँ वीरसेनस्य शासनस्य काले (१६२८–१६८७ वै.) वर्तमानत्त्वेन सम्भावितस् सत्यधरसूनू रामोपाद्ध्यायः खँदालो नेपालस्थकान्यकुब्जब्राह्मणेषु प्रचलिता रामुपद्धतय इति प्रसिद्धा अग्निस्थापना-ग्रहशान्ति-चूडोपनयन-विवाहा–ऽन्त्यपद्धतीश् श्राद्धपद्धतीश् च चकार किल। एतस्य विषयस्योल्लेखः पूर्वराजगुरुजुननाथपण्डितपुत्त्रप्रयागराजपण्डितेन संस्कृतसंस्कृतेर् द्वितीयेऽङ्के २०३१ तमे वैक्रमेऽब्दे प्रकाशिते चतुर्दशे पृष्ठे कृतोऽस्ति। बालकृष्णाचार्येण वाराणस्याम् मुद्रापितायामन्त्यपद्धतौ नवमे पृष्ठे "सत्यधरतनूजेन रामोपाद्ध्यायसूरिणा। नत्वा विघ्नेश्वरन् देवङ् क्रियते चाऽन्त्यपद्धतिः" इति श्लोको मुद्रितोऽपि दृश्यते।

२९. राजा जगज्ज्योतिर्मल्ल: (शा.का. १६७४-१६८९वै.)

नैपाल-भक्तपुरराजो जगज्ज्योतिर्मल्लश् श्लोकसारसङ्ग्रहः (नीतिश्लोकसङ्ग्रहः), सङ्गीतचिन्तामणिः, सङ्गीतसर्वस्वम्, मृदङ्गोत्पत्तिः, प्रभातकृत्यविधानपद्धतिः, स्तोत्रसङ्ग्रहः इति ग्रन्थान् प्रणिनाय किल। इमे ग्रन्था नैपालराष्ट्रियाभिलेखालये सङ्गृहीता दृश्यन्ते। हरगौरीविवाह-कुञ्जविहार-मुदितकुवलयाश्व–कीचकवधनृत्यादि–रूपकग्रन्था अपि जगज्ज्योतिर्मल्लेन रचिता उच्यन्ते। किन्तु ते प्रायेण मैथिलभाषामया गीतिनृत्यप्रधाना ग्रन्थाः, न तु भास–कालिदास–शूद्रक–भवभूति–श्रीहर्ष-राजशेखर––मुरारिमिश्र-विशाखदत्त-भट्टनारायण–जयदेवादिकृतनाट्यग्रन्थसदृशा ग्रन्था इति चाऽवगम्यते। जगज्ज्योतिर्मल्लेन कृतेत्युच्यमाना महासामन्त-जयदत्त-रचितस्याऽश्वशास्त्रग्रन्थस्याऽश्ववैद्यकनामकस्य संस्कृतटीका १६७५ तमे वैक्रमेऽब्दे लिखिता पूर्णा १८०० ग्रन्थातिमिका चोपलभ्यते नैपालराष्ट्रियाभिलेखालये। पञ्जीसङ्ख्या प्र. ३४१।

३०. वंशमणिः

जगज्ज्योतिर्मल्लशासनकाले (१६७४–१६८९ वै.) वर्तमानो जनक-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनपदजो भारद्द्वाजकुलजन्मा रामचन्द्रशर्मण: पुत्त्रो वंशमणि: कृष्णचरित्त्र-काव्यम्, हरिकेलिकाव्यम्, बुद्धिवलक्रीडाप्रतिपादिकाम् चतुरङ्गतरङ्गिणीम्, सङ्गीतभास्कराख्यां सङ्गीतचन्द्रटीकाञ् च चकार किल। तत्त्र कृष्णचरित्त्रकाव्यन् त्वपूर्णमेवोपलभ्यते । वंशमणि: प्रतापमल्लसंरक्षणे स्थित्त्वा प्रतापमल्लकृततुलापुरुषदानमहोत्सवसमयेऽभिनयाय गीतदिगम्बरन् नाम रूपकमपि प्प्रणिनाय किल। अयङ्ग ग्रन्थ: कालिदासादिप्प्रणीतसंस्कृतरूपक-सदृशो न, किन्तु प्राचीनहैन्दवभाषामयो गीतिनृत्यप्प्रधानो रूपकग्ग्रन्थ इति प्प्रतीयते । एते ग्रन्था नैपालराष्ट्रियाभिलेखालये वर्तन्ते ।

३१. राजा लक्ष्मीनरसिंहः
(शा. का. १६७५–१७३१ वै.)

नैपालकान्तिपुरराजो लक्ष्मीनरसिंह: पुष्पचिन्तामणिलँ लघुन् धर्म-शास्त्त्रनिबन्धग्रन्थञ् चकार किल । किन्तु ग्रन्थकारनामविषये ग्रन्थे प्रमाणङ्किमपि नोपलभ्यते । नैपालराष्ट्रियाभिलेखालयस्थे एकस्मिन् नेवरलिपि-लिखितपुस्तके (पञ्जीसङ्ख्या–प्र. ३६२) अन्ते **"गते शरदि नेपाले चन्द्र-नागाब्धिसयँ.युते (७८१)। द्वादश्श्याम् मार्गकृष्णेऽमुम् बुधो विश्श्वे-श्श्वरोऽलिखित्"** इत्युल्लिखितन् दृश्श्यते इति पुष्पचिन्तामणिसम्पादक-श्रीजयमन्तमिश्श्रमहाभाग: प्रतिपादयति । तत्त्र विश्श्वेश्वरो ग्रन्थकारत्त्वेन वा लिपिकरत्त्वेन वोल्लिखित इति बुधा विचारयन्तु । मुद्द्रितश् चाऽयङ्ग ग्रन्थ: ।

३२. काशिनाथः (१६७५ वै.)

काशिनाथ: कविर् यदुवंशमहाकाव्यं रचयामास किल । एतस्स्य महाकाव्यस्स्य १६७५ तमे वैक्रमेऽब्दे लिखितम् पुस्तकन् नैपालराष्ट्रियाभि-लेखालये सङ्गृहीतन् दृश्श्यते । पञ्जीसङ्ख्या– प्र. १४२७; तृ. ३३८ ।

३३. रामभद्द्रशर्मा (कुनुशर्मा ?)

नैपाल–ललितपुरराज-सिद्धिनरसिंहमल्ल–श्रीनिवासमल्लसमये (१६७५–१७४१ वै.) वर्तमानो रामभद्द्रशर्मा खलु ललितपुरवर्णनपराङ्कीर्तिपताकाञ् चकार किल । मुद्द्रिते कीर्तिपताकाख्ये ग्रन्थे तु कर्तुर्नाम कुनु-शर्मेति वर्तते । सा च कीर्तिपताका नरहरिनाथकृतभाषानुवादसहिता मुद्द्रि-तोपलभ्यते । अनेन रामभद्द्रेण हरिश्चन्द्रविजयनाटकम् (हरिश्चन्द्रनृत्यम्), गोपीचन्द्रनाटकञ् च कृतमुपलभ्यते । ललितकुवलयाश्श्वमदालसानाटकञ् चाऽ-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेन प्रतिसंस्कृतम् प्रतीयते । एतेषाङ ग्रन्थानां हस्तलिखितपुस्तकानि नेपाल-राष्ट्रियाभिलेखालये वर्तन्ते । पञ्जीसङ्ख्या– प्र. १४७३, १६८२, १७०८; १७२२; प्र. १०७७ (ता.) ।

३४. राजा प्रतापमल्लः (शा. का. १६६८-१७३१ वै.)

विद्वान् धार्मिको विलासी कवी राजेत्युच्च्यमानो नेपाल–कान्तिपुर-राजः प्रतापमल्लो बहूनाङ कवित्वपूर्णानां शिलालेखानां स्तोत्राणाञ्च रच-यिताऽवगम्यते । अनेन रचितास् स्तोत्ररूपाश् शिलाभिलेखास् संस्कृत-सन्देशादिषु मुद्रिताः प्राप्यन्ते । अस्य देव्यपराधक्षमापनस्स्तोत्रानुकारि सर्वापराधक्षमा(पन)स्स्तोत्रन् नेपालराष्ट्रियाभिलेखालये सङ्गृहीतम् प्राप्यते । पञ्जीसङ्ख्या–तृ. ३२(द्र.प्र. ८८२)। अस्य स्तोत्रग्रन्थेषु भुजङ्ग-दशकम्, वृष्टिचिन्तामणिः, नृत्येश्वरदशकम्, नारायणस्तोत्रम्, महेशा-ष्टकम्, वज्रयोगिन्याः कामदं स्तोत्रम्, शिवरूपभीमसेनस्स्तोत्रञ् च गण्य-न्ते । प्रतापमल्लस्य पत्न्या **लालमत्या** रचितावपि द्वौ श्लोकौ काष्ठमण्डपा-ऽन्तर्गत-ठमेलटोल्लकस्य-विक्रमशीलविहारे सुरक्षिते शतसाहस्रिकायाः प्रज्ञा-पारमितायाः पुस्तकस्य परिशेषे उल्लिखितौ विद्येते इति तदनुशीलका वदन्ति ।

३५. मान्धातृसिंहः

प्रतापमल्लसङ्गृहीतापुत्रत्वेन प्रधानमन्त्रितुल्यशक्तिकत्वेन चोच्च्य-मानो मान्धातृसिंहो गीतकेशवन् नाम वाङ्गकवि-जयदेवरचितगीतगोविन्दाऽ-नुकारि काव्यं रचयामास किल । एतस्य ग्रन्थस्य १७३४ तमे वैक्रमे वर्षे लिखितः पूर्णो हस्तलेखो नेपालराष्ट्रियाभिलेखालये वर्तते । पञ्जीसङ्ख्या–तृ. ९८ । मान्धातृसिंहेन कर्मविपाकपञ्जिकाऽपि कृतेति केचिदाहुः ।

३६. वीरेश्वरोऽर्ज्यालः(१७३७ वै.)

नेपाल–गोर्खामण्डलनिवासी पृथ्वीपतिसाहम् मौलरूपेणाऽऽश्रितो नारा-यणदासाऽर्ज्यालपुत्रोद्धवदासवंशजो जयभद्रप्रपौत्रः परशुरामपौत्र इन्द्रमणि-तृतीयपुत्रो वीरेश्वरोऽर्ज्यालः पृथ्वीपतिप्रतिमाधारस्तम्भोत्कीर्णाञ्चतुश्श्लो-काम् प्रशस्तिम् १७३७तमे वैक्रमेऽब्दे चकार । तस्याम् प्रशस्तौ "**गोर्खाधीश-महाराजपृथ्वीपतिनृपाज्ञया । वीरेश्वरेण विदुषा प्रशस्ती रचिता शुभा**" इत्यन्तिमश् श्लोको वर्तत इति तदनुसन्धातार आहुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३७. नवमीसिंहो भण्डेलः (राजभण्डारी)

नैपाल–कान्तिपुरराज-भूपालेन्द्रमल्ल–शासनकाले (१७४४–१७५७वैः) कान्तिपुरे वर्तमानः शिवकृष्ण–पौत्रो मानसिंहपुत्रस् सुमङ्गलाकुक्षिजो नवमीसिंहो भण्डेलः खलु तन्त्रचिन्तामणिः, पुष्परत्नाकरः, चण्डीभक्तिविनोदिनी, कुलमुक्तिकल्लोलिनी इति शाक्ततन्त्राचारसम्बद्धान् ग्रन्थान् रचयामास किल । तेषु ग्रन्थेषु मद्ध्ये चण्डीभक्तिविनोदिनी तद्वंशधरैर् मुद्रापयित्वा प्रकाशितोपलभ्यते । पुष्परत्नाकरोऽपीदानीम् मुद्रितोऽस्ति । अन्यौ ग्रन्थौ नैपालराष्ट्रियाभिलेखालये सङ्गृहीतौ दृश्येते । पञ्जीसङ्ख्या –प्र. ८, ८७६; द्वि. ३७५; प्र. १८२ ।

३८. राजा भूपतीन्द्रमल्लः (१७५३–१७७९ वै.)

नैपाल-भक्तपुरराजो भूपतीन्द्रमल्लः खलु देवप्रतिष्ठानित्यपूजाविद्ध्यादिकान् ग्रन्थान् प्रणिनाय किल । एतेन लोकभाषया रचितस्स्य महाभारतनाटकस्स्य १७५९ तमे वैक्रमेऽब्दे लिखितम् पुस्तकम्, विद्याविलापनाटकस्स्य १७७७ तमे वैक्रमेऽब्दे लिखितम् पुस्तकञ् च नैपालराष्ट्रियाभिलेखालये सङ्गृहीतन् दृश्यते (पञ्जीसङ्ख्या–प्र. ३६२; च. ६३६) । मुद्रितन् चैतन् नाटकद्द्वयमिति सूर्यविक्रमो वदति (ने. उ. म. इ. पृ. सङ. २३४)। माधवाऽनलनाटकम्, रुक्मिणीपरिणयनाटकञ् चेति अन्यदपि रूपकद्द्वयम् भूपतीन्द्रमल्लेन कृतम् प्रबोधचन्द्रेणोल्लिखितमस्तीति च स एवाऽऽह । अन्यान्यपि उषाहरणनाटकादीनि बहूनि रूपकाणि भूपतीन्द्रमल्लेन कृतानीति वदन्ति । किन्तु तत्समाननामकानि बहूनि रूपकाणि रणजिन्मल्लेन कृतानीत्यप्युल्लेखङ् कुर्वते । एतानि लोकभाषागीतिमयानि नाट्ट्यानि भासकालिदासादिरचितस्वप्नवासवदत्ताऽभिज्ञानशाकुन्तलादिरूपकसदृशानि रूपकाणि तु न सन्तीति नैपाल–संस्कृतग्रन्थकार–परिचयप्रदाने तेषामुल्लेखोऽकर्तुं शक्क्यः प्रतीयते ।

३९. गोपालः (१७८३ वै.)

बलिसुतोऽयङ् गोपालः करटिकौतुकङ् करिकौतुकवं वा नाम गजशास्त्रग्रन्थं रचयामास किल । तेन स्वग्रन्थसमाप्तावेवमुल्लेखः कृतो दृश्यते-"अब्दे नागयुगाङ्गशीतकिरणे तैषे तिथौ पक्षतौ, कृष्णायामिनवासरे मृगशिरस्साध्योल्लसन्कौलवे। सम्पूर्णङ् कृतवानयङ् गजहितायाऽऽज्ज्ञामवाप्याऽवनीपालादेः करिकौतुकम् बलिसुतो गोपालनामाऽवनौ ॥ न स्स्थायि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चलवं वर्ष्म तनुजानामिह विक्षतौ । चिरस्स्थाय्यवक्षरन् ज्ञात्वाऽकरोत् करटिकौतुकम्।। निन्दन्तु दुर्जनास् सर्वे स्तुतिङ् कुर्वन्तु सज्जनाः। सममेवाञ्जलिन् तेभ्यो बद्ध्वाऽकारि द्विपावक्षरम्" इति । अनेनोल्लिखितोऽब्दश् शकाग्ताब्द इत्यवगम्यत इत्यनेन १७८३ तमे वैक्रमेऽब्देऽयङ्ग्रन्थः पूर्णः कृतो मन्तव्यः ।

४०. घनश्यामः

जगज्ज्योतिर्मल्लदौहित्रानन्तसिंह–नियोगि-घनश्याम–कृता हस्तमुक्तावलीसारसमुद्धृतिकाख्या हस्तमुक्तावली–टीका नैपाल राष्ट्रियाभिलेखालयेन मुद्रापिताऽस्ति ।

४१. राजा जगज्जयमल्लः (शा.का. १७७९–१७९१)

नैपाल–कान्तिपुरराजो जगज्जयमल्लः पुराणमेव प्रबोधचन्द्रोदयनाटकमभिनयाय सङ्क्षिप्तम् प्रतिसंस्कृतञ् च कृत्वा अभिनवप्रबोधचन्द्रोदयन् नाटकम् चकार किल । पशुपतिभट्टारकयात्राप्रसङ्गेन समवेतानान् दिगन्तवासिनावँ वेदान्तिनान् तपस्स्विनाञ् च विबुधानां समाजेऽभिनयायैवेदं संस्कृतनाटकं रचितमिति तदीयसूत्रधारवाक्यादवगम्यते । एतस्स्य नाटकस्स्य हस्तलिखितम् पुस्तकन् नैपालराष्ट्रियाभिलेखालये सङ्गृहीतन् दृश्यते । पञ्जीसङ्ख्या प्र. ११५४।

४२. राजा रणजिन्मल्लः (शा.का.१७७९–१८२६ वै.)

नैपाल–भक्तपुरराजो रणजिन्मल्लो ग्रहगणितविषयाङ् गणितमञ्जरीम्, सङ्गीतशास्त्रविषयं सङ्गीतचूडामणिञ् च प्रणिनाय किल । २०२० तमे वैक्रमेऽब्दे मुद्रिते सङ्क्षिप्ते सूचीपत्त्रे गणितमञ्जर्या उल्लेखो नोपलभ्यते, तथापि देवीप्रसादलम्सालसम्पादिते ज्योतिषविषयक–वृहत्सूचीपत्त्रे तूल्लेखः प्राप्यते । एतेन ग्रन्थेन ग्रहगणितज्ज्ञानविषये कियत् सौविद्ध्यवँ वर्धितमिति तदभिज्ज्ञा एव निरूपयितुम् प्रभवन्ति । सङ्गीतचूडामणिस् तु उक्ते सङ्क्षिप्ते सूचीपत्त्रेऽपि उल्लिखितोऽस्ति । पञ्जीसङ्ख्या–प्र. ३९६–२ । एतस्स्य ग्रन्थस्स्योपयोगिताविशेषञ् च सङ्गीतज्ज्ञा एव निर्धारयितु शक्नुवन्ति । रणजिन्मल्लेन रचितेषु रूपकेषु रामचरित्त्रम्, माधवानलकामकन्दला च मुद्रिते अपि स्त इति सूर्यविक्रमो वदति (ने. उ. म. इ., पृ. २३५) । रणजिता रचितानि उषाहरणनाटकम्, अन्धकासुरवधोपाख्याननाटकम्, कृष्ण-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चरित्रनाटकम्, मदनचरितनाटकम्, लोका-(कोला ?-)ऽसुरवधोपाख्यान-नाटकम्, त्रिचत्वारिंशदङ्ककं रामायणनाटकञ् चेति षडन्यानि नाटकानि च प्रबोधचन्द्रवागचि-कृतोल्लेखाधारे सूर्यविक्रमेणोल्लिखितानि दृश्यन्ते (ने.उ. म. इ., पृ. २३७-२३८)। अन्यान्यपि इन्द्रविजयनाटक-कृष्णकैलासयात्रो-पाख्याननाटक-खट्ट्वासुरवधोपाख्याननाटक-चन्द्राङ्गदोपाख्याननाटक-मान्धात्रुपाख्याननाटकादीनि उपदशानि रूपकाणि रणजिन्मल्लविरचितत्वे-नोल्लिखितानि दृश्यन्ते। किन्त्विमानि सर्वाण्यपि रूपकाणि प्रायेण लोक-भाषानिबद्धानि लोकमनोरञ्जनमात्रपराणि विलक्षणानि गीतिरूपकाणि प्रतीयन्ते, न तु भासकालिदासादिरचितरूपकसदृशानीति च स्मर्तव्यम्। एषां रूपकाणाम् मद्ध्ये केषाञ् चन पुस्तकानि नैपालराष्ट्रियाभिलेखालये च सङ्गृहीतानि दृश्यन्ते। पञ्जीसङ्ख्या-अन्ध. प्र. ३६५; इन्द्र. प्र. ३६५; उषा. प्र. ३६५; कंसवध. (कृष्णचरित्र.) प्र. १३९२; कृष्णकै. तृ. ११६-२; कृष्णच. प्र. ३६०; कृष्णचरित्रो. प्र. ३६५; कोला. प्र. ३३१, ३६५; खट्ट्वा. प्र. ३६५; चन्द्राङ्गदो. प्र. ३६५; रामा. प्र. ३४५; १४१८, द्वि. ३५९ च ९३९।

४३. नीलकण्ठः

नैपालभक्तपुरराजं रणजिन्मल्लमाश्रितो नीलकण्ठः खलु ग्रहणा-धिकाराख्यं (ग्रहणाधिकारटीकाम्)? चन्द्रग्रहणोदाहरणाख्यं सूर्यग्रहणाधिऽ-कारोदाहरणाख्यञ्च ज्योतिषग्रन्थं रचयामास किल। स जैमिनिसूत्रटीकाञ् च ज्योतिषविषयाञ् चकार। नीलकण्ठाख्येन केन चिद् रचितौ ज्योतिषकौमुदी समाविवेकश् चेति द्वौ ग्रन्थावपि नैपालराष्ट्रियाभिलेखालयसूचीपत्रे दृश्येते।

४४. गणेशः

नैपाल-भक्तपुरराज-रणजिन्मल्लसमये (१७७९-१८२६ वै.) वर्त-मानो गणेशो नाम कश्चन कवी रामचरित्रन् नाम काव्यं रचयामास किल। रामचरितन् नाम एकम् पुस्तकन् नैपालराष्ट्रियाभिलेखालये स्थितन् दृश्यते। पञ्जीसङ्ख्या-प्र. ३३०। तत् परीक्षणीयवं वर्तते।

४५. प्रेमनिधिपन्तः

कूर्माचलनिवासिन उमापतिपन्तस्य पुत्रश् शालग्रामशिलाऽऽकरकृष्णा-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तटस्स्थपर्वतमण्डलराजम् मलैबम्ममाश्रितो भारद्वाजसगोत्रः प्रेमनिधिपन्तः पर्वतमण्डले स्थित्वाऽपि प्रायश्चित्तप्रदीपादीन् कांश्चन ग्रन्थान् प्रणिनाय किल । प्रेमनिधिना शिवताण्डवटीकायाम् मल्लादर्शाख्यायाम् मलैबम्मवंश-वर्णनेन सह स्वपरिचयस्स्य प्रदानामेवलं लिखितमवगम्यते– "**यस्स्योद्द्योतमती सती गुणवती माता पितोमापतिर् नाम प्रेमनिधीति पन्त-कुलभूः कूर्माचलो जन्मभूः । तेनाऽष्टाब्धिषडिन्दुशाकगसितान्त्योर्जाद्ध्यतिथ्यर्कनिट्-काले श्रीशिवताण्डवस्स्य विहितं सट्टिप्पणं सत्वरम्**" इति । एतेनैष ग्रन्थः १६४८ तमे शकान्ताब्दे (१७८३ तमे वैक्रमाब्दे) रचित इति स्पष्टतया ज्ञायते । प्रेमनिधये मलयवर्मणा काश्यां शोभनं गृहमपि दत्तमभूदित्यपि "**यन्त्रस्स्योपासकोऽयं क्षितिपतितिलकश् श्रीमलैबम्मनामा काश्याञ्च गेहं सुसौधन् निजकुलचरितानल्पसन्दर्शकस्स्य । मल्लादर्शस्स्य कर्त्रे स्वगुरुकरुणया प्रेमनिधध्याह्वयाय श्रद्धाभिर् यो ददाति प्रणिभवतुतमामेष पूर्णाखिलार्थः**" इति प्रेम-निधिलेखाद् ज्ञायते । प्रेमनिधिः १७८० तमे वैक्रमाब्दे प्रायश्चित्तप्रदीपन् चकारेति केचित् । गोपीनाथकविराजस्तु १६७५ तमे शकान्ताब्दे (१८१० तमे वैक्रमाब्दे) प्रेमनिधिः प्रायश्चित्तप्रदीपन् चकारेति वदति । प्रायश्चित्तप्रदीपस्स्य केषु चन पुस्तकेषु अद्ध्यायानामन्तेषु तस्स्यतस्स्याऽद्ध्यायस्स्य सारार्थो नैपालीयभाषायामपि दत्तोऽवगम्यते । प्रेमनिधिकृताश् च गोपीनाथाद्युल्लिखिता ग्रन्था इमे – कार्तवीर्यसपर्या, घृतदानपद्धतिः (घृतदानरत्नं वा); नित्त्यप्रयोगरत्नाकरः, धर्मशास्त्रविषयकः पृथ्वीप्रेमोदयः, प्रयोगरत्नम्; प्रायश्चित्तप्रदीपः; भक्तितरङ्गिणी, मल्लादर्शाख्या शिवताण्डवटीका, शब्दार्थचिन्तामणिर् नाम शारदातिलकव्याख्या चेति । 'मल्लादर्शे प्रेमनिधिना तन्त्रप्रामाण्यविषये भट्टोजिदीक्षितमतङ् खण्डयित्त्वा स्वमतयं युक्तिभिस् स्थापितमस्ति, तन्त्राणां श्रुतिमूलकत्त्वमस्स्वीकृत्त्य स्वतःप्रामाण्यमङ्गीकृतमस्ति' इति च गोपीनाथः प्रतिपादयति । "**तन्त्रराजस्स्य सुदर्शनाख्या टीका प्रेमनिधिकृतित्त्वेन पण्डितनिकाये प्रसिद्धाऽस्ति, तथापि सा प्रेमनिधितृतीयपत्न्याः प्राणमञ्जर्याः कृतित्त्वेनाऽऽत्मानमाविष्करोति**' इति च 'काशी की सारस्स्वत साधना' इति ग्रन्थे गोपीनाथ आह । नित्त्यप्रयोगरत्नाकर–पृथ्वीप्रेमोदय–प्रयोगरत्न–प्रायश्चित्तप्रदीप–भक्तितरङ्गिणी-मल्लादर्श-शब्दार्थचिन्तामणि-हस्तलिखितपुस्तकानि नैपालराष्ट्रियाऽभिलेखालयेऽपि सङ्गृहीतान्यवगम्यन्ते । पत्रसङ्ख्या– नित्त्य.तृ. ३६०, पृथ्वी.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च.७४०, प्रयो. प्र.१२४७?, प्रायश्. प्र.१७५,च. ११३; भक्ति.तु. २४, मल्ला. च. ७९८, शब्दार्थ. च. १३९, ९४? ।

४९. गौरीश्वरः [पाँडेः]

कूर्माचलाभिजनो नैपालत्रितुङ्गाचलमण्डलराजगुरुर् गोरक्षदेशाधीशनरभूपालसाहमाश्रितः कृष्णपौत्रो लक्ष्मणपुत्रो गौरीश्वरो नवश्लोकम् भुवनेश्वरीस्तवं रचयामास किल । तत्स्तोत्रलेखो राष्ट्रियाभिलेखालये वर्तते । पञ्जीसङ्ख्या प्र.१६११, च.६३०। १८४२ तमे वैक्रमेऽब्दे श्रीघनश्यामेन लिखितङ् ग्रहदीपिकापुस्तकन् नैपालराष्ट्रियपुस्तकालये स्थितमिति तदीयमुद्रितसूचीपत्रे द्वितीयभागे उल्लिखितमस्ति । तत्र ग्रहदीपिकाया रचयिता गौरीश्वर उक्तोऽस्ति । कोऽयङ् गौरीश्वर इति विशेषतोऽन्वेषणीयवँ वर्तते ।

४७. जयमङ्गलसूरिः [पौड्यालः]

नैपालसतहुँमण्डलकान्तर्गतग्याँदिग्ग्रामाभिजनत्वेन कैश्चित् सम्भाव्यमानः, कैश्चित् तु इतिहासविद्भिस् त्रितुङ्गाचलमण्डलान्तर्गतरिसिङ्कोपमण्डला-भिजनत्वेनोच्यमानस् त्रितुङ्गाचलमण्डल-राजगुरुपौड्यालकुलभवःप्रधानमन्त्रिरङ्गनाथपितामहः फलाहारिजोऽग्निहोत्री जयमङ्गलसूरिः पौड्यालः पृथ्वीनारायणस्य युवराजत्वस्य समये वृत्तकल्पलतिकां रचयामास किल । वृत्तकल्पलतिकायाम् प्राकृतपैङ्गलोक्ता विषया अपि समाविष्टा दृश्यन्ते । ते तु अदृष्टप्राकृतपैङ्गलकयोर् वृत्तकल्पलतिकासम्पादकानुवादकयोर् नानावितर्कहेतुताम् प्राप्ता अवगम्यन्ते । सेयवँ वृत्तकल्पलतिका मुद्रिताऽस्ति । अयव् च जयमङ्गलः पौड्यालो वृत्तरत्नमाला–व्याख्याषुष्पिकायालँ, लक्ष्मणेन स्वगुरुत्वेनोल्लिखितो दृश्यते । अयमेव पृथ्वीपत्न्या नरेन्द्रलक्ष्म्या गुरुत्वम् प्राप्ताया गौर्याः पतिरिति इतिहासे प्रसिद्धो देवीगुरुरप्यस्ति ।

४८. राजा त्रिविक्रमसेनः
(शा. का. १७९८–१८२६ वैं.)

नैपाल–त्रितुङ्गाचलमण्डलराजो विद्याधर्मप्रियशासकत्वेनोच्यमानस् त्रिविक्रमसेनो तन्त्रसम्मतम् ब्रह्मविद्याभरणजपविधिन् चकार किल । स च ग्रन्थ इदानीन् नैपालराष्ट्रियाभिलेखालये सुरक्षितो दृश्यते । पञ्जीसङ्ख्या प्र.३२ । तत्राऽन्ते "इति श्रीमन्नारायणकृतावतारपरमकारुणिक-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नागेश्वरानन्दनाथ-चरणद्वन्द्वोपासक-श्रीमत्त्रिविक्रमकृतिः, ब्रह्मविद्योपासकानाम् मध्ये कृतपूर्णाभिषेकाणाम् ब्रह्मविद्याभरण-जपविधिः" इत्युल्लिखितवँ वर्तते। त्रिविक्रमस्यैव प्रेरणया गौतमवंशजेन गङ्गाविष्णुना आचारदीपो नाम धर्मशास्त्रनिबन्धग्रन्थो विरचितो दृश्यते। त्रिविक्रमाज्ञया गङ्गाविष्णुना कृता शारदातिलकप्रतिलिपिरपि नेपालराष्ट्रियाभिलेखालये वर्तते। पञ्जीसङ्ख्या- प्र. ६१। त्रिविक्रमाऽऽज्ञया कुलनिधिना रचिता नित्यकर्मप्रकाशिका च मुद्रितोपलभ्यते।

४९. गङ्गाविष्णुः (१८०९ वै.)

त्रितुङ्गाचलमण्डलराजन् त्रिविक्रमसेनं समाश्रितोऽयङ् गौतमवंशजत्वेनात्मानम् प्रतिपादयन् कूर्माचलाभिजनो रामभद्रपौत्रो जयदेवपुत्रो द्विजो गङ्गाविष्णुस् त्रिविक्रमसेनप्रेरणया आचारदीपकाख्यन् धर्मशास्त्रनिबन्धं रचयामास। अस्मिन् ग्रन्थे योगप्रकरणमप्यस्ति। अस्य ग्रन्थस्याऽन्तेऽनेन सेनराजवंश्यावलिरपि सङ्क्षेपेणोक्ताऽस्ति। तत्र गङ्गाविष्णुना स्वपरिचय एवन् दत्तोऽस्ति-**"विद्वान् गौतमवंशजो द्विजवरश् श्रीरामभद्राऽभिधस् तत्पुत्रो जयदेवनामधरणीदेवोऽभवत् पुण्यवान्। तत्पुत्रोल्पमतिर् निबन्धमकरोदाचारदीपाभिधङ् गङ्गाविष्णुरनेकतन्त्रमवलोक्याऽऽज्ञाधरो भूपतेः॥ यद्यपि ग्रन्थनिर्माणयोग्यमध्ययनन् न मे। तथापि वक्ष्यमतां प्राज्ञैस् साहसोऽयन् नृपाग्रहात्"** इति। १६७४ तमे शकाब्दे (१८०९ तमे वैक्रमेऽब्दे) शिवशर्मभुवनेशाभ्यां लिखितमाचारदीपपुस्तकं सम्प्रति नेपालराष्ट्रियाभिलेखालये सङ्गृहीतन् दृश्यते। पञ्जीसङ्ख्या- प्र. १५००। गङ्गाविष्णुहस्तलिखितो भानुदत्तकृतो रसतरङ्गिणीति अलङ्कारशास्त्रग्रन्थोऽपि नेपालराष्ट्रियाभिलेखालये दृश्यते। पञ्जीसङ्ख्या प्र. १४६६।

५०. कुलनिधिशर्मा

कूर्माचलाभिजनो नेपाल-त्रितुङ्गाचलमण्डलाऽन्तर्गत-चोकग्रामकृत-निवासः किल रामभद्रपौत्रो जयदेवपुत्रः कुलनिधिशर्मा खलु पाल्पाराजस्य द्वितीयमुकुन्दसेनवर्मणः प्रेरणया द्वितीयमुकुन्दसेने प्रशासति सति महादत्तसेने युवराजे विराजमाने पृथ्वीपालसेने नवयुवराजे च जाते सति कर्मकाण्डनिबन्धनन् नाम पद्धतिग्रन्थं रचयामास किल। तदुक्तन् तेनैव-**"श्रीमुकुन्दाज्ञया विद्वत्कुलाग्रनिधिशर्मणा। कृतिरारभ्यते सम्यक् कर्मकाण्ड-**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निबन्धने" इत्यादि । एष ग्रन्थस् सम्प्रति नैपालराष्ट्रियाभिलेखालये सङ्गृहीतो दृश्यते । पञ्जीसङ्ख्या च. ६३०, १०६१, १६६२, १८०६, प. १७१२, १७१४, १८२० । त्रितुङ्गाचलमण्डलराजत्रिविक्रमाज्ञया कुलनिधिना रचिता नित्यकर्मप्रकाशिका तु मुद्रितोपलभ्यते । सूत्रार्थदर्पणाख्या पाणिनीयव्याकरणाऽष्टाध्यायीव्याख्या, सर्वोपकारिणीति भागवतव्याख्या, अमरकोशटीका च कुलनिधिना रचिता इति टीकारामशर्मणोल्लिखितमस्ति ।

५१. टीकारामः

लक्ष्मणकविना कवितानिकषोपले स्वदेशकविषु मध्ये द्वौ टीकारामौ उल्लिखितौ दृश्येते (पृ. ३८,३९) । तत्र कस्य चन टीकारामस्य महाराजकुतूहलम् इति ग्रन्थस् सम्प्रति नैपालराष्ट्रियाभिलेखालये सङ्गृहीतो दृश्यते । काव्यरूपस् स ग्रन्थः खण्डितोऽतिजीर्णादर्शगतत्वेनाऽप्रयोज्यश्च जातोऽवगम्यते । पञ्जीसङ्ख्या प्र. १६०६ ।

५२. लक्ष्मणकविः (१७६५-१८४५ वै. ?)

नैपालत्रितुङ्गाचलमण्डलजातः पश्चात् पृथ्वीनारायणमाश्रित इति कैश् चिदुच्यमानो लक्ष्मणकविः कवितानिकषोपलाख्यङ ग्रन्थम् पृथ्वीनारायणशासनकाले रचयामास किल । कवितानिकषोपले पृथ्वीनारायणकृतकान्तिपुरविजयपर्यन्तो विषयः प्रतिपादितोऽस्ति । विजयवृत्तान्तस्तु कल्पित इवाऽऽभाति । अनेनाऽत्र स्वदेशकवित्वेनोक्तेषु त्रयोविंशतौ कविषु शक्तिवल्लभशर्मा, रामभद्रः, लक्ष्मणश्चेति त्रय एवाऽन्यत्राऽपि उल्लिखिताः प्राप्यन्ते । हरिदत्तशर्मादयोऽन्ये त्वनुल्लिखिता अन्यत्र । टीकारामस्य तु कस्य चन महाराजकुतूहलाख्यो ग्रन्थोऽपि प्राप्यत इति पूर्वमेवाऽवोचाम । लक्ष्मणकविर् ग्रन्थान्ते "**अध्यापनाय परमेश्वरि बालकानाम् मन्निर्मितोऽतिललितोक्तिचमत्कृतार्थः । नेपालजिन्नृपशिरोमणिकीर्तिशाली ग्रन्थोऽयमीक्षणपथवँ विदुषामुपैतु**" इति प्रार्थयते । कवितानिकषोपलोऽयम् मुद्रित उपलभ्यते । लक्ष्मणरचितो दानरत्नाकराख्यो धर्मशास्त्रनिबन्धोऽपि नैपालराष्ट्रियाभिलेखालये सङ्गृहीतः प्राप्यते । पञ्जीसङ्ख्या– प्र. ९८६, १२२४, तृ. ३०६ । नृपपृथ्वीनारायणोद्दिष्टव्रतरत्नमालाव्याख्याऽपि जयमङ्गलसूरि-शिष्य-लक्ष्मणकृतित्वेनोल्लिखितोपलभ्यते । मुद्रिता चेयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५३. राजीवलोचन-पण्डितः

गौरीश्वरात्मजो वाणीविलासपितामहो राजीवलोचनपण्डितः पृथ्वीनारायणस्तुतिपरम् आशीर्वादावलिनामकङ काव्यम् पृथ्वीनारायण-शासनकाले एव रचयामास किल । एतेन रामप्रबन्धनामकं स्तोत्ररूपन् त्रिषष्ट्युत्तरैकशतपद्यात्मकङ काव्यमपि कृतमुपलभ्यत इति वदन्ति ।

५४. राजा पृथ्वीनारायणः (१७७९-१८३१ वै.)

आधुनिक-नैपालीय-राष्ट्रनेमिस्स्थापकत्त्वेनोच्च्यनमानस्य पृथ्वीनारायणस्य कृतित्त्वेन जयमङ्गलसूरिशिष्यलक्ष्मणकृतदिव्यप्रभाख्यटीका-समन्विता नेपालविजयान्तर्गतत्त्वेनोक्ता व्रतरत्नमाला मुद्रिता प्राप्यते । किन्तु तत्र ग्रन्थसमाप्तौ **"इति श्रीश्रीश्रीमन्महाराजाधिराजश्रीश्रीश्रीमत्-पृथ्वीनारायणोद्दिष्टव्रतरत्नमाला समाप्ता"** इति लेखम् पश्यताम् पृथ्वीनारायणचरितञ् च विचारयतावें विवेचकानाम् मनसि इयं रचना पृथ्वीनाराणाश्रितेन केनापि पण्डितेन तदाज्ञया कृतेति विचार उदियादेव । व्याख्याकारोऽयलें लक्ष्मणः कवितानिकषोपलकार एव वाऽन्यो वेति च विवेचनीयमेव दृश्यते ।

५५. ललितावल्लभः

अविज्ञायमानकुलाभिजनकालोऽर्ज्यालत्त्वेन सम्भाव्यमानो ललितावल्लभः कविः पृथ्वीनारायणमाश्रितो भक्तविजयम् पृथ्वीन्द्रवर्णोदयञ्चेति लघु काव्यद्वयम् १८२६ तमे १८२७ तमे च वैक्रमेऽब्दे चकार किल । भक्तविजयकाव्यन् नरहरिनाथकृतव्याख्यया सहितम् मुद्रितम् प्राप्यते । पृथ्वीन्द्रवर्णोदयञ् च पृथक्पुस्तकतया पूर्णतया चाऽमुद्रितमस्ति । तथापि पुस्तकान्तरे टिप्पण्यादिरूपेणाऽस्य भूयानंशो मुद्रितो दृश्यते ।

५६. शक्तिवल्लभो भट्टाचार्योऽर्ज्यालः (१७८१-१८६३ वै.?)

पृथ्वीनारायण-पूजितपादारविन्दक-लक्ष्मीनारायणार्ज्याल-पुत्रश् शक्तिवल्लभोऽर्ज्यालो राज्ञो रणवाहादुरस्य विधेयेन राजकुमारवाहादुरसाहेन कृतन् नेपालराज्ज्यविस्तारमधिकृत्य १८४९ तमे वैक्रमेऽब्दे जयरत्नाकरनाटकं रचयामास किल । तच्च नाटकमितिहासदृष्ट्या महत्त्वपूर्णमपि अभिनेयार्थ-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्यदृष्ट्या नाऽतिमनोहरमस्तीति विवेचका वदन्ति । एतन् नाटकम् मुद्रितम् प्राप्यते । एतेन कृता अन्ये ग्रन्थाश् च हास्यकदम्बनाटकम् (नैपालीयभाषानुवादसहितम्); ललितमाधवनाटकम्; सुधातरङ्गिणीति तन्त्रविषयको ग्रन्थः, इन्द्रद्ध्वजोत्सवः, दानप्रकाशः, पुरश्चरणचातुरी, यथार्थतत्त्वबोधश्चेति तदनुसन्धातृभिरुल्लिखिता दृश्यन्ते ।

५७. राधावल्लभोऽर्ज्यालः (१७८५–१८६६ वै.)

शक्तिवल्लभभ्राता मरणेऽप्यनुगामिनीभिः अयोद्ध्या-सत्यरूपा-वसुमती-कुलवतीन्दुमतीभिः पञ्चभिः पत्नीभिर् युक्तः पशुपतिनाथाभ्यन्तरदक्षिणद्वारस्य रजतमयस्य निर्माणायाऽर्थराशेर् विनियोजकोऽयं राधावल्लभो राजराजेश्वरीकवचम्, उद्धवदूतम्, संस्कृतमञ्जरीञ् च चकार किल । राजराजेश्वरीकवचम् (प्र. २४९१, १५५४), संस्कृतमञ्जरी (प्र. २२०, १३६७, १४६२, तृ. ४८६, च. १०३१) च नैपालराष्ट्रियाभिलेखालय–सूचीपत्त्रे दृश्येते ।

५८. चक्रपाणिः अर्ज्यालः (१७९०–१८४१ वै.)

नैपाल-गोर्खामण्डलनिवासी नारायणदासार्ज्यालपुत्त्रोद्धवदासवंशजो विद्यापतिपौत्त्रस् सत्यधरपुत्त्रश् चक्रपाणिरर्ज्यालः पृथ्वीनारायणविजयविषयान् दशश्लोकीं रचयामास किल । एषाऽशुद्धियुता दशश्लोकीतिहासप्रकाशस्य प्रथमेऽङ्के एकनवतितमे पृष्ठे मुद्रिता दृश्यते । तत्त्रोक्तञ् चक्रपाणिप्रणीतं राजपुस्तकालयस्थञ् ज्योतिषपुस्तकञ् किमिति तु नाऽद्यापि विशेषतो ज्ञायते । चक्रपाणेः प्रश्नतत्त्वम् इति उत्तानगणितम् इति च द्वौ ग्रन्थौ विष्णुप्रसादभण्डारिसम्पादितौ पद्मनाभकेसरिणा प्रकाशितौ १९९१तमे वैक्रमेऽब्दे वाराणस्याम् मुद्रितौ प्राप्येते । ग्रहणतत्त्वम् जातकेन्दुप्रक्रियेति च द्वावन्यौ ग्रन्थावपि चक्रपाणिकृतौ राष्ट्रियपुस्तकालयादिपुस्तकसूचीपत्त्रेषु दृश्येते । अशेषतन्त्रम्, गुणवाक्यबोधः, चिकित्साग्रन्थश्चेत्यन्येऽपि ग्रन्थास् तदीयग्रन्थत्वेन टीकारामशर्मणोल्लिखिता दृश्यन्ते । चक्रपाणिचर्चेत्यन्यस् तदीयो ग्रन्थो जयमन्तमिश्रमहाभागेनोल्लिखितो दृश्यते ।

५९. राजा प्रतापसिंहः (१८०१–१८३४ वै.)

पृथ्वीनारायणपुत्त्र-प्रतापसिंहविरचितत्त्वेन बृहत्पुरश्चर्यार्णवो मुद्रितः प्रकाशमागतो वर्तते । तत्त्र प्रतिज्ञावाक्यम् "श्रीमत्साहप्रतापसिंहधरणी-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पालैन नानाऽऽगमान् दृष्ट्वा सर्वजनोपकारकपुरश्चर्यार्णवस् तन्यते" इति दृश्यते। समाप्तौ च "श्रीमत्प्रतापसिंहेन विद्याब्धेः पारदृश्वना। सवं त्सरे विशानाथबह्निनागधराङ्किते (१८३१)।। तपस्यर्जुन-पक्षेऽहि-तिथौ भास्करवासरे। पुरश्चर्यार्णवो नाम ग्रन्थ एष विनिर्मितः" इत्युपलभ्यते। वैष्णव-शैव-शाक्तादितन्त्रग्रन्थेभ्यो वचनानि विस्तरेण सङ्गृह्याऽत्र आम्नायभेद-दैवभेद-दैवतपञ्चकाभेद-तान्त्रिकमार्गभेदोपासनाभेद-दीक्षा-मन्त्रसंस्कार-क्रमदीक्षा-पूर्णाभिषेक-पुरश्चरण-माला-मुद्रा-मन्त्र-जप-गणाधिपादिमन्त्र-दशमहाविद्यादिकास् तान्त्रिकविषयाः प्रतिपादितास् सन्ति।

६०. शशिधरः (१८०४-१९०६ वै. ?)

त्रिशूलगङ्गातटस्थप्रसूतपुरीजातत्वेनोच्यमानो धिर्जेदिलदासप्रशिष्यत्वेन हरिभक्तशिष्यत्वेन च प्रतिपाद्यमानो विष्णूपाध्यायपुत्रो जोसमणिसम्प्रदायानुयायित्वेनोल्लिख्यमानो रेसुङ्गानिबासी गृहस्थसाधुश् शशिधरः (पौड्यालस्) सप्तदशश्लोकान् तत्त्वगीताम्, त्रयोविंशतिश्लोकाम् अजपगीतान् च रचयामास किल। तौ च द्वौ ग्रन्थौ "जोसमनि सन्त परम्परा र साहित्य" इत्याख्ये ग्रन्थे २१७-२२१ इति सङ्ख्याङ्कितेषु पृष्ठेषु मुद्रितौ प्राप्येते। रेसुङ्गानिवासी शशिधरोऽन्यैर् लालमणि-पौत्रत्वेन दिसैशर्म-पुत्रत्वेन मरासिनिकुलोत्पन्नत्वेन च प्रतिपादितो दृश्यते।

६१. रामभद्र उपाध्यायः

करुणाकरोपाध्यायसुतः कवी रामभद्रः १८३६ तमे वैक्रमेऽब्दे प्रशस्तिरत्नन् नाम पत्रलेखनरीतिप्रतिपादकं लघुङ् ग्रन्थञ् चकार किल। जीवसाहप्रेरणया रचितस् स च ग्रन्थः २०११ तमे वैक्रमेऽब्दे सुन्दरप्रसादसाहप्रकाशितो मुद्रित उपलभ्यते।

६२. गोकुलानन्दशर्मा (१८१०-१८६५ वै. ?)

नेपालदेशजोऽविज्ञायमानकुलाभिजनविशेषो गोकुलानन्दशर्मा रणबहादुरसाहाशीर्वादावल्याख्यञ् चतुश्चत्वारिंशच्छ्लोकात्मकं स्तुतिकाव्यम् १८४४ तमे वैक्रमेऽब्दे रचयामास किल।

६३. राघवशर्मा (१८१०-१८९८ वै. ?)

नेपालदेशजोऽज्ञातकुलाभिजनविशेषो राघवशर्मा श्री५रणबहादुर-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साहविरुदावलीति संस्कृतभाषा–हैन्दवभाषा–नैपालीयभाषामयम् पञ्चचत्त्वारिंशत्पद्यकम् प्रशस्तिकाव्यम् १८५२ तमे वैक्रमेऽब्दे रचयामास किल। तच् च काव्यं सम्प्रति नैपालराष्ट्रियाभिलेखालये सङ्गृहीतमुपलभ्यते। पञ्जीसङ्ख्या–द्वि. २३०।

६४. उदयानन्दोऽर्ज्यालः (१८१३-१८६४ ?)

नैपालगोर्खामण्डलाभिजनस् सप्तरिमण्डलान्तर्गत-वैरवा-ग्राम–निवासी वीरेश्वरपौत्त्रो विश्वेश्वरपुत्त्र उदयानन्दोऽर्ज्यालो दुस्स्वप्नदोषहरस्तोत्त्रन् नवरत्नस्तोत्त्रापराभिधम् १८६१ तमे वैक्रमेऽब्दे रचयामासेति श्रीरामजीप्रसादार्यालेनोक्तमस्ति। अधिकवँ विवरणन् तु नैव दत्तम्।

६५. लक्ष्मीपतिः पाँडेः (१८१५–१८८८ वै.)

नैपाल–गोर्खा–मण्डले गाइखुरग्रामे १८१५ तमे वैक्रमेऽब्दे जातः कृष्णानन्दपुत्त्रो लक्ष्मीपतिः पाँडेः वहादुरसाहमाश्रितस् सन् १८५४ तमे वैक्रमेऽब्दे सूर्यसिद्धान्तानुसारिणं रत्नदीपनामकं सिद्धान्त-ज्योतिषग्रन्थम् प्रणिनाय किल। अन्येऽपि टीकाग्रन्थास् तेन रचिता इति तत्कार्यपर्यालोचकाः कथयन्ति। ग्रहस्थितिगत्यादिज्ञानोपयोगिनार्यँ यन्त्राणां रचनायामपि तस्योत्सुकत्त्वन् ते प्रतिपादयन्ति। लक्ष्मीपतिना निर्मापितम् पलभायन्त्रमद्यापि नैपालराष्ट्रियसङ्ग्रहालयेऽस्तीति च ते वदन्ति। रत्नदीपस्य मूलभागो मुद्रितः प्राप्यते। ततश्च तस्यान्तिमः कियानपि भागो नष्टोऽपूर्णो वा विज्ञायते। लक्ष्मीपतिग्रन्थत्त्वेन अन्त्यविधिश्लोकसङ्ग्रहः, उमाचण्डिकापूजाविधिः, दुर्गार्चनकल्पतरुः, लग्ननिर्णयः, ग्रहायन(ण?)सारणी, जातकसुधेत्यादयो ग्रन्थाष् टीकारामशर्मादिभिरुल्लिखिता दृश्यन्ते। पूर्णिमाया एकान्नत्रिंशेऽङ्केऽपि लक्ष्मीपतिग्रन्था बहव उल्लिखिता दृश्यन्ते।

६६. दैवज्ञकेसरि अर्ज्यालः (१८२५–१८९३ वै. ?)

नैपालगोर्खामण्डलाभिजनो नारायणदासार्ज्यालवंशजः पृथ्वीनारायणकुलपुरोहित–चक्रपाण्यर्ज्यालपुत्त्रो दैवज्ञकेसरि अर्ज्यालस् स्वकुलवर्णनात्मकङ् कुलचन्द्रिकाख्यङ ग्रन्थं रचयामास किल। स च ग्रन्थो मुद्रित उपलभ्यते। दैवज्ञकेसरिणा ग्रहणमालाऽपि रचितेति टीकारामशर्मणोल्लिखितमस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६७. देवकीनन्दनोऽर्ज्याल: (१८२५ वै.?- ?)

नैपाल-गुल्मिमण्डलान्तर्गताऽमरभूमि-(मर्भुङ)वास्तव्यस् सुभन्तव-पराभिधश्श्रीपतिपुत्त्रचिन्तुकुलजः पूर्वं सन्न्यस्तत्त्वेन पुनर्गार्हस्थ्यम् प्रपन्नत्वेन च तद्वंशधरैरेवोच्च्यमानस्स्य योगिदासस्स्य प्रपौत्त्रो मुकुटमणिपौत्त्रो जनमेजय-पुत्त्रो देवकीनन्दनोऽर्ज्यालः पञ्चशतपत्त्रपृष्ठलेख्यमाचारादर्शम्, तर्कसङ्ग्रहस्स्य संस्कृतपद्यरूपान्तरणन् च चकार किल । तयोर् ग्रन्थयोरिदानीङ् कुत्त्रोपल-भ्यतेति तु विष्णुराजात्त्रेयादिभिर् नैवोल्लिखितन् दृश्यते ।

६८. वाणीविलासः पाँडे: (१८२७-१८८८ वै. ?)

गौरीश्वरप्रपौत्त्रो राजीवलोचनपौत्त्रो रामहृदयपुत्त्रो गङ्गाराम-शास्त्रिशिष्यो राजकुलमाश्रितो वाणीविलासः पाँडे: उच्चावचान् नव ग्रन्थान् रचयामासेति इतिहासज्ञा वदन्ति । तत्त्र निर्णयसिन्ध्वादिसदृशो वाणीविलाससिद्धान्ताख्यो धर्मशास्त्रनिबन्धग्रन्थो मुख्यः प्रतीयते । अन्ये ग्रन्थाश्च दुर्गाकृत्यकौमुदी, पुरश्चरणप्रयोगरत्नदीपिका, वेदान्तसारसङ्ग्रहः, प्रशस्तिरत्नावलिः, नवरत्नयुगलस्तोत्त्रमित्यादयः । तत्र प्रशस्तिरत्नावलिर् मुद्रितोपलभ्यते ।

६९. गौरीदत्तशर्मा पौड्यालः (१८३०-१८९५ वै. ?)

गौरीदत्तशर्मा पौड्यालश् श्री५राजेन्द्रवर्णनन् नाम काव्यं रचया-मास किल । श्री५राजेन्द्रयशोवर्णनमिति, श्री५राजेन्द्रसाहवर्णनमिति च द्वौ ग्रन्थौ नैपालराष्ट्रियाभिलेखालयसूचीपत्त्रे दृश्येते । तौ ग्रन्थौ परीक्षणीयौ वर्तेते ।

७०. रङ्गनाथः पौड्यालः (१८३०-१९०४ वै. ?)

नैपालत्रितुङ्गाचलमण्डलाभिजनो गोरक्षराजमाश्रितः काष्ठमण्डप-निवासी जयमङ्गल-पौड्यालनप्ता पण्डितराज-व्रजनाथपुत्त्रः १८९४तमे वैक्रमेऽब्दे प्रधान-मन्त्रिपदमप्यारूढो रङ्गनाथः पौड्यालो गीर्वाणयुद्धविक्रमशिक्षणाय राज-विधानसारनामकन् नीतिशास्त्रग्रन्थम् प्रणिनाय किल । तस्स्य ग्रन्थस्स्य प्रारम्भे रङ्गनाथो "**नानानिबन्धनविलोकनखेदशान्त्यै सङ्गृह्य धर्मनयमूल-वचो विभाव्य । सारन् निगृह्य नृपशिक्षणकौतुकाय श्रीरङ्गनाथ-कृतिना रचितो निबन्धः ॥** नेपालदेशाऽलिक-कान्तिपुर्याङ गीर्वाण-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युद्धोत्तरविक्रमस्स्य । राजाधिराजस्स्य मनस्सरोजम् प्रकाशयेद् राजविधानसारः" इति ब्रवीति । तस्स्य ग्रन्थस्स्य द्वितीयस्स्य विलासस्स्याऽन्ते रङ्गनाथः "ख्यातः पण्डितराजरम्यपदवीयँ यो ह्यद्रिराजेश्श्वरादाप्तश् श्रीवृजनाथनामविदितो वेदाङ्गशास्त्रोज्ज्वलः । भूपानन्दिनि तत्सुतेन रचिते नीतिप्रबन्धेऽतुले सम्पूर्णो नृपधर्मबोधनिपुणो द्वैतो विलासश् शुभः" इत्युक्त्वा "इति श्श्रीमद्विद्द्वन् (मुकुट) मणिगणकिरणनीराजितचरणश्श्रीपण्डितराजवृजनाथपण्डितात्मज-श्श्रीपण्डितराजरङ्गनाथसूरिविरचिते राजविधानसारे राजधर्म्मकथनो नाम द्वितीयो विलासः । शुभमस्तु समीक्षणकर्तुः" इति च वदति । कर्पूरस्तवदीपिकान्ते तु "इति श्श्रीमद्विद्द्वत्कुलमुकुटमणिनीराजित-गिरिराजराजेन्द्रपूजित-पादपद्म-श्श्रीपण्डितराज-वृजनाथसूरिसूनुरङ्गनाथ विद्द्वन्निर्मिता कर्पूरस्स्तवदीपिका समाप्ता" इत्येवोक्तन् दृश्श्यते । तथापि १८६२ तमे वैक्रमेऽब्दे रणबहादुरसाहाय गीर्वाणयुद्धविक्रमेण दत्ते मुखाधिकृतिपत्त्रेऽपि द्वारकेषु "रङ्गनाथ-पण्डितराज-जु" इत्युल्लेखः प्राप्प्यते । वृजनाथाय पण्डितराजोपाधिन् ददता श्रद्रिराजेश्श्वरेण तस्स्य पाण्डित्यं स्वयम् परिज्ज्ञातवँ वा पण्डितसभाद्वारा वा परिज्ज्ञातमिति किमपि न ज्ज्ञायते । रङ्गनाथेन तु आत्मना पण्डितराजोपाधिः कस्मात् प्राप्त इति नैव सूचितम् । वृजनाथेन स्वकीयपण्डितराजत्त्वपरिचायकम् पाण्डित्त्यपूर्णङ्किमपि चिह्नमस्माकङ्कृते स्थापितन् न वेत्त्यपि न ज्ज्ञायते । रङ्गनाथेन तु तस्स्य पण्डितराजत्त्वस्स्य परीक्षणायाऽस्माकङ्कृते राजविधानसार इति कर्पूरस्स्तवदीपिकेति च द्वौ ग्रन्थौ दत्तौ ज्ञायेते । तौ च ग्रन्थौ मुद्द्रितावुपलभ्येते ।

७१. पृत्थ्वीपालसेनः

नैपाल-पाल्पामण्डलराजोऽयम् पृत्थ्वीपालसेनः प्रसादकौमुद्याख्यम् पाणिनीयव्याकरणप्रक्रियाग्रन्थं रचयामास किल । एष पृत्थ्वीपालसेनः १८६१ तमे वैक्रमेऽब्दे पाल्पाराज्ज्ये गोर्खाराज्ज्ये विलीने सति ललितपुरराजभवने निरुद्धस् सन् रणबहादुरसाहहत्त्याकर्मणि सलँलग्न इत्यारोपे १८६३ तमे वैक्रमेऽब्दे मृत्त्युदण्डम् प्राप किल । प्रसादकौमुदीग्रन्थोऽधुना नैपालराष्ट्रियाऽभिलेखालये सङ्गृहीतो दृश्श्यते । तस्स्य ग्रन्थस्स्योत्तरार्धस्स्य पञ्जीसङ्ख्या तृ. १४८ वर्तते । तदन्ते "इति श्री-अनवद्यगद्यपद्यविनोदोद्योति-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तान्तःकरण-वाङ्मनसगोचर-मही-मण्डित- श्रीमन्महाराजाधिराज-पृथ्वीपालसेनभूपुरन्दरविरचितायाम् प्रसादकौमुद्यामुत्तरार्धं सम्पूर्णम्" इत्युल्लिखितमस्ति। पूर्वार्धमपि तत्र सङ्गृहीतमस्तीति श्श्रूयते पञ्जीसङ्ख्या तु अविज्ञायमानाऽस्ति। तत् षष्ठ्याम् पञ्जिकायाङ कुत्र चित् पञ्जीकृतं स्यात्।

७२. अग्निधरदेवकोटाः (१८३५-१८८० वै. ?)

नैपाल-गोरक्षाचलमण्डलान्तर्गत-लिग्लिग-वोहोराग्रामनिवासित्वेन सम्भाव्यमानोऽग्निधरदेवकोटाः गीर्वाणयुद्धविक्रमराज्यारोहणात् प्रभृति लम्जुङविजययँ यावद्(?) घटनावलिवँ वर्णयित्वा गोर्खाविजयतिलकाख्यङ काव्यञ् चकार किल। गोर्खातः पाल्पाङ गतस्स्य माधवप्रसाददेवकोटाकस्स्य पुत्रात् कुलमणिदेवकोटाकात् प्राप्य आद्यन्तभागविकलमपि तन् नरहरिणा नाथेन इतिहासप्रकाशसन्धिपत्रसङ्ग्रहनामके ग्रन्थे मुद्रापितमित्यवगम्यते।

७३. भवदत्तः (१८५६ वै.)

अविज्ञायमानकुलाभिजनादिको भवदत्तः कविः खलु एकान्नषष्ट्या पद्यैः कतिभिश्चन गद्यखण्डिकाभिश्च सेनवंशवर्णनम् १७२४ तमे शकान्ताब्दे (१८५६ तमे वैक्रमाब्दे) चकार किल। तेन स्वग्रन्थान्ते "**शाके चतुर्भुजधराधरभूमियुक्ते रात्रिन्दिवँ वृषबलादुपचीयमानाम्। श्रीरत्नसेनकुलजावनिजानिवंशमुक्तावलिङ ग्रथितवान् भवदत्तधीमान्**" इत्युक्तमस्ति। एष ग्रन्थस् सेनवंशावलीति नाम्ना वीरपुस्तकालयेन (२०२० तमे वैक्रमाब्दे) प्रकाशिते ग्रन्थे सङ्गृहीतोऽस्ति। भवदत्तस्स्य काव्यरचनाशक्तिस् तत्र स्थानेस्स्थाने व्यक्ता दृश्श्यते।

७४. इन्द्रसेनः (१८६६ वै.)

इन्द्रसेनः खलु १८६६ तमे वैक्रमेऽब्दे सारसङ्ग्रहनामकं शालिहोत्रशास्त्रग्रन्थम् (अश्श्वशास्त्रग्रन्थम्) प्रणिनाय किल। स च ग्रन्थ इदानीन् नैपाल-राष्ट्रियाऽभिलेखालये सङ्गृहीतो दृश्श्यते। पञ्जीसङ्ख्या प्र. ८१६।

७५. मकरन्दपण्डितः (?)

नेपालदेशमद्ध्यभागस्स्थ-त्रितुङ्गाचलमण्डलान्तर्गत-वसन्तपुरग्रामनिवासी मकरन्दपण्डितः खलु ज्ञानदर्पणाख्यङ ग्रन्थञ् चकार किल। एतस्स्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थस्स्योल्लेखश् शिवशर्मसूरिणा स्वकृते वासुदेवरसानन्दे कृतोऽस्ति (पृ.३२, १८२) । ज्ञानदर्पणस्थो **"दुर्वासनाविषावर्ते भवाब्धौ भ्राम्म्यतान् नृणाम् । कथञ्चिदुपसन्नानामेको रामः परायणम्"** इति श्श्लोकश्च तत्त्रोद्धृतो दृश्श्यते। तथैव मकरन्दपण्डितकृतम् **"मनोधृताधोक्षजपादपङ्कजा दयार्द्रशीलार्पितलोकमङ्गलाः । क्षिपन्ति तापत्त्रितयवँ वपुष्मतां सदुक्तिभिर् भागवतास् सुदुर्लभाः"** इति पद्यमपि तत्त्रोल्लिखितम् प्राप्प्यते । मकरन्दपण्डितग्रन्थस्तु नष्टः प्रतीयते ।

७६. अमृतानन्दः पण्डितः [बाँडाः] (?-?)

नैपाल-ललितपुरनिवासी रामानन्दपुत्त्रो जयलक्ष्मीकुक्षिजस् सुन्दरानन्दाग्रजः अमृतानन्दः खलु अश्श्वघोषकृतस्स्य बुद्धचरितस्स्य नष्टांश् चतुर्दश-पञ्चदश-षोडश-सप्तदश-सर्गान् स्वयं रचयित्त्वा पूरयामास किल । तथैव स नेपालीय-देवता-कल्ल्याणपञ्चविंशतिः, धर्मकोशसङ्ग्रहः, छन्दोऽमृतलता इति संस्कृतग्रन्थांश्च रचयामास । एतद् विवरणङ कमलप्रकाशमल्ललेखमुपजीव्व्याऽस्माभिरत्त्रोपस्थापितमस्ति । स चाङ्लभाषारचितो लेखो 'नेप्लिज् लिङ्ग्विष्टिक्स्' इत्त्याक्ख्यायाम् पत्त्रिकायाम् प्रकाशितोऽवगम्म्यते ।

७७. सुन्दरानन्दः पण्डितः [बाँडाः] (१८४०-१९०१ वै. ?)

नैपाल-ललितपत्तननिवासी सुन्दरानन्दो ललितत्त्रिपुरसुन्दरी-राजेन्द्र-भीमसेनथापा-प्रशंसापराम् पृत्थ्वीनारायणवंशेतिहासयुतान् त्त्रिरत्नसौन्दर्य-गाथाम् १८९० तमस्स्य वैक्कमाब्दस्याऽऽसन्ने काले प्रणिनाय किल । तथैव स बहादुरसाहवर्णनमपि रचयामास किल । तत्त्र त्त्रिरत्नसौन्दर्यगाथा धनवज्ज्र-वज्ज्राचार्यादिसम्पादिता मुद्द्रितोपलब्भ्यते । ललितपुरनिवासि-सुन्दरानन्द-वज्ज्राचार्यकृतित्त्वेन पृत्थ्वीनारायणदिग्विजयाक्ख्यैका लघ्वी रचनाऽपि प्राप्प्यते । सा चेतिहासप्रकाशसन्धिपत्त्रसङ्ग्रहे ७५१तमादिषु पृष्ठेषु मुद्द्रिता दृश्श्यते ।

७८. राजा गीर्वाणयुद्धविक्क्रमः (१८५४-१८७३ वै.)

नेपालराजो गीर्वाणयुद्धविक्कमस् सत्कर्मरत्नावल्ल्याक्ख्यङ कर्मकाण्ड-धर्मशास्त्त्रनिबन्धग्रन्थम् १७३४ तमे शकान्ताब्दे (१८६९ तमे वैक्कमाब्दे)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रणिनाय किल । तदुक्तम् **"शाके वेदधनञ्जयाद्द्रिवसुधायुक्ते सिते चाऽऽश्विने द्वादश्यां शनिवासरे शतभिषङ्नक्षत्त्रसद्योगिनि । वृद्धौ योगवरे स्वकान्तिनगरे स्व[illegible]बलीनामको गीर्वाणादिकयुद्धविक्क्रमनृपेणाऽयन् निबन्धः कृतः"** इति । किन्तु तदा पञ्चदशवर्षवयस्को गीर्वाणयुद्धविक्क्रमो नूनम् पण्डितमण्डलीद्वारैवेमङ ग्रन्थन् चकारेति मानुषबुद्धिकल्पना न न प्प्रसरति । एतस्मिन् ग्रन्थे बह्व्व्यः कर्मकाण्डपद्धतयो धर्मशास्त्रनिर्णयाश्च सङ्गृहीता दृश्श्यन्त इत्त्ययङ ग्रन्थस् साधारणतया उपयोगी एव वर्तते । तथापि स्थानेस्स्थाने ग्रन्थकारो कानि चन निर्णयसिन्ध्वादिप्प्रकरणानि सम्म्यगबुद्ध्वैव स्वग्रन्थे विसंस्थुलतया सन्निवेशयति, स्वशाखाप्रतिकूलतयाऽपि कर्माणि प्प्रतिपादयतीति, सम्पादकाब्भ्यामपि तादृशेषु स्स्थलेषु सर्वत्त्र टिप्पण्ण्यः कर्तव्व्या अपि न कृता इति च विद्द्वद्भिस् सावधानतया प्रयोज्ज्योऽस्त्येष ग्रन्थः । **"ग्रन्थाननेकानवलोक्क्य सम्म्यङ निरूप्प्यते कर्मविचारतत्त्वम् । कृपा विधेया कृतिभिर्ममोपरि पितेव पुत्त्रस्स्य सखेव सक्ख्युः"** इति एतदीये पद्द्ये (प्रथमे भागे चतुर्थे पृष्ठे वर्तमाने सप्तदशे पद्द्ये) वाक्क्यरचनाऽपि सावद्द्या दृश्श्यते । मुद्द्रितोयमुपलब्भ्यते ग्रन्थः ।

७९. वाणीनिधिः (१८७७ वै.)

वाणीनिधिर् नाम कश्चन भारतवर्षीयराष्ट्रियताजागरणकामो नीतिशास्त्रज्ञः कविरलङ्घ्यशासनन् नाम आर्यावर्तक्षितीशप्प्रोत्साहनपरङ काव्व्यम् १८७७ तमे वैक्क्रमेऽब्दे रचयामास किल । एतत् काव्व्यम् इतिहासप्प्रकाशसन्धिपत्त्रसङ्ग्रहे मुद्द्रितमुपलब्भ्यते । एतस्स्य काव्व्यस्स्याऽन्ते **"प्रोद्द्यद्राजन्न्यमार्तण्डकरसाहस्रमर्दितः । गोरण्डद्ध्वान्तनिकरो विलययँ यातु मा चिरम् ॥ शाके विक्क्रमके सप्तसप्ताष्टकसमे सति । मार्गशीर्षे सुचिन्त्येमावँ विचार्याकरवन् धिया"** इत्त्युल्लिखितन् दृश्श्यते । वाणीनिधिर् गोरक्क्षाधीशचम्पूमपि रचयामासेति के चिद् वदन्ति । इयन् चम्पूरितिहासप्प्रकाशे द्वितीयेऽङ्के तृतीये भागे मुद्द्रितोपलब्भ्यते ।

८०. धरणीधरपन्तः (१८८८ वै. ?)

प्रेमनिधिपन्तानुजहरिनिधिपन्तनप्त्ता रेवाधरपुत्त्रो धरणीधरपन्तो राजेन्द्रसाहं रङ्गनाथबुधम् भीमसिंहन् चोल्लिखन् ईशतत्त्वमितिनामकम् ईशावास्स्योपनिषद्व्याक्ख्यानरूपं सगुणब्रह्म्मवादिग्रन्थम् १८८८ तमस्य वैक्क्र-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माऽब्दस्याऽऽसन्ने समये रचयामास किल । तस्यान्ते तेन "**ये कर्मैकपरा न चेशमनने तान् नास्तिकान् मन्महे द्विष्मस् तानसतः कुतर्ककलनाद् वैनाशिकान् नास्तिकान् । ये ब्रह्मैक्यविदोऽपजीवमतयस् ते त्वर्धवैनाशिका ये त्वात्मद्वयतत्त्वशुद्धमतयस् तानेव भूयस् स्तुमः**" इत्युक्तम् दृश्यते । धरणीधरेण कृता रामतापनीयोपनिषद्व्याख्या, रामरक्षाविवेकः, कालनिर्णयव्याख्या, चातुर्वर्ण्यविवेचनम्, चातुर्वर्ण्यव्यवस्था, सापिण्ड्यतत्त्वम् इत्यन्येऽपि ग्रन्था ओफ्रेक्टसूचीतो ज्ञायन्ते इति बाबुराम आचार्यश् 'शिवशर्मा पण्डित' इति निबन्धे भानुभक्तस्मारकग्रन्थे (प्र. सं.) ब्रवीति ।

८१. शिवशर्मा सूरिः (१८६० वै.)

नेपालदेशमध्यभागस्थ–त्रितुङ्गाचलमण्डलान्तर्गतवसन्तपुरग्रामाभिजनो मकरन्दपण्डितपुत्रो गङ्गादेवीगर्भजश् शिवशर्मा सूरिः खलु रामचिन्तालहरी, रामायणार्थप्रकाशः, कृष्णमहिमा, गोविन्दगुणानन्दः, वासुदेवरसानन्दश् चेति ग्रन्थान् प्रणिनाय किल । तत्राऽन्येषाञ्च ग्रन्थानाञ्च वासुदेवरसानन्दे उल्लेखाः प्राप्यन्ते । (पृ. २७६; १७६; १८२; २१८; १८२; २६७) । वासुदेवरसानन्दस् तु तेन १८६० तमे वैक्रमेऽब्दे रचितः, आदित्यरामभट्टाचार्येण प्रथमम् मूलमात्रम् मुद्रापयित्वा वितीर्णः, १९९२ तमे वैक्रमेऽब्दे प्रयाग–दारागञ्जस्थशिवशर्मपाठशालाप्रबन्धकारिसमित्या भाषानुवादसहितो मुद्रापितः प्राप्यते । तत्र "**वासना वासुदेवस्य वासितम् भुवनत्रयम् । सर्वभूतनिवासीनाञ्च वासुदेव नमोऽस्तु ते**"–इति श्लोकस्य व्याख्यायाः प्रसङ्गेन ज्ञानशास्त्रप्रक्रिया, श्रीभगवद्भक्तिशास्त्रम्, वैष्णवोऽष्टाङ्गयोग इति विषया विस्तरेण प्रतिपादितास् सन्ति । "आदित्यरामभट्टाचार्येण प्रयागे दारागञ्जप्रदेशे दशाश्वमेधमहादेवमन्दिरसमीपे गङ्गातटे शिवशर्माणम् प्रति श्रद्धाया अतिरेकेण शिवशर्मपाठशाला स्थापिताऽस्ति, सा च काशि-हिन्दु-विश्वविद्यालयेन सम्बद्धाऽस्ति, तस्यामेव पाठशालायाम् भट्टाचार्येण स्वमातुर् धन्न्यगोप्या नाम्ना धन्न्यगोपीपुस्तकालयोऽपि स्थापितोऽस्ति, तत्रैव पुस्तकालये शिवशर्महस्तलिखितञ्च वासुदेवरसानन्दपुस्तकं सुरक्षितञ्च वर्तते" इति वासुदेवरसानन्दपुस्तकप्राप्तिवृत्तान्तवर्णनपूर्वकम् बलदेवदवेमहाशयेन पुस्तकपरिचये वासुदेवरसानन्दसलंलग्ने प्रतिपादितमस्ति । शिवशर्मसूरिणा च वासुदेवरसानन्दसमाप्तौ "**इतिश्रीवासुदेवरसानन्दस् सदद्वैताभिमतविद्वन्मण्डलीमण्डनायमान-त्रितुङ्गाचलवसन्तपुरवास्तव्य-**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गङ्गादेवीद्वितीयश्श्रीमकरन्दपण्डितस्स्य महात्मनः कुमारेण शिवशर्म-सूरिणा विरचितस् सम्पूर्णतामहैषीत्" इत्युल्लिखितवँ वर्तते । ग्रन्थपूर्ति-समयश्च "**गगनग्रहगजचन्द्रैर्मितवत्सर श्रौरगे तिथौ गौरे । राधे बुधे प्रयागे कृतिरियमुदभून् मुदे विदुषाम्**" इत्युल्लिखितो वर्तते । शिवशर्म-विरचितवँ विष्णुमहिम्नस्तोत्रञ्च वासुदेवरसानन्दपरिशिष्टत्वेन मुद्रित-मुपलभ्यते ।

८२. राजा राजेन्द्रविक्रमसाहः (१८७०-१९३८)

नेपालराजो रणबहादुरसाहपौत्रो गीर्वाणयुद्धविक्रमपुत्रो राजेन्द्र-विक्रमसाहः खलु चतुर्दशपटलात्मकं राजकल्पद्रुमाख्यन् तन्त्रशास्त्रनिबन्ध-ग्रन्थं रचयामास किल । स च ग्रन्थस् सम्प्रति नैपालराष्ट्रियाभिलेखालये सङ्गृहीतो दृश्यते । पञ्जीसङ्ख्या द्वि. ३२;७१;९५। राजेन्द्रविक्रमसाहकृतं श्रीस्तोत्रमपि तत्रैव सङ्गृहीतन् दृश्यते । पञ्जीसङ्ख्या द्वि. १४२ ।

८३. सुकृतिदत्तः पन्तः (१८८०-१९३० वै.)

कूर्मधराधरेन्द्राभिजनो नैपाल-वाग्लुङमण्डलनिवासी सुकृतिदत्तः पन्तः १९२८ तमे वैक्रमेऽब्दे सप्तदशसर्गात्मकम् १७४० पद्यैर् युतङ कार्तवीर्य-चरितनामकङ काव्यम् पूर्णञ् चकार किल । एतत्काव्यप्रणयनात् पूर्वमेव स सिद्धान्तवादः, स्फोटवादः, रत्नावली, गङ्गाप्रसादः, मन्दारमाला, छन्दः-प्रबन्धश्चेति षड् ग्रन्थानपि प्रणिनाय किल । किन्तु एते ग्रन्था इदानीमुपलभ्य-माना न सन्ति । कार्तवीर्यचरितमेकमुपलभ्यते । एतद्ग्रन्थविषये सङ्क्षेपेणाऽ-नेकैर् विद्वद्भिर् लिखितन् दृश्यते । केन चिदिदङ काव्यम् मुद्रापयितु-मारब्धमस्तीत्यपि श्रूयते । कार्तवीर्यचरितन् नैषधीयचरितानुकारि प्रतीयते । नैषधीयचरिते इवाऽत्राऽपि सर्गान्तेषु कविना स्वपरिचयो दत्तोऽस्ति । तथा हि "**श्रीमत्कूर्मधराधरेन्द्रवसतिप्रख्यातपन्तान्वये जातश् श्रीभवदत्त-पण्डितवरश् श्रीभार्गवी तत्प्रिया । लेभाते सुकृतिं सुतन् निजमतेस् संशुद्धये तत्कृते काव्येऽस्मिन् कृतवीर्यसूनुचरितें सर्गोऽयमादिर् गतः**" इत्यादि । एतस्मिन् काव्ये कवेरलङ्कारप्रयोगे पाण्डित्यप्रदर्शने च यादृशी तत्परता दृश्यते न तादृशी तत्परता काव्यस्य रसभावमयतायास् सम्पादने । उक्तं हि कविनाऽपि– "**फणिपतिभणितिप्रविष्टचेता उदयनवाचि विशारदस् स्मृतिज्ज्ञः । भरतवचनभारतोक्तिविज्ज्ञो मम कृतिदर्शन-**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातनोतु विद्द्वान्'' इति (१७।१७)। एतत्सम्बन्धे च चिरन्तनस्स्य काव्यसमालोचकस्स्य भामहस्स्य **''काव्यान्यपि यदीमानि व्याख्यागम्म्यानि शास्त्रवत्। उत्सवस् सुधियामेव हन्त दुर्म्मेधसो हताः।''** इति (२।२०) उक्तिस् स्मर्यते। कार्तवीर्यचरितकाव्यरचनापूर्तिसमयश्च कविनैववँ वर्णितोऽस्ति **''नागेन्द्रनेत्रनवभूमितवैक्रमाब्दे (१९२८) वैशाखमास-सितपक्ष-तृतीयतिथ्याम्। श्रीकार्तवीर्यचरितोदितकाव्यमेतच् छ्रीतारिणीकरुणया परिपूर्णमासीत्''** (१७।३५) इति।

८४. वाचस्पतिःपन्तः (?–?)

कूर्माचलपरमाभिजनो नैपालपाल्पामण्डलाभिजनः काष्ठमण्डपनगरनिवासी गोतिनाथुपन्तवंशजः इन्दिरारमणनप्ता नीलदेवपुत्रो वाचस्पतिः पन्तः खलु रणोद्दीपसिंहमाश्रितःपण्डितः प्रतीयते। एतस्स्य जन्मवर्षनिधनवर्षादिकन् तु किमपि न ज्ज्ञायते। नीलदेव इव वाचस्पतिरपि धर्ममीमांसा–ब्रह्ममीमांसान्यायादिशास्त्रज्ज्ञ आसीदिति वदन्ति। वाचस्पतिर् ज्योतिषाद्ध्यापकत्त्वेन पाठशालायान् नियुक्तो दृश्श्यत इति शरच्चन्द्रो भट्टराइः प्राह। नीलदेवः१९२६तमवैक्रमाब्दपर्यन्तञ् जीवन् राजानम् भूमियँ याचमानोऽवगम्म्यते इति तद्विचारका आहुः। नीलदेवेन न्यायकुसुमाञ्जलेष् टीका कृताऽऽसीदिति तस्स्य प्प्रनप्ता शङ्करदेवो वदति स्स्म। नीलदेवेनाऽष्टाद्ध्याय्या लक्ष्यनिर्देशिका टीका कृताऽऽसीदित्यन्ये कथयन्ति। किन्तु ते द्वे एव टीके न दृष्टिपथमागते स्तः। नीलदेवेन वाचस्पतिम् प्रति प्रहिते पत्त्रे लिखितोऽयं श्लोक इति दुर्गाप्रसादोऽधिकारी (कङ्काली) कथयति स्स्मेत्युक्त्वा टुकराजमिश्श्रेणैकश् श्लोकोऽस्मभ्यन् दत्तः। स च श्श्लोको **''महाधनवँ वीक्ष्य महाधनाढ्यवँ विद्या न हेया विदुषा कदापि। वाराङ्गनानामवलोक्य वेषङ् किमार्यनार्यः कुलटा भवन्ति''** इत्त्येवंरूपोऽस्ति। किन्तु स सुभाषितरत्नभाण्डागारस्स्याष्टमे संस्करणे दृश्श्येन **''निरक्षरे वीक्ष्य महाधनत्त्ववँ विद्याऽनवद्या विदुषा न हेया। रत्नावतंसाः कुलटास् समीक्ष्य किमार्यनार्यः कुलटा भवन्ति''** इति श्श्लोकेन सदृश इति स नीलदेवेन रचितो नेति प्प्रतीयते। वाचस्पतिपन्तः १९४४तमे वैक्रमेऽब्दे खड्गसम्सेरजङ्गप्प्रसङ्गे नेपालदेशान् निर्वासितोऽभूदिति शङ्करदेवः प्रतिपादयति। वाचस्पतिपन्तेन रणोद्दीपसिंहप्प्रेरणया १९३०तमे वैक्रमेऽब्दे रचित एको **''गीतायाः प्रक्षिप्तत्त्वोद्घोषणेनाऽऽत्मानमाख्यापयतो धिक्कारः''**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति निबन्धो वाचस्पतेर् नप्त्रा शङ्करदेवेन २०२९तमे वैक्रमेऽब्दे मुद्रापितो दृष्टिपथमागच्छति। किन्तु स मुद्रणजाऽशुद्धिबहुलतयाऽतीव दुष्पठो जातोऽस्ति। पूर्वोक्तन् निबन्धनामाऽपि अस्माभिः पूर्वापरविचारणेन संशोद्ध्योपस्थापितवँ वर्तत इति बोद्ध्यम्। वाचस्पतिपन्तः १९४१तमे वैक्रमेऽब्दे सर्वप्रथमन् नैपालीयपञ्चाङ्गपत्रमुद्रापणव्यवस्थाञ् चकारेत्यपि वदन्ति।

८५. पतञ्जलिः (? – ?)

नैपाल–काष्ठमण्डपनगरनिकटवर्तिललितपुरनिवासी गर्गगोत्रो दैवज्ञसिंहक्षितिपालमान्यस्याऽरविन्दनाथस्य पुत्रः पण्डितः पतञ्जलिः खलु १९०८ तमे वैक्रमेऽब्दे सप्ताहपद्धतिं रचयामास। तदुक्तन् तदन्ते "**पन्नगाभ्रखगचन्द्रसम्मिते वैक्रमे सकलसङ्ग्रहादिय(मा ?)म्। सूक्ष्मतः खलु नगाहपद्धतिं सज्जनस्य च मुदेऽकरोद् द्विजः**" इति। एषा च पद्धतिः साङ्गसप्ताह–मण्डपपूजा–विधिरिति नाम्नाऽङ्किता १९९५तमे वैक्रमेऽब्दे वाराणस्याम् माधवप्रसादशर्मणा मुद्रापितोपलभ्यते।

८६. तारानिधिः [मणिरामः] पाण्ड्यः (?–?)

कूर्माचलपरमाभिजनो नैपालत्रितुङ्गाचलमण्डलान्तर्गतचोकग्रामकृतनिवासो जयदेवपौत्रः कुलनिधिपुत्रस् तारानिधिः (मणिरामः) खलु पतिव्रताधर्माख्यन् धर्मशास्त्रप्रकरणग्रन्थम् १९१९तमे वैक्रमेऽब्दे (?) रचयामास। स च ग्रन्थः १९५२ तमे वैक्रमेऽब्दे नेपालदेशे पाशुपत-यन्त्रालये ग्रन्थकर्तृपौत्रेण उमादेवेन मुद्रित उपलभ्यते। तस्य ग्रन्थस्याऽन्ते तारानिधिना स्वपित्रा कुलनिधिशर्मणा रचितानाङ्ग ग्रन्थानाञ् च नामान्युल्लिखितानि सन्ति। स्वरचितत्वेन च छन्दःप्रकरणम्, शिवार्चनचन्द्रिका, ओषधिकल्पश्चेति ग्रन्थाश्चोल्लिखितास्सन्ति।

८७. रामचन्द्रो जोसिः (१८८५–१९६९ वै. ?)

नैपालडोटिमण्डलान्तर्गततिलाडिग्ग्रामाभिजनः काष्ठमण्डपनगरान्तर्गतयट्खाटोलकनिवासी ईश्वरीदत्तपुत्रो पानमतीकुक्षिजो गर्गगोत्रो रामचन्द्रो जोसिः पशुपतिस्तोत्रङ्ग गुह्यकालिस्तुतिञ् च रचयामास। तद्द्वयं सहैकपुस्तकतया १९६४तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते। तत्र व्याकरणसम्बद्धा महत्त्वपूर्णाष् टिप्पण्योऽपि स्थानेस्थाने दृश्यन्ते। तस्य षोडशश्लोकात्मकं स्वस्थानिकास्तोत्रमपि नेपालनगरे १९५२तमे वैक्रमेऽब्दे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्रितमुपलभ्यते । तदन्ते ''इति श्रीस्कन्दपुराणान्तर्गतकेदारखण्डोक्त-स्वस्थानिकाकथाप्रकाशिकायाञ् जोसीत्युपनामकरामचन्द्रडोट्यालकृतौ द्वादश-सर्गोक्तं स्वस्थानिकास्तोत्त्रं सम्पूर्णतामगात्'' इत्युल्लिखितन् दृश्यते । एतेन रामचन्द्रेण स्वस्थानिकाकथाप्रकाशिकाऽपि रचितेति प्रतीयते ।

८८. छविलालस् सूरिर् ढुङ्ग्यालः (१८९६–१९६३ वै.)

नैपाल–रामेछापमण्डलाभिजनः काष्ठमण्डपनगरनिवासी दीनानाथ-पौत्त्रो देवीप्रसादपुत्त्रः काश्यामधीतवान् छविलाल उपाद्ध्यायो ढुङ्ग्यालस् सूरिः १९४९ तमे वैक्रमेऽब्दे सुन्दरचरितन् नाम सप्ताङ्कन् नाटकम्, यथा-कालङ् कुशलवोदयन् नामाऽष्टाङ्कन् नाटकम्, वृत्तालङ्कारम्, विरक्तितरङ्-गिणीशतकञ् च रचयामास, मुद्रापयित्वा विद्वद्भ्यो निश्शुल्कवँ विततार च किल । तत्त्र सुन्दरचरिते रामायण-सुन्दरकाण्डकथावस्तु, कुशलवोदये सीता-परित्यागादिकमुत्तररामचरितमुपस्थापितमस्ति । वृत्तालङ्कारे एकैकम् पद्यम् अलङ्कारविशेषस्य वृत्तविशेषस्य चोदाहरणतया मनोहरतया रचितन् दृश्यते। छविलालकृतास् समस्यापूर्तयोऽन्ये च मुक्तकश्लोकास् सूक्तिसुधायाम् मुद्रिता दृश्यन्ते इति तदन्वेषका आहुः । छविलालसूरिणा **''विज्ञानकेसरिकृतीन्द्र-मुखोद्गतानि वागर्णवाच्छसलिलानि जयन्ति लोके । आपो यथा गिरिणदस्य मम प्रलापास् सम्प्राप्य येषु समला विमला अभूवन्''** इति स्तुतेन विज्ञानकेसरिणा विमलीकृतेषु हरिनाथशर्मणा पुनरवलोकिते-ष्वपि छविलालकृतिषु कुत्त्र चित् भाषिकाशुद्धयो दृश्यन्ते । भवति हि गच्छताङ् क्वापि स्खलनम् । अत एव छविलालसूरिः प्रार्थयते स्म **''दोषज्ज्ञा शोधयन्त्वेतद् यत्त्रयत्त्रास्त्यसङ्गतम्। प्राञ्जलिः प्रार्थये वोऽहम् भवतः करुणादृशः''** इति । काव्यदृष्ट्या तु तदीयाः कृतयो मनोहारिण्य एव सन्ति । तत्त्र सुन्दरचरितस्य प्रस्तावनायामागतं स्वभावोक्तिप्रधानं शरद्वर्णन-परन् **''निशान्तश् शान्तोऽसौ जहति न सरस् श्वेतगरुतस् सरोनीरं स्वच्छवँ विदधति सदा शीतमरुतः । हिमांशुर् लोकानाम् परिहरति तापञ् च विविधन् तथाऽपूर्वन् तोषञ् जनयति जनानां शरदियम्''** इति पद्यं स्थालीपुलाकन्यायेनोदाहर्तुं शक्यन् दृश्यते ।

८९. मनोहरशर्मा झाः (१९०७–१९८७ वै. ?)

नैपाल–महोत्तरि–मण्डलान्तर्गत–साँढा–ग्रामनिवासी मनोहरशर्मा झाः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कूटदर्पणव्याख्याम् प्रभाख्याञ् चकार किल । सा च व्याख्या मुद्द्रितोपलभ्यते । तेन रचिताश् शौचाशौचविवेकादयोऽन्येऽपि ग्रन्थास् सन्तीति श्श्रूयते ।

९०. हरिनाथः प्याकुर्याल (१९०९–१९८६ वै.)

नैपाल–काभ्रेमण्डलान्तर्गत-फुलबारिग्रामाभिजनः कृतसङ्खुनिवासः काष्ठमण्डपनगरान्तर्गत-ठमेलटोल्लकनिवासी नीलकण्ठपौत्त्रो लोकनाथपुत्त्रो कनकरेखागर्भजो धनकुमारीद्द्वितीयो हरिनाथशर्मा प्याकुर्यालोऽन्वर्थनामकं सङ्कल्परत्नावल्याख्यङ्कर्मकाण्डग्रन्थञ् चकार किल। सोऽयङ् ग्रन्थः प्रचलित-चण्डी-रुद्रीपाठ–दान–श्राद्ध–पूजा–ग्रहमन्त्रजपादि–कर्मकाण्ड-सलँलग्नानाञ् जनानाङ् कृते उपयोगी दृश्श्यते । प्रथमम् १९८० तमे वैक्क्रमेऽब्दे लखनौनगरे मुद्द्रितोऽयङ् ग्रन्थः २०४०तमे वैक्क्रमेऽब्दे पुनर्मुद्द्रित उपलभ्यते । हरिनाथ-शर्मणा स्वहस्ताक्षरैर् लिखिता वाजसनेयिनित्यतर्पणपद्धत्त्यादिका बह्व्यः पद्धतयस् तद्वंशधरगृहे सुरक्षिता अवगम्यन्ते ।

९१. त्रिपुरानाथः (?–?)

नैपालनिलयोऽविज्ञायमानकुलाभिजनविशेषस् त्रिपुरानाथो नाम कश् चन पण्डितपुङ्गवश् शालग्रामपरीक्षाख्यङ् ग्रन्थं सञ्जग्राह किल । स च ग्रन्थः १९५५तमे वैक्क्रमेऽब्दे मुद्द्रितो रमानाथप्याकुर्यालकृतभूमिका-सहित उपलभ्यते ।

९२. प्रयागदत्तः पण्डितः (१९११–१९८० वै.)

नैपाल–त्रिशुङ्गाचलमण्डलाभिजनः काष्ठमण्डपनगरनिवासी हरिवंश-पण्डितपुत्त्रः श्रीधरपण्डितशिष्ष्यो रङ्गनाथ-गोपीनाथयोः पिता राजकीय-मुक्ख्य-पुरोहितम् प्रयागराजं समाश्श्रितो राजपुरोहितः प्रयागदत्तः पण्डितः खलु शिक्षारत्नन् नाम वेदान्तप्प्रकरणग्रन्थम् प्रणिनाय किल । स च ग्रन्थोऽमुद्द्रित एव तत्पौत्त्रादिगृहे लुठति । तस्स्य ग्रन्थस्स्याऽष्ट पद्द्यानि संस्कृतसंस्कृतेर् द्वितीयेऽङ्के मुद्द्रितानि सन्ति । तत्त्र ग्रन्थकारस् स्वरचितग्रन्थस्स्य महत्त्वन् ध्वनयन् वदति-"**दृष्ट्वा निर्माणमेतन् मम परमपदप्प्राप्तिकामो जनोऽयं शास्त्राण्यन्यान्यपश्श्यन्नपि परमपदप्प्राप्तये स्यात् समर्थः । न्यक्कृत्यान्यान् प्रतिष्ठां सदसि बहुवराम् प्राप्प्य यो वै धनाढ्द्यान्**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैयाकरणः कौण्डिन्न्यगोत्त्रो हरिनाथशर्मा प्याकुर्‍यालः
(१९०९ - १९८६ वै.)

(हरिनाथशर्मपौत्त्रप्रीतिनाथप्याकुर्‍यालदत्तातिरिक्तद्रव्यसाहाय्येन प्रकाशितम्
छायाचित्त्रम्)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्वन् स्वाभीष्टदातॄन् व्यवहृतिनिपुणोऽन्यानि शास्त्राणि पश्येत्" इति ।

९३. विश्वनाथ आचार्यः (१९१४-१९८६ वै.)

नैपाल-त्रितुङ्गाचलमण्डलान्तर्गतताम्रकूटग्रामनिवासी सूर्योपाद्ध्यायात् त्रयोदशो नैपालीयभाषाऽऽदिमहाकविभानुभक्तप्रख्यापिते **श्रीकृष्णाचार्यकुले** जातश् श्रीकृष्णाचार्याच् चतुर्थंश् शेखरापराभिधपद्मनाभपौत्रो देवदत्तपुत्त्रः पद्माकुक्षिजो व्यावहारिक-ज्योतिष-धर्मशास्त्र-पाणिनीयव्याकरण-कथापुराण-कर्मकाण्डनिपुणः कविर् विश्वनाथ आचार्यः कृषिप्रधानायावँ वृत्तौ व्याप्रियमाणोऽपि अद्ध्यापनपरायणस् समयेसमये आत्मना रचितानां संस्कृतपद्यानामेकाम् पुटिकां सञ्जग्राह किल । किन्तु सा पुटिका नाऽस्माकन् दृष्टिपथमागता । तत्र सङ्गृहीतानि कति चन पद्द्यानि मौखपरम्परया प्रासङ्गिकलेखपरम्परया चाऽऽगतानि प्राप्यन्ते । तानि च पण्डितकविराज-नरनाथाचार्यकृते भानुभक्ताचार्यजीवनचरित्त्रे, 'नेपाली' इत्याख्यायाम् पत्त्रिकायाञ् चतुश्चत्त्वारिंशत्तमेऽङ्के, भानुदर्शनपत्त्रिकायान् द्वितीयेऽङ्के च मुद्रितानि उपलभ्यन्ते । तेषु धर्मविषयकङ् "**गिरिशस्स्मरणादिषु प्रभग्नवँ वहते शोकभरन् न याति शान्तिम् । विधिना नरगात्रगोत्त्रपाते निहितम् मानसमेव वज्त्रमेतत्**" इति पद्यम्, प्रोषितभर्तृकाविषयन् "**दरी नाऽयङ् कुक्षिश् शिखरयुगलन् नाऽस्युगलञ् झरी नाऽऽश्रुव्रातो भुजयुगमिदन् न द्रुमयुगम् । भृगुर् नेदम् पृष्ठङ् गतवति सुमार्गे प्रियतमे मनोवज्त्र त्वम् माङ् खलु गिरिधिया दारयसि किम्**" इति पद्यञ् च विशेषतो मनोहरन् दृश्यते । उक्तायास् स्वविरचितमुक्तकादिसङ्ग्रहपुटिकाया अन्ते च "**विद्वद्देश्येन निर्णीता रम्या शास्त्रकथा किल । बालेनाऽस्फुटवाक्येन प्रोक्ता वाणी मनोहरा ।। करावलम्बङ् कुरुतेऽनुकम्प्य विलोक्य गन्तुः स्खलितम् महात्मा । धूर्तस् तु पाणिप्रतलौ प्रताड्य च विहस्य गाढं रमते दुरात्मा**" इत्युल्लिखितन् तत्त्रभवतेति च मौखपरम्परया ज्ञायते ।

९४. खड्गपाणिः अर्ज्यालः (१९१६-२००२)

नैपालगोर्खामण्डलाभिजनः काष्ठमण्डपनगरान्तर्गतटेङ्गलटोल्लकनिवासी जानकीदत्तपुत्त्रो महामायागर्भजः खड्गपाणिरर्ज्यालः कृत्यवाटिकाख्यन् तिथिकृत्यप्रतिपादनपरम् पौराणधर्मशास्त्रनिबन्धन् चकार किल । तत्त्र

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशेषतो नेपालदेशे प्रचलितानि कृत्यानि निरूपितानि दृश्यन्ते । स च निबन्धग्रन्थः २०३३तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते ।

९५. जयदेवसूरिः [पन्तः] (१९१६–१९७५ वै. ?)

नैपाल–पाल्पामण्डलाभिजनः काष्ठमण्डपनगरनिवासी नीलदेवपौत्त्रो वाचस्पति-ज्येष्ठपुत्त्रो जयदेवः पन्तस् सविवृतिकैस् सप्तचत्त्वारिंशता श्लोकैर् युताङ् कारककलिकाम्, सविवृतिकैः पञ्चत्रिंशता श्लोकैर् युतां समासकलिकाञ् च रचयामास किल । तौ द्वावेव ग्रन्थौ पृथक्पुस्तकतयैव कल्याणनगर्यालँ लक्ष्मीवेङ्कटेश्वरमुद्रणालये १९६२तमे वैक्रमेऽब्दे मुद्रितौ श्रीयुतपण्डित-जयदेवशर्मणा प्रकाशितावुपलभ्येते । तत्त्र नेपालदेशस्य पन्तकुलस्य वाऽप्युल्लेखो नैव दृश्यते । ग्रन्थादौ "गुरुवँ वाचस्पतिन् नत्वा बालानावँ विदुषाम् मुदे । जयदेवो वितनुते कलिकाङ् कारकस्य च" इति वाचस्पते-रुल्लेखोऽस्ति । तत्त्र "इति श्रीजयदेवशर्मसूरिविरचितायां शब्दतत्त्वकलिका-ख्यायाङ् कारककलिकाख्यो गुच्छः प्रथमः" इति गुच्छसमाप्ति-वाक्य-दर्श-नाज् जयदेवसूरिणा शब्दतत्त्वकलिकाख्यो ग्रन्थो विरचितः, तस्यैवैते द्वे प्रकरणे इति ज्ञायते । द्वयोरेव गुच्छयोरन्ते मुद्रितयोस् सदृशयोस् समाप्ति-वाक्ययोः काऽपि न्यूनता वाऽसङ्गतिर्वाऽपि च प्रतीयते ।

९६. क्षमादेवः पाँडेः (?–?)

नैपाल–पाल्पामण्डलाभिजनः काष्ठमण्डपनगरनिवासी नागेश्वरस्य दौहित्त्रो विजयराजभागिनेयो नगेन्द्रराजशिष्यः कुलनिधेः प्रनप्ता मणिरामस्य नप्ता श्रीलालरत्नाकरपुत्त्रः क्षमादेवः पांडेः पृथ्वीवीरविक्रम-चन्द्रसम्सेरजङ्ग-समये हरिवंशकथासूत्त्रप्रकाशिनीं रचयामास किल । तस्येयङ् कृतिः १९६८-तमे वैक्रमेऽब्दे मुद्रितोपलभ्यते ।

९७. डिल्लिसम्सेरवर्मा [थापाः] (? – ?)

नैपाल–दाप्चाग्रामाभिजनः काष्ठमण्डपनगरनिवासी हेमदलपौत्त्रः केसरसिंहपुत्त्रो डिल्लिसम्सेरवर्मा खलु चन्द्रसम्सेरपेरिसयात्त्रा–विषयकयँ यूरोपयात्त्रा–प्यारीसकाण्डन् नाम लघुङ् गद्यग्रन्थं रचयामास किल । तत्त्र प्रारम्भे "**अनभ्यासाद् धतप्राया प्रतिभाकल्पनोज्झिता । अङ्गैर् विहीना विद्या मे गमिष्यत्युपहास्यताम्**" इत्यादीनि पद्यानि च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोहराण्येव दृश्यन्ते । एष ग्रन्थो मुद्द्रणसमयाङ्कनरहितो नैपाल–नक्साल-भगवतीमुद्द्रणालये मुद्द्रित उपलभ्यते । डिल्लिसम्सेरस् थापास् संस्कृतम् आङ्गलभाषाञ्च रम्म्यरूपतया जानीते स्म, संस्कृताङ्गिरम् आङ्गलभाषाञ् च सुष्ठु व्याहरति स्म चेति उल्लेखो 'भएका कुरा' इति नैपालीयभाषाग्रन्थे काशिनाथदीक्षिताचार्यकृते ८४ तमे पृष्ठे दृश्यते ।

९८. सदाशिवो दीक्षिताचार्यः (१९२४–१९७५ वै.?)

नैपाल–काष्ठमण्डपनगरसमीपस्थमुडिखुग्रामाभिजनः काष्ठमण्डप-नगरस्थ–गैरिधारा–टोल्लकनिवासी शिरोमणि-दीक्षिताचार्यपुत्त्रस् सदाशिवो दीक्षिताचार्यः खलु १९५९तमे वैक्क्रमेऽब्दे नेपालदेशनिवासि–पण्डितवर-श्रीमदाचार्यशिरोमणिदीक्षित-साग्निचित्सर्वपृष्ठाप्तोर्यामयाजि-जीवनवृत्तान्त-रूपाञ् विशेषवृत्तसहितामाचार्यवंशावलीं रचयामास किल । सा च १९५९ तमे वैक्क्रमेऽब्दे मुद्द्रितोपलभ्यते । तस्स्या मुखपृष्ठे "आचार्यसदाशिव-दीक्षितेनोपनिबद्धा" इत्युल्लिखितन् दृश्यते । ग्रन्थान्ते तु "अब्दन् तातपदैकतानमनसौ संस्मृत्य सर्वन् चिरात् काशीनाथ–(१९२२–१९९४ वै.) सदाशिवौ प्रियतमौ भक्तौ सुतौ सुत्त्वनः । श्रीगङ्गाधर-शास्त्रिनिश्छलसुहृत्साहाय्यसिद्धोद्यमौ ग्रथ्नीतस् स्म विशेषवृत्त-सहितामाचार्यवंशावलिम्" इत्युक्तम् प्राप्यते। ग्रन्थकारस्स्याऽऽङ्गलवशवँ वद-राणाकुलाश्रितत्त्वाद् एतस्मिन ग्रन्थे आङ्गलकानां राणकानाञ्च प्रशंसा स्थाने स्थाने दृश्यते । तथापि श्रौतयज्ञपरिचयम् प्राप्तुमिच्छुकानाङ्कृते केनाऽप्यंशेन त्रुटिया युताऽपि शोभना सामग्री सुललितानि वर्णनानि चाऽत्त्र प्राप्यन्ते ।

९९. गिरीशवल्लभो जोसिः (१९२४–१९८०)

नैपाल–काष्ठमण्डपनगरान्तर्गत–चाबेलटोल्लकनिवासी लक्ष्मीवल्लभ-पौत्त्रो गङ्गानाथपुत्त्रो गिरीशवल्लभः खलु संस्कृतभाषायाम् पातञ्जल-योगसूत्त्रस्स्य व्याख्यां रचयामास किल । तेन विविधानि स्तोत्त्राण्यपि रचितान्यभूवन्निति शरच्चन्द्रभट्टराइप्रभृतयो वदन्ति ।

१००. उमानाथः अर्ज्यालः (१९२७*–?)

नैपाल–काष्ठमण्डपनगराभिजनः काशिवासी नारायणदासार्ज्यालपुत्त्र-

* उमानाथजन्मवर्षस्स्येयं सूचना ज्योतिषिकप्रेमसागरदवाडिपुत्त्रादुपलब्धेति शरच्चन्द्रभट्टराइमहाभागेनाऽस्मभ्यन् दत्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुदासवंशजो रामनाथपौत्रो बद्रीनदत्तपुत्र उमानाथोऽर्य्यालो नव्यन्याय-ग्रन्थेषु जागदीशपञ्चलक्षण्यादिषु बहुषु विवृतीश्चकार किल । तथैव नव्य-व्याकरणग्रन्थेषु लघुशब्देन्दुशेखरादिषु च विवृतीश्चकार । शब्दानामनेकेषा-मर्थानाम् परिकल्पने व्यसनी अयम् पण्डितः 'अथ प्रजानाम्' इत्यादेश् श्लोकस्य त्रिषष्टिम् अर्थान् प्रदर्शयामास किल । एतेन रचितेषु वामननाम-कौमुद्द्याःपृष्ठभागे उल्लिखितेषु चतुर्विंशतौ ग्रन्थेषु माथुरपञ्चलक्षणीविवृतिः, वामननामकौमुदी, गोपीगीतार्थकौमुदी चेति त्रयो ग्रन्था मुद्रिता उपलभ्यन्ते । एतद्वंशधराः काष्ठमण्डपनगरे वर्तन्ते ।

१०१. श्रीकान्तो घिमिरेः (१९२८–२०११ वै.)

नैपाल–रामेछापमण्डलान्तर्गताऽचैलेग्रामनिवासी मोहनलालपौत्रः पशुपतिनाथपुत्रो मनमायाकुक्षिजो देवीप्रसाद-टीकारामदाहाल-वासुदेवशास्त्रि-शिरोमणिदीक्षिताचार्य-शिवकुमारशास्त्रि-तात्याशास्त्रि–गङ्गाधरशास्त्र्यादि-शिष्यश् श्रीकान्तो घिमिरेः खलु त्रिशच्छ्लोक्यास् संस्कृतव्याख्यान् चकार किल । एतस्या हस्तलेखस्य च्छायाप्रतिलिपिस् सोमनाथघिमिरेमहाशयेन दत्ताऽस्माकं सङ्ग्रहेऽ स्ति । किन्तु तत्र पुस्तकमुखपृष्ठे पुस्तकपृष्ठभागे च "पं. घिमिरोपनामकश्रीकान्त उपाध्यायस्य" इत्येवंरूप उल्लेखः प्राप्यते, ग्रन्थादौ ग्रन्थान्ते वा व्याख्याकारनामाद्युल्लेखस्तु न दृश्यते । उपर्य्युक्त-प्रकारक उल्लेखश् श्रीकान्तस्य ग्रन्थकारत्वम् पुस्तकस्वामित्ववँ वा किवँ व्यनक्तीति विद्वांसो विदाङ्कुर्वन्तु । सोमनाथमहाशयस्तु अन्येषु व्याख्या-नेषु अप्राप्यवँ विशेषं समावेश्येदवँ व्याख्यानम् मया कृतमिति मम पिता वदति स्मेति, एतादृशा व्याख्यानग्रन्था मत्पितृकृता अन्येऽपि सन्तीति च ब्रवीति । स्वरचिते प्रकाशिते श्रीकान्तचरिते तु तेन श्रीकान्तकृतीनाङ कोऽ-प्युल्लेखो नैव कृतोऽस्ति । तज्जीवनचरितम् २०१५तमे वैक्रमेऽब्दे मुद्रिते आशौचविज्ञाने प्रकाशितमस्ति ।

१०२. भुवनेश्वरप्रसादः पण्डितः (१९३०–२००७)

नैपाल–काष्ठमण्डपनगरान्तर्गतज्ञानेश्वरटोल्लकनिवासी गौरीश्वरात् सप्तमो नारायणपुत्रवेणीप्रसादप्रनप्ता तीर्थराजनप्ता वामदेवपुत्रो दामोदर-शास्त्रिभारद्वाजादिशिष्यो भुवनेश्वरप्रसादः पण्डितः (पाँडे:) खलु वीरसम्सेरजङ्गराणाकीर्तिवर्णनान् चित्रकाव्यरूपां रचयामास। सा च १९५५-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तमे वैक्रमेऽब्दे मुद्रितोपलभ्यते । 'तत्रभवता देवसम्सेरविषयेऽप्येतादृशी रचना कृताऽभूत् साऽपि प्रकाशिताऽप्यभूत् किन्तु साऽस्माकङ् गृहेषु इदीनीन् नैवोपलब्धा इति, तत्रभवतः प्रौढतमा रचना तु जुद्धशतकमित्याख्याऽऽसीत्, तत्र पूर्णप्रसादब्राह्मणस्स्याऽपूर्णा व्याख्याऽप्यासीत्, किन्तु साऽपीदानीमस्माकङ् गृहेषु नैवोपलब्धा' इति च भुवनेश्वरप्रसाद-सुतः काशीश्वरप्रसादमहोदयः कथयति ।

१०३. करुणाकरः (? – ?)

नैपाल-पश्चिमप्रान्तस्थ-–"धौलकाँडा–तल्लोबोगटान"–नामकग्रामाऽभिजनः करुणाकरो दशकर्मादिपद्धतिं सञ्जग्राह किल । सा च पद्धतिर् मुद्रिताऽवगम्यते ।

१०४. कुलचन्द्रो गौतमः (१९३४–२०१५ वै.)

नैपाल–धादिङमण्डलान्तर्गत–जीवनपुरग्रामाभिजनो रमाकान्तपुत्रो रामशास्त्रितैलङ्गशिष्यो राममण्यनुगृहीतः किल कुलचन्द्रो गौताम्यो भिक्टोरियाया मरणे शोकमहोर्मिं रचयामास । एषा कुलचन्द्रस्य प्रथमा संस्कृतरचना दृश्यते । एषा च १९५७तमे वैक्रमेऽब्दे विश्वराजहरिहरशर्मभ्याम् मुद्रापयित्वाऽमूल्यवँ वितीर्णाऽवगम्यते । तदनन्तरलँ लकारार्थबोधनपरङ कृष्णकर्णाभरणकाव्यम् (१९७५), स्तवकाव्यरूपां हरिवरिवस्याम्, भागवतसङ्क्षिप्तार्थप्रदर्शनपराङ क्षेमेन्द्रीयभारतमञ्जर्यनुकारिणीम् भागवतमञ्जरीम् (१९८४)धर्मप्रतिकूललोकचरित्रचित्रणपराम् प्रपञ्चचर्चाम् (१९९३), अमरकोशपरिशेषम् (१९९३), रामजनकराजपण्डितपत्नीवियोगविषयाम् प्रेमपञ्चपञ्चाशिकाम् (१९९५), रामकृष्णचरित्रकीर्तनपरवँ वन्दनायुगलम् (२००५) च कुलचन्द्रो यथासमयं रचयामास किल । हरिवरिवस्याप्राभातिकोल्लासान्तर्गतो गङ्गागौरवस्स्तवश् च १९९२ तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते । काशीविद्वत्परिषत्-सभापत्यादीनाङ ग्रन्थप्रकाशनसम्मतिपत्रेण सहितम् आदर्शदम्पती सीतारामौ इत्याख्यङ कुलचन्द्रकृतलँ लघुकाव्यन् च २०१२ तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते । कुलचन्द्रेण चण्डी-रुद्रीप्रयोगविधिरचनापूर्वकङ गौरीशङ्करगुटिका सम्पादितेति च श्रूयते । विवाहपद्धतिस् तु तेन सम्पादिता दृश्यते च । जुद्धसम्सेरकृतस्वर्णतुलादानप्रसङ्गे जुद्धसम्सेरप्रशंसायामपि तेन वाणी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यापारिताऽवगम्यते । कुलचन्द्रेण रचितः "काशिकराजकीयसंस्कृतमहाविद्यालयः" इति पद्यात्मको लेखस् सारस्स्वतसुषमायाम् प्रथमे वर्षे प्रथमेऽङ्के प्रकाशितो दृश्यते । तत्र पञ्चचत्त्वारिंशदुत्तरैकोनविंशतिशततमवैक्रमाब्दात् प्रभृति पञ्चसप्तत्युत्तरैकोनविंशतिशततमवैक्रमाब्दयँ यावत् काशिकराजकीयसंस्कृतमहाविद्यालयेऽद्ध्यक्षपदे वर्तमानस्स्य आर्थर-वेनिसस्स्य प्प्रशंसया पूर्णानि "**माद्ध्वीकवँ विनिगृह्णणतैव वचसा योऽन्न्वग्रहीत् सङ्गतानौदार्यात् कृतकर्मणामपि मनो नॄणामहार्षीच् च यः । आर्थर्-बेनिसनामधेयमतुलप्प्रज्ञन् तमद्ध्यक्षता-भाजङ् कश् चिरमीक्षितं स्थिरमतिर् विस्स्मर्तुमीष्टे जनः ॥८॥ आकारे मृदुता मतौ प्रखरता माने समुत्तुङ्गता ज्ञाने निर्भरता मनस्स्यमलता वाचि व्व्यथाहारिता । सङ्ख्यावन्तमसङ्ख्यसद्गुणगणन् तम् बेनिसाक्ख्यवँ विना नैकत्त्रैक्षि जनेन केन चिदपि क्षोणीतले भ्राम्स्यता ॥९॥ नानालङ्कृतिमञ्जुलन् ध्वनियुतैस् तैस्तैर् गुणैस् सम्मतयँ येन प्प्राञ्जलमन्न्वदादि सकलवँ वाल्मीकिरामायणम् । तेनैवाऽखिलसंस्कृताङ्लविदुषान् धन्न्यान् धियन् धिन्न्वता विद्वत्ता-गुणिता-गुणग्ग्रहिलता अस्स्य प्प्रमाणीकृताः ॥१०॥**" इति पद्यानि दृश्यन्ते । कुलचन्द्रेणाऽमरकोशटीकायाः प्रथमे संस्करणे (१९५८तमे वैक्रमेऽब्दे) "गोताम्योपाभिधकुलचन्द्रशर्मणा भाषाटीकया संस्कृतः" इति स्वोपनामप्प्रयोगो "गोताम्य" इति कृतो दृश्यते । अत्रिगणान्तर्गतानाङ् गोताम्म्यानाम् अङ्गिरोगणान्तर्गतगोतमवंशजत्त्वभ्रमजनकतया गौतमोपनाम्ना व्यवहारोऽविचारितरमणीयो गताऽनुगतिकतया प्प्रचलन् विसंस्थुलस् समीकरणीयः प्रतीयते । कुलचन्द्राय राजा त्रिभुवनस् स्वेच्छया २००८तमे वैक्रमेऽब्दे 'विद्वच्छिरोमणिः' इत्युपाधिन् ददौ किल । स्वस्स्य विविधकाव्व्यरचनापटुत्त्वन् तु कुलचन्द्रेण प्प्रमाणीकृतन् दृश्यते, तेन कृतायाममरकोशटीकायावँ[1] विवाहपद्धतौ चाऽनेकेषान् दोषाणामुपलभ्यमानत्त्वाद् विद्वत्त्वन् तु तस्स्य समीक्षणीयमेव प्प्रतीयते ।

---

१. काष्ठमण्डपस्थस्स्य वाल्मीकिविद्यापीठस्य पत्रिकाया मर्यादाख्यायास् सप्तदशे पूर्णाङ्के प्रकाशितः "अमरकोशका ब्रह्मवर्गमा र तेसका कुलचन्द्रकृत टीकामा वर्तमान केइ आलोच्च्य विषयहरु" इति निबन्धो द्रष्टव्व्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०५. हेमराजशर्मा (१९३५–२०१० वै.)

नैपाल–काष्ठमण्डपनगरनिवासी गौरीश्वरादष्टमो नारायणपुत्त्र-नागेश्वरसुतविजयराजप्रनप्ता नगेन्द्रराजनप्ता लोकराजमद्ध्यमपुत्त्रो राज-कुलमाश्रितो हेमराजशर्मा [पाँडे:] पण्डितानामाङलभाषाविदाञ् च साहाय्येन द्वैतीयिककक्षाया अनुसन्धानकार्यङ्क कृत्वा प्रमेयबहुलम् भारतवर्षीयभैषज्ज्य-परम्परायास् स्वातन्त्र्यस्स्य समीचीनत्त्वस्स्य च प्रदर्शकम् महाकायमुपोद्घातं रचयित्वा तं सयँ योज्ज्य वृद्धजीवकीयतन्त्रापरनामधेयायाः काश्श्यपसंहिता-यास् सम्पादनङ्क कृत्वा ताम् मुद्रापयामास । स 'महाभारतसम्बन्धे कश्चन विचारः' इति निबन्धञ् च स्वनाम्ना कस्मिँश्चन भारतीयानुसन्धानपत्त्रे प्रकाशयामास किल । किन्त्वयन् निबन्धो नाऽस्माकन् दृष्टिगोचरीभूतः । हेमराजाय १९९२तमे वैक्रमेऽब्दे राजा त्रिभुवनो "विद्वच्छिरोमणिः" इत्युपाधिम् प्रददौ किल । किन्तु नैपालीयभाषाव्याकरणविषये यास्क-पाणिनि-कात्यायन–पतञ्जलि-वररुचि-भर्तृहरि-नागेशप्रभृतिभिराविष्कृतम् परिष्कृतवँ व्याक्ख्यातञ् चाऽऽर्षं शाश्श्वतम् भाषाव्याकरणसिद्धान्तमूलतत्त्वम् परि-त्यज्ज्य पाश्चात्त्यानुयायि–हिन्दि-बङ्गालि-मराठि-गुजराति-व्याकरणकारगता-ऽनुगतिकतावलम्बनङ्क कर्तुन् निस्सङ्कोचम् प्रवृत्तस्स्य[2] संस्कृतभाषा-नैपालीय-भाषा-वर्णमालाया ज्ञानेऽपि स्थूलान् त्रुटिङ्क कृतवतोऽस्य विद्वच्छिरोमणित्त्ववँ वैदिकर्षिकुलजैर् विवेचकैः पर्यालोचनीयम् प्रतीयते । काश्श्यपसंहितोपोद्घाते दृश्श्यान् दोषानपि[3] द्रष्टुं शक्नुवद्भिर् दोषज्ञैरप्ययस्स्य विद्द्वच्छिरोमणि-त्त्वस्स्य तत्त्वम् बोद्धुं शक्क्यन् दृश्श्यते ।

१०६. वेदनाथो लामिछाने: (१९३५–२०१८ वै.?)

नैपाल–गोरक्षाचलमण्डलान्तर्गतधावाग्रामाभिजनो धादिङ्मण्डला-

---

२. एतद्विषयकवँ विस्तृतम् प्रतिपादनम् 'जिम्दो नेपालि भासा (पैलो खण्ड)' इति नैपालीयभाषाग्रन्थे ३७–६५ पृष्ठेषु, 'जिम्दो नेपालि भासा (दोस्रो खण्ड)' इति ग्रन्थे २०९–२२३ पृष्ठेषु च दृश्श्यम् ।

३. हेमराजस्स्य वर्णमालाज्ञाने दृश्श्यमानास्त्रुटयः काश्श्यपसंहितोपोद्घाते दृश्श्यमानाः केचन दोषाश्च "जिम्दो नेपालि भासा (दोस्रो खण्ड)" इत्याक्ख्ये नैपालीयभाषाग्रन्थे २१५–२३१ इत्यङ्कितेषु पृष्ठेषु पर्यालोचितास् सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तर्गताऽचानेग्राममनिवासी मङ्गलशर्मणो नप्ता विमानपण्डितत्त्वेन प्रसिद्धस्य अच्युतानन्तस्य पुत्रो विष्णुहरेश् शिष्यो वेदनाथो लामिछाने: १९९८तमे वैक्रमेऽब्दे अग्निस्थापनमन्त्रार्थदीपिकाम् पूर्णाङ्ग कृत्वा मुद्रापयित्वा प्रकाशयामास किल । एतेन रचितो ध्वनिप्रकाशाख्य: पाणिनीय–वर्णसमाम्नाय-सूत्रव्याख्याग्रन्थोऽपि वाराणसेय-संस्कृतविश्वविद्यालय–वेदान्तविभागाऽध्यक्ष-पण्डितश्रीरघुनाथशर्मसम्मतिसहितो मुद्रितो दृश्यते । मुद्रण-समयस्तु तत्राऽङ्कितो नाऽस्ति ।

१०७. करुणाकर: पनेरु: (१९३८–२०१८ वै. ?)

नैपाल–डडेल्धुरामण्डलान्तर्गतकैलिपालमाण्डुग्रामन्त:पाति–जंसेरा-ग्रामटिकाभिजनो वाराणसीनिवासी कमलनयनपौत्रो रघुनाथपुत्र: करुणाकर: पनेरु: कर्मकाण्डप्रदीपं रचयामास किल । 'स च ग्रन्थ: २००८तमे वैक्रमेऽब्दे मुद्रितोऽभूत्, स एव ग्रन्थ इदानीं जनार्दनपाण्डेयकृतित्वेन मुद्रितोऽस्ति' इति करुणाकरभ्रातुष्पुत्रत्वेनात्मानम् परिचाययन् मोतिराम: पनेरु: कथयति ।

१०८. दधिरामशर्मा मरासिनि: (१९३९–२०२० वै.)

नैपाल-गुल्मिमण्डलान्तर्गताऽर्घोणमण्डलस्थवामरुकग्रामाऽभिजनस् साम्प्रतिकाऽर्घाखाँचिमण्डलान्तर्गतखिदिमग्राममनिवासी मणिरामपौत्र: परिक्षित्पुत्रो दधिरामो मरासिनिस् सप्तसर्गात्मकं श्रीरामचरितामृतम्, सप्तसर्गात्मकमेव श्रीकृष्णचरितामृतम्, गणेशवैभवम्, अपरोक्षानुभूतिं च रचयामास किल । तथैव स गण्डकीस्तोत्रादीनि नवदशानि स्तोत्राण्यपि चकार किल । तत्र सगणेशगौरवापरोक्षानुभूतिकं श्रीरामचरितामृतम् १९८५तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते ।

१०९. सोमनाथशर्मा सिग्देल: (१९४१–२०२९ वै.)

नैपाल–काष्ठमण्डपनगरसमीपवर्तिथाङ्कोटग्रामाभिजन: काष्ठमण्डप-नगरनिवासी उपराजगुरु–हेमराजाऽनुगृहीतो मुक्तिनाथनप्ता जगन्नाथपुत्रस् सोमनाथशर्मा सिग्देल: खलु संस्कृतचन्द्रिकाऽनुवादचन्द्रिकादीन् ग्रन्थान्, आदर्शराघवपुष्पाञ्जलि स्तवकाव्यम्, भट्टोजिदीक्षितकृतिप्रतिसंस्कारात्मिकाम् प्रतिसंस्कृतसिद्धान्तकौमुदीं च विरचयामास किल । तत्र सोमनाथ-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतङ् काव्यमाहार्यालङ्कारभारावनतन् नाऽतिसरसमपि साधारणजनमनोहरणक्षमन् दृश्यते । प्रतिसंस्कृतसिद्धान्तकौमुदी च परित्यक्तवैदिकप्रयोग-विषय-स्वरविषया पाणिनीयवँ व्याकरणवँ विकलतयोपस्थापयन्ती अन्न्य-विविधोपयोगि-विषयसङ्ग्रहयुताऽपि अशुद्धिबहुला साधारणानाञ् जनानामप्र-योज्ज्या दुष्टांशम् परिहृत्त्य विद्वद्भिस् सावधानतयोपयोज्ज्या दृश्यते । यथा भट्टोजिदीक्षितशिष्ष्या भट्टोजिदोषपरिमार्जनेन सिद्धान्तकौमुदीं समुज्ज्व-लाङ् कर्तुम् बद्धपरिकराः कर्माऽकार्षुर् न तथा राजनीतिक-क्रियाकलाप-परायणास् सोमनाथशिष्ष्या इति तदीया **"स्वर् याता गिरिजाऽऽत्मजः प्रथमतश् शान्तिस् सुता निर्धवा, दोलाख्या ललिताऽप्यपत्त्यरहिताऽ-शीतेरुपान्ते वयः । अन्तेवासिपरम्परास्स्वभिरुचि सस्नेहमातन्न्वती, विद्द्यासन्ततितन्तुदीपकविभाम् पुष्णात्वसौ कौमुदी"**[1] इत्याऽऽशंसाऽपि वितथीभूतेव दृश्यते । नैपालीय-भाषाव्याकरणविषयेऽप्येतेन यास्क-पाणिनि-कात्त्यायन-पतञ्जलि-वररुचि-भर्तृहरिप्रभृतिभिस् सम्म्यक् परिष्कृत्त्योपस्थापितं शाश्श्वतवँ व्याकरणसिद्धान्तम् परित्यज्ज्य पाश्चात्यगतानुगतिकताऽवलम्बिता दृश्यते[2] । संस्कृतभाषा-नैपालीयभाषावर्णमालाज्ञानेऽपि एतेन स्थूलास् त्रुटयः कृता दृश्यन्ते[3]। एवञ्च राज्ञा महेन्द्रेण स्वमनीषया सोमनाथाय दत्तः 'पण्डित-राजः' इत्युपाधिः सोमनाथे सार्थकीभूतो न वेति वैदिकैरार्यैर् विवेचकैः परि-चिन्तनीयम् प्रतीयते ।

११०. फत्त्यजङ्गपराक्क्रमसाहः (१९५०–२०३४ वै.)

नैपाल-काष्ठमण्डपनगरान्तर्गतबानेश्श्वरटोल्लकनिवासी सम्मेरजङ्ग-पराक्क्रमपौत्त्रः केसरिजङ्गपराक्क्रमपुत्त्रो मथुराकुमारीकुक्षिजो भोगेन्द्रराजा-दिशिष्ष्यः फत्त्यजङ्गपराक्क्रमसाहः खलु श्रीदक्षिणकालिकाविभूतियोगस्तोत्त्रं रचयामास किल । तच्च स्तोत्त्रं २०२३तमे वैक्क्रमेऽब्दे मुद्रितमुपलभ्यते ।

---

१. प्रतिसंस्कृताया सिद्धान्तकौमुद्या आदौ "किञ्चिदावेदनम्" इत्यत्त्र द्रष्टव्यम् ।

२. एतद्विषयकवँ विस्तृतम् प्रतिपादनम् 'जिम्दो नेपालिभासा (पैलो खण्ड) [२०३०]' इति नैपालीयभाषाग्रन्थे ३७–६५ पृष्ठेषु दृश्श्यम् ।

३. एतस्स्य विषयस्स्य स्पष्टीकरणम् "नेपालि वर्णोच्चारणशिक्षा" इति नैपालीयभाषाग्रन्थस्स्य साजाप्रकाशनेन प्रकाशितस्स्य (२०३१ वै.) पञ्चमाऽष्टमनवमेषु परिशिष्टेषु द्रष्टव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१११. दैवरातः (?–?)

अविज्ञायमानकुलाभिजनादिविशेषो गजाननपुत्रो रमणमहर्षिशिष्यो नैपाल–काष्ठमण्डपोपत्यकान्तर्गतगोकर्णस्थ–गोरक्षा-ब्रह्मचर्याश्रमकुलपतिर् दैवरातः खलु पशुपतिहृदयन् नाम पशुपतिनाथस्वरूपादिविचारात्मकङ् ग्रन्थं रचयामास। स च ग्रन्थो नैपालीयभाषाप्रकाशिन्या समित्या प्रकाशितो मुद्रित उपलभ्यते। एष दैवरातो २००५तमे वैक्रमेऽब्दे स्थापितस्य पञ्चविंशतिसदस्यकस्य नैपालविश्वविद्यालययायोगस्य च पञ्चविंशस् सदस्योऽवगम्यते।

११२. नित्यानन्दस् सिग्देलः (१९५१-२०२३)

नैपाल-काष्ठमण्डपनगरान्तर्गतकालिमाटिकलङ्किस्थानटोललकनिवासी बुद्धिसागरपुत्रो रुमाकुक्षिजो नित्यानन्दस् सिग्देलो नेपालदेशादिवर्णनात्मकं हिमालदर्पणं रचयामास। स च ग्रन्थः २०१४तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते। भाषादृष्ट्या तत्राऽनेके दोषा दृश्यन्ते। तेन पुष्पाञ्जलिरिति राजस्तुतिपरोऽन्योऽपि ग्रन्थो रचितो मुद्रितश्चोपलभ्यते।

११३. धनसम्सेरजङ्गो राणाः (१९५२–२०३९)

नैपाल–काष्ठमण्डपनगरान्तर्गतनक्शालटोललकनिवासी वीरसम्सेर-जङ्गपौत्रो रुद्रसम्सेरजङ्गज्येष्ठपुत्रो विष्णुकुमारीकुक्षिजो भोगेन्द्रराज–कोशनाथ–दुर्गानाथादिशिष्यो धनसम्सेरजङ्गो राणाश् श्रीपराविभूतिस्तोत्रम् [१९८९], योगानन्दलहरीम् [१९८९], श्रीस्तोत्रमञ्जरीम्, परामहिमस्तोत्रम् [२००२]; पराङ्गस्तवराजञ् च [२००२] रचयामास। शाक्ततन्त्रसम्बद्धा एते सर्वे ग्रन्थाः प्रकाशिता अवगम्यन्ते।

११४. शिवप्रसादस् सिग्देलः (१९५३–२०१६)

नैपाल–काष्ठमण्डपनगरोपकण्ठस्थदहचोकग्रामनिवासी लक्ष्मीकान्त-पौत्रो बुद्धिप्रसादपुत्रो नन्दकुमारीकुक्षिजश् शिवप्रसादस् सिग्देलः खलु श्रीपतेर् भक्त्या षट्प्रकरणकवं विशालाभजनन् नाम काव्यं रचयामास। तच् च १९९९तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते।

११५. पद्मप्रसादो भट्टराइः (१९५३–२०३० वै.)

नैपाल–रामेछापमण्डलान्तर्गतसालुसामलिग्रामाभिजनः काष्ठमण्डप-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नगरान्तर्गतगैरिधाराटोल्लकनिवासी दीनानाथपुत्त्रः कृष्णमायाकुक्षिजो राजगुरुखगेन्द्रराजानुगृहीतः किल पद्मप्रसादो भट्टराइः २०१७तमे वैक्रमेऽब्दे नेपालाधिपतेरभिनन्दनञ् चकार किल। तत्त्र च **"अद्य च निर्वाचनमदविकारदूषितमन्त्रिवर्गेऽस्मिन्। अस्तम् प्रयुज्य वैधं राष्ट्रियता रक्षिता बाढम्"** इति पद्यमपि दृश्यते। एतच् चाऽभिनन्दनम् २०४१तमे वैक्रमेऽब्दे प्रकाशिते पद्मस्स्मृतिग्रन्थे पद्मकृतितत्त्वप्रकाशप्रकरणे १०५–१०६ इत्यङ्कितयोः पृष्ठयोर् मुद्रितमस्ति। अन्येऽपि तस्य लेखास्तत्त्र सङ्कलिता दृश्यन्ते।

११६. जयराजशर्मा [पाँडे:] (१९५३–२०३३ वै.)

नैपाल–काष्ठमण्डपनगराभिजनो भारतीयमहाराष्ट्रप्रान्तस्थबम्बैनगरनिवासी विजयराजप्रनप्ता द्विजराजनप्ता कुवलयराजपुत्त्रो जयराजशर्मा खलु धर्मविचारसारम् प्रतिपादयितुन् धर्मशतकम्, अर्थविचारसारम् प्रतिपादयितुम् अर्थशतकम्, मोक्षविचारसारम् प्रतिपादयितुवँ विवेकशतकञ् च रचयामास। तत्त्र विवेकशतकम् २००८तमे वैक्रमेऽब्दे, अर्थशतकम् २०१३तमाद् वैक्रमाब्दात् पूर्वमेव, धर्मशतकञ् च २०१३तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते।

११७. दामोदरशर्मा झाः (?–?)

नैपाल–सप्तरिमण्डलान्तर्गतसकरपुराग्रामनिवासी दामोदरशर्मा झाः खलु २००३तमे वैक्रमेऽब्दे बालबोधरामायणं रचयामास किल।

११८. शिवशङ्करो झाः (१९५४–२०३९ वै.)

भारतीयविहारप्रदेशान्तर्गतदरभङ्गामण्डलस्स्थ–साहपुरग्रामे कुजौलिकुले जातो रूपनाथप्रपौत्त्रो जलपादत्तपौत्त्रो वेदानन्दपुत्त्रो बेचनीकुक्षिजस् स्वीयज्येष्ठपितृव्यविद्यानाथप्रसादलब्धविद्यो नैपाल–सम्प्रशासननियोगं स्वीकृत्याध्यापनकार्यप्रसङ्गेन नैपाल–जनकपुर–मटिहानिप्रभृतिषु स्थानेषु निवसन् शिवशङ्करो झाः वेदपरिचय–नामकलँ लघुङ गद्यग्रन्थं रचयामास। स च विद्यापरिचयनामकस्य ग्रन्थस्य वेदपरिचयात्मकः प्रथमो भाग इत्यवगम्यते। ग्रन्थकर्तुः पुत्त्रेण वैद्यनाथझामहाभागेन २०१४तमे वैक्रमेऽब्दे प्रकाशितोऽयङ ग्रन्थो मुद्रित उपलभ्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११९. पुष्पराजो राजभण्डारी (१९५५–२०४५ वै.)

नैपाल–काष्ठमण्डपनगरान्तर्गतवटुगुच्चाटोल्लकनिवासी कीर्तिराजपुत्त्रः पुष्पराजो राजभण्डारी धर्मविषयाणाम् अध्यात्मविचारविषयाणाञ् चाऽऽर्षवचनानाम् भगवच्चन्द्रिकाख्यं सङ्ग्रहन् चकार । स च सङ्ग्रहो निरनुवादो नैपालीयभाषानुवादसहित आङ्गलभाषानुवादसहितश्चेति त्रिधा बहुवारम् मुद्रितः प्रकाशित उपलभ्यते ।

१२०. रामनाथ आचार्यः (१९५५–२०३५ वै.)

नैपाल–गोरक्षमण्डलाभिजनः काष्ठमण्डपनगरान्तर्गतवानेश्वरटोल्लकनिवासी गिरिधारिपौत्त्रः कृष्णपुत्त्रः पिङ्गलाकुक्षिजो रामनाथ आचार्यो विविधानां समयेसमये रचितानां संस्कृतपद्यानाम् पद्यमालिकाख्यं सङ्ग्रहं चकार । स च सङ्ग्रहो मुद्रित उपलभ्यते ।

१२१. उमानाथ आचार्यः (१९५७–२०१७ वै.)

नैपाल–त्रितुङ्गाचलमण्डलान्तर्गतचुँदिताम्रकूटग्रामाभिजनः काष्ठमण्डपनगरान्तर्गतचण्डोलग्रामनिवासी सूर्योपाध्यायाच् चतुर्दशश् श्रीकृष्णाचार्यात् पञ्चमो देवदत्तपौत्त्रो लोकनाथपुत्त्रो दुर्गादत्तखँदालदौहित्त्रो यशोदाकुक्षिजो विश्वनाथाचार्य–टेकनाथपौड्याल–काशिनिवासिप्राणाचार्यधर्मदासगणनाथसेनादि-शिष्यः प्राणाचार्य उमानाथ आचार्यो वार्ता-त्रयी-दण्डनीत्यान्वीक्षिकी–संहिता–सारसङ्ग्रहात्मक–शास्त्रकाव्यरूपां संहितासारवाङ्मयीमररचत् । तत्त्र सत्यसवनकाण्डम्, त्रेताकाण्डम्, द्वापरकाण्डम्, कलिकाण्डञ् चेति चत्वारि काण्डानि तत्त्र भवता प्रकल्पितानि । तत्त्र सत्यसवनकाण्डन् तत्त्रभवता सम्पूर्णम् परिशोधितन् निष्पादितम् । अन्येषाङ् काण्डानान् तु तत्त्रभवता प्राथमिकरचनारूपेण पद्यानि कृतानि, किन्तु तानि परिशोधनीयानि व्यवस्थापनीयानि चासन् । एतादृश्यामेवाऽवस्थायान् तत्त्रभवान् २०१७तमे वैक्रमेऽब्दे आषाढमासे शरीरमुत्ससर्ज । तत्त्रभवतः कृतेरुपलब्धोंऽशः पुत्त्रस्य नरहरेराचार्यस्य पार्श्वे वर्तते । सत्यसवनकाण्डस्य पूर्वस् सर्गस् तु त्रिभुवनविश्वविद्यालयान्तर्गतसंस्कृताध्ययनसंस्थानस्य पत्त्रिकायां हैमवत्याम् प्रथमे वर्षे प्रथमेऽङ्के मुद्रितः प्रकाशितोऽस्ति । किन्तु तत्त्र कस्यचन सम्पादकस्य विरोधाद् **"यः कर्तितुम् परकरग्रहपाशबन्धम्, मातुः कुशाग्रधिषणो व्यदधात् प्रबन्धम् । सिद्धा यतस् तदनुगा अपि**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



उमानाथ आचार्यः
(१९५७ - २०१७ वै.)

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यनिष्ठः कोऽस्मात् परोऽत्र सुकृती तिलकान् महिष्ठः ।।१६।। विद्यासु हन्त हि परास्स्वपि लब्धपारश् चाऽज्ञानवार्धिपतितोद्धृति-कर्णधारः। विद्द्यालययँ य उदजीघटदग्रगण्यन् तम् मालवीय-विबुधङ गणयामि धन्यम् ।।१७।। इत्येतादृशानि कति चन पद्यानि असमाविष्टानि सन्ति ।

१२२. कुसुमाकर उपाद्ध्यायो रेग्मिः (१९५८–२०३२ वै.)

नैपाल-धादिङमण्डलान्तर्गत-सल्ल्यान-लकुआग्रामनिवासी केसरपौत्रो महेश्वरपुत्त्रो रेणुकाकुक्षिजष् टेकनाथपौडेलशिष्यस् सण्टरबुडाथुम-पाठशालाद्ध्यापकः कौशिकगोत्रः कुसुमाकर उपाद्ध्यायो रेग्मिर् भक्तिसङ्ग्रहाख्यङ ग्रन्थं रचयामास । संस्कृतपद्यात्मको नैपालीयभाषानुवादसहितस् स ग्रन्थः २०१३तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते । तेन रचितौ शक्तिभूषण–वर्णदर्पणतरङ्गाख्यावन्त्यावपि द्वौ ग्रन्थावमुद्रितौ तत्पुत्त्रगृहे स्थितौ श्रूयेते ।

१२३. गणेशप्रसादः [गायत्त्रीगणेशः] अर्ज्यालः (१९५८–२०२४ वै.)

नैपाल–गोर्खामण्डलान्तर्गतवक्राङ्पुराणग्रामनिवासी मोदनाथपौत्रो वेदशर्मपुत्त्रो गणेशप्रसादो (गायत्त्रीगणेशो)ऽर्ज्यालो रामभक्तमालाम्, गोरखा-मनःकामनास्तोत्त्रम्, कृष्णगण्डकीस्तोत्त्रम्, गोरक्षकालिकास्तोत्त्रम्, कालिकापञ्चदशीत्यादिकान् ग्रन्थांश् च प्रणिनाय किल । तत्र रामभक्तमाला २०१५तमे वैक्रमेऽब्दे मुद्रिता प्रकाशिता च वर्तते ।

१२४. माधवप्रसादो देवकोटाः (१९६०–२०३८ वै.)

नैपाल-गोरक्षाचलमण्डलान्तर्गतलिग्लिगबोहोराग्रामाभिजनः पाल्पा-तान्सेननगरनिवासी पुष्करनाथपुत्त्रो माधवप्रसादो देवकोटा गणेशगौरव-पुरस्सरम् भारतीवैभवं स्तवकाव्यम् (२०१०), लघुकाव्यसङ्ग्रहरूपाम् ऊर्मिमालाम् (२०३८), जीवनदानन् नाम लघुकाव्यन् (२०३८) च यथा-समयं रचयामास किल । एते सर्वे ग्रन्था मुद्रिताः प्रकाशिता उपलभ्यन्ते । एतेषु काव्येषु काव्यसौष्ठवं सर्वत्राऽनुगतन् दृश्यते ।

१२५. अग्निप्रसादः खरेलः (१९६१ वै.–?)

नैपाल–धनकुटामण्डलान्तर्गत·याङरुपोपमण्डलस्थे ओयामग्रामे निवसन्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मलालपुत्रो रामचन्द्रानुजोऽग्निप्रसादः खरेलः खलु अनुजयोश् श्रीप्रसाद-भवानीप्रसादयोश्च सहयोगेन ग्रहराशिदर्पणसारिणीं रचयामास किल । सा च १९९१तमे वैक्रमेऽब्दे मुद्रितोपलभ्यते। तत्र सङ्क्रान्तिदर्पणः, ग्रहोदयास्तादिविचारः, अन्तर्दशा, जन्मपत्रनिर्माणविधिः, भावफलादिविचारश्चेत्यादयो विषयास् सन्ति । तत्र "देशान्तरेषु चलितङ्किल मानितानाम् प्रत्यन्तरवँ विमलमन्तरसयँयुतञ्च । सूक्ष्मान्तरेण सहितं सकलन् दशानाङ्कुर्मो वयवँ विबुधमानसरञ्जनाय" इति प्रतिज्ञावाक्यन् दृश्यते ।

१२६. उमानाथः पन्थिः (१९६१–२००३ वै.)

नैपाल–गुल्मिमण्डलान्तर्गत–धुर्कोटग्रामनिवासी ढुण्ढिराजपुत्र उमानाथः पन्थिः कुलचन्द्रगोताम्यकृतगङ्गागौरवस्तवानुकारि गण्डकीगौरवं नाम लघु स्तवकाव्यं हृषीकेशस्तोत्रञ्च रचयामास किल । तच् च लघुस्तवकाव्यद्वयन् तत्पत्न्या हरिकलया २००७तमे वैक्रमेऽब्दे मुद्रापयित्वा प्रकाशितमुपलभ्यते ।

१२७. छविलालः पोखरेलः (१९६२ वै.-)

नैपाल–धनकुटामण्डलान्तर्गतकचिडेग्रामाभिजनस् सुनसरिमण्डलान्तर्गत-धराननगरनिवासी रामनाथपौत्रो वेदनिधिपुत्रश् छविलालः पोखरेलो मुक्ताचयनन् नाम संस्कृतसूक्तिसङ्ग्रहम्, लघुकौमुदीसरलीकृतिरूपङ्कौमुदीसारञ्च रचयामास । तौ द्वावेव ग्रन्थौ उपयोगिनौ दृश्येते । तौ मुद्रितौ च प्राप्येते ।

१२८. बद्रिनाथस् सुवेदी (१९६२–२०३१ वै.)

नैपाल–कास्किमण्डलान्तर्गत-स्याक्लुङग्रामाभिजनो लमजुङमण्डलान्तर्गत–पाम्चोक–ग्रामे जातः खुदिवेनिनिवासी माधवपौत्रः कमलापतितृतीय–पुत्रो धर्मागर्भजः पुष्करावतीरयालचौरस्थपण्डित–दीननाथस्य काष्ठमण्डपनिवासिपण्डितदधिरामपौड्यालस्य च शिष्यो बद्रिनाथस् सुवेदी रुद्राध्यायसारः, महेन्द्रोदयम्, संस्कृतसंस्कृतिरक्षणम्, आचारनिर्देशः, महेन्द्रोदयसंस्कृतविद्यालयस्येतिवृत्तम् इति ग्रन्थांश्चकार किल । तेषु रुद्राध्यायसारः २०२२तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते । तत्र ग्रन्थकारस्य "**क्व वा शम्भोश्चर्चा क्व च निगमवाक्यं सुमहितङ्क्व चाऽहं संसारे विषयविषलोलोऽल्पमतिकः । तथाप्युत्साहस् स्यान् मम**

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बुधजनाँस् तत्परयितुवँ विलीनोऽयम् पन्थाः कथमिति विषादाक्त-मनसः'' इति भणितिरपि हृदयग्राहिणी दृश्यते ।

१२९. नरनाथ आचार्यः (१९६२–२०४५ वै.)

नैपाल–त्रिउङ्गाचलमण्डलान्तर्गत–चुँदिताम्रकूटग्रामनिवासी सूर्योपाध्यायाच् चतुर्दशश् श्रीकृष्णाचार्यात् पञ्चमो देवदत्तपौत्रो लोकनाथपुत्रो दुर्गादत्तखँदालदौहित्रो यशोदाकुक्षिजो विश्वनाथाचार्योमानाथाचार्यादि-शिष्यो नरनाथ आचार्यः प्रतिसंस्कृतचतुराशीतिपूजापद्धतिं रचयामास । सा च पद्धतिस् तद्धस्तलिखिता प्रकाशनोन्मुखी तत्पुत्रगृहे सुरक्षिता वर्तते । तत्रभवता समयेसमये रचितानि संस्कृतपद्द्यानि नैपालीयभाषापद्यैस् सह सङ्गृहीतानि ''पद्यमाला'' इतिनाम्ना २०४०तमे वैक्रमेऽब्दे मुद्रितान्युपलभ्यन्ते ।

१३०. जीवनाथो झाः (१९६३ ?– २०३८ ? वै.)

भारतीयविहारप्रान्तान्तर्गतदरभङ्गामण्डलान्तःपाति–सरिसवग्रामस्थ-पाहिटोल्लकाभिजनो नैपालसम्प्रशासननियोगं स्वीकृत्य जनकपुर-संस्कृत-प्रधानपाठशालाद्ध्यापकत्त्वमाचरन् जनकपुरे निवसन् नेपालदेशं स्वकार्यक्षेत्रङ्कुर्वाणो दीनबन्धुझापुत्रो जीवनाथो झाः खलु महेन्द्रप्रतापोदयन् नाम लघुकाव्यञ् चकार । तच् च काव्यम् मुद्रितमुपलभ्यते । अस्य वीरेन्द्राभि-नन्दनमिति पद्याष्टकमपि हैमवत्याः पत्रिकायाः प्रथमेऽङ्के प्रकाशितन् दृश्यते । अन्येऽपि तस्य बहवो लघवस् संस्कृतग्रन्थास् सन्तीति श्रूयते ।

१३१. रविनाथष् ठक्कुरः (?–?)

भारतीयविहारप्रान्तस्थदरभङ्गामण्डलान्तर्गततरुवनीग्रामाभिजनश् श्रोत्रियवंशजो बबुआशर्मपुत्रो मुक्तिनाथशर्म–बालकृष्णमिश्रादिशिष्यो रविनाथष् ठक्कुरो नैपालसम्प्रशासननियोगमङ्गीकृत्य मटिहानिसंस्कृतप्रधान-पाठशालायान् न्यायव्याकरणाद्ध्यापनकार्यमाचरन् मटिहानिग्रामे निवसन् न्यायरत्नावलीं रचयामास किल। तेन स्वपितृपितामहादिजीवनवृत्तान्तवर्णनपर-मेकं पद्यकाव्यमपि रचितमस्तीति तच्छिष्यो गोविन्दचौधरिमहाशयो वदति । एतौ द्वौ ग्रन्थौ मुद्रितावपि स्त इति स एव ब्रवीति । अन्येऽपि तदीयाः प्रौढ-पाण्डित्यपूर्णा ग्रन्था अभूवन्, ते तु कस्स्य हस्ते पतिता इति नज्ञायते इति च स एव प्रतिपादयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३२. शेषराजो रेग्मिः (१९६४–२०४४ वै.)

नैपाल-काष्ठमण्डपनगरान्तर्गत-नक्कशालटोल्लकनिवासी देवचन्द्रपुत्त्रो-हेमकुमारीगर्भज उमानाथार्य्यालशिष्यत्त्वेन कैश्चिदुच्च्यमानश् शेषराजो रेग्मिः भट्टिकाव्यटीकाम्, उत्तररामचरितटीकाम्, मालतीमाधवटीकाम्, मेघदूतटीकाम्, प्रसन्नराघवटीकाम्, स्वप्नवासवदत्तटीकाम्, साहित्यदर्पणटीकाञ् च प्प्रायेणाऽऽधुनिकपरीक्षाप्रणाल्ल्युपयोगितया रचयास । रघुवंश–किराता-र्जुनीय–शिशुपालवध–नैषधीयचरित – दशकुमारचरित –कादम्बर्यादिग्रन्थानाम् परीक्षासु निर्धारितेषु भागेष्ववपि तेन टीका रचितास् सन्ति । उपर्युक्तास् सर्वा एव टीका यथासमयम् मुद्द्रिता उपलभ्यन्ते ।

१३३. चिरञ्जीवी पोख्रेलः (१९६४ वै.–)

नैपाल-काष्ठमण्डपमण्डलान्तर्गतकीर्तिपुरचोभारनिवासी नारायणपौत्त्रो यदुनाथपुत्त्रश् चिरञ्जीवी पोख्रेलः आदिनाथाष्टकन् नाम स्तवकाव्यं रचयामास । तच् च २०१५तमे वैक्रमेऽब्दे मुद्द्रितमुपलभ्यते ।

१३४. जुनन्नाथः पण्डितः (१९६५–२०४७ वै.)

नैपाल–त्रितुङ्गाचलमण्डलान्तर्गत-सुरपुरीसमीपस्थौपरिष्टचँ्दिसिम्पानि-ग्रामाभिजनः काष्ठमण्डपनगरान्तर्गतलाजिम्पाटटोल्लकनिवासी महाराज-गुरुपदमप्प्यारूढो देवदत्ताचार्यदौहित्त्रश् श्रीधरपण्डितपौत्त्रश् शतञ्जीवि-पण्डितसूनुः खिनादेवीगर्भजो प्रयागदत्त–मोदनाथ–टेकनाथ–हरिनाथशुक्ल–रामचन्द्रखनङ्ग–चिन्नस्स्वाम्म्यादिशिष्यो जुननाथः पण्डितो निर्णयसिन्धु-सिद्धान्तसाराख्यम् प्रतिसंस्कृतनिर्णयसिन्धुरूपन् धर्मशास्त्रनिबन्धग्ग्रन्थं रचया-मास । स च ग्रन्थः प्रकाशनापेक्षी वर्तते ।

१३५. मीनप्रसादो नेपालः (१९६७–२०३५ वै.)

नैपाल–पाल्पामण्डलान्तर्गत–खसेउलि–देउरालि-निवासी भीमलालशर्मणः पुत्त्रो मीनप्रसादो नेपालः "ईश्श्वरास्तित्त्वसिद्धौ मानानि" इत्त्याख्यन् तार्किकग्रन्थञ् जग्ग्रन्थ किल । कैश्चिद् विवेकशिथिलैर् वेदान्तग्रन्थत्त्वेन जेगीय-मानोऽन्यैः पुनस् सप्तमास्तिकदर्शनत्त्वेन स्तूयमानस् स ग्ग्रन्थो "मीनोक्त-मीश्श्वरदर्शनम्" इति शीर्षकन् दत्त्वा नेपाल-सम्प्रशासन–सञ्चार–मन्त्रालय-सूचनाविभागेन २०४१ तमे वैक्रमेऽब्दे मुद्द्रापयित्त्वा प्रकाशित उपलभ्यते । तत्त्र मीनोपात्ताः के चन तर्का बाललालनमात्त्रफला अपि दृश्श्यन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३६. लोकनाथो ढकालः (१९६७ वै.–)

नेपाल–सँखुआसबामण्डलान्तर्गत–चइनपुरस्थे ओयाकग्रामे जातः खँराङखत्रिग्रामापराभिधे वानेश्वरग्रामे पूर्वं स्थितः काष्ठमण्डपनगरान्तर्गतवानेश्वरटोल्लकनिवासी श्रीहर्षापराभिधलोकनाथपौत्रो गङ्गाधरपुत्रो विष्णुमायाकुक्षिजो लोकनाथो ढकालः पञ्चोत्तरशतपद्यात्मकम् पद्मप्रसाद-भट्टराइजीवनचरितं श्रद्धाञ्जलल्याख्यं रचयामास । तच् च २०३१तमे वैक्रमेऽब्दे त्रिभुवनविश्वविद्यालय–संस्कृताद्ध्ययनसंस्थानेन प्रकाशिते श्रद्धाञ्जलल्याख्ये ग्रन्थे सङ्गृहीतन् दृश्यते ।

१३७. सोमनाथो घिमिरेः (१९६८ वै.–)

नेपाल–रामेछापमण्डलान्तर्गताऽर्चलेग्रामाभिजनः काष्ठमण्डपनगरान्तर्गत-टङ्गालटोल्लकनिवासी पशुपतिनाथनप्ता श्रीकान्तपुत्रः कमलागर्भजस् सोमनाथशर्मा घिमिरेस् स्वपितुः श्रीकान्तस्य जीवनचरितम्, शालग्राम-मीमांसाम्, संस्कृतमयनेपालदेश इति लघुङ्ग्रन्थम्, श्रीविष्णोःपौराणिकपूजापद्ध-तिञ् च रचयामास । एते सर्वे ग्रन्था मुद्रिताः प्राप्यन्ते । तत्र शालिग्राम-परीक्षेति हस्तलिखितो ग्रन्थस् त्रिविक्रमकृतो नेपालराष्ट्रियाभिलेखालये षष्ठ्याम् पञ्जिकायाम् २०६ सङ्ख्यायाम् उल्लिखितो दृश्यते, नेपालनिलय-पण्डितपुङ्गवत्रिपुरानाथसङ्गृहीता शालग्रामपरीक्षा मुद्रिताऽप्युपलभ्यते । तस्यां रमानाथशर्मणा भूमिका योजिता दृश्यते । प्रस्तुतायाश् शालग्राम-मीमांसायास् ततो वैशिष्ट्यं सुधीभिरन्वेष्टव्यम् ।

१३८. हेमन्तरामो भट्टराइः (१९६८ वै.–)

नेपाल-ललितपुरमण्डलान्तर्गतलुँबुग्रामाभिजनः काष्ठमण्डपनगरान्तर्गत कमलादिटोल्लकनिवासी लक्ष्मीनाथनप्ता कालिदासपुत्रः कोमललक्ष्मी-गर्भजो हेमन्तरामो भट्टराइः खलु उग्रतारास्तवम्, आदर्शत्रिभुवनचम्पूम्, आदर्शमहेन्द्रचम्पूम्, आदर्शजवाहरलालचम्पूम्, गान्धिगीताञ् च रचयामास । एते सर्वे ग्रन्था मुद्रिता उपलभ्यन्ते ।

१३९. बुद्धिसागरः पराजुलिः (१९७० वै.–)

नेपाल–कास्किमण्डलान्तर्गतपौष्करावतपुर–मिरुवा–टोल्लकाभिजनः काष्ठमण्डपनगरान्तर्गतबालुआटारटोल्लकनिवासी भूरमणनप्ता शिवप्रसादसुतः पार्वतीगर्भजो बुद्धिसागरः पराजुलिस् साम्राज्यलहरीं स्तवकाव्यम्,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राज्याभिषेकविधानकारिकाम्, ब्रह्ममशान्तिम्, आह्निकाचारविषयं श्रीसपर्यामृतम्, भगवद्वरिवस्याञ् च रचयित्वा मुद्द्रापयित्वा च प्रचारयामास। एतेषु ग्रन्थेषु तत्त्रभवतो वैदुष्यञ् कवित्त्वञ् च यथास्स्थानञ् किञ्चिदभिव्यक्तमिति वक्तुं शक्क्यम्। तत्त्रभवता धर्म्ममीमांसाशास्त्त्रे न्यायतरणिः तर्कपरिशेषश्चेति द्वौ ग्रन्थौ, ब्रह्ममीमांसाशास्त्रे स्वरूपविलास इति ग्रन्थः, भारतवर्षोन्नतये मार्गस्स्य प्प्रदर्शकस् समन्न्वयचम्पूरिति ग्रन्थश्चेति चत्त्वारोऽन्न्ये ग्रन्थाश् च विरचितास् सन्तीति तत्त्रभवान् कथयति।

१४०. यदुनाथः खनालः (१९७० वै.–)

नैपाल–त्रितुङ्गाचलमण्डलान्तर्गत–मानुङ्गग्रामाभिजनः काष्ठमण्डपनगरान्तर्गत-वानेश्श्वरटोल्लकनिवासी देवदत्ताचार्यदौहित्त्रो रामप्रसादनप्ता नरनाथपुत्त्रस् तारागर्भजो यदुनाथः खनालस् समयेसमये विविधानि संस्कृतपद्यानि रचयामास किल। तेषु तत्त्रभवता स्वतन्त्रतया रचितानि पद्यानि पाश्चात्त्यकविकृत्त्यनुवादरूपाणि पद्यानि च सन्ति। तेषु पद्द्येषु सामयिको विविधो भावोद्द्रेकः पाठकैरास्स्वादयितुं शक्क्यते। तेषाम् पद्द्यानां सङ्ग्रहौ द्वौ लघुकाय–महाकायौ यथासमयम् मुद्द्रितावुपलब्भ्येते।

१४१. नयराजः पन्तः (१९७० वै.–)

काष्ठमण्डपनगरान्तर्गत-वटु·सवलब्रहालनिवासी कृष्णदत्तपुत्त्रो यज्ञप्प्रियागर्भजो भुवननाथपांडेदौहित्त्रो नयराजः पन्तः "पृत्थ्वीनारायणोपदेशस्स्य संस्कृतपद्द्यमयी व्याक्ख्या (श्री ५ पृथ्वीनारायणशाहको उपदेशको संस्कृत तथा नेपाली पद्द्यमयी व्याक्ख्या)" इतिग्रन्थं रचयामास। तत्त्र संस्कृतपद्द्यैरपि सम्पूर्णस्स्य पृत्थ्वीनारायणोपदेशस्स्य प्रतिपादनञ् कृतन् दृश्श्यते। एष ग्रन्थो मुद्द्रितः प्राप्प्यते।

१४२. गुणराजः खनालः (१९७२–२०३१ वै.)

नैपाल-गोरक्क्षाचलमण्डलाभिजनः काष्ठमण्डपनगरान्तर्गतत्रिपुरेश्श्वरटोल्लकनिवासी दुर्गानाथप्प्रपौत्त्र उमानाथपौत्त्रो हर्षनाथपुत्त्रो गुणराज उपाद्ध्यायः खनालो रुक्मिणीपरिणयन् नाम द्विसर्गञ् कालिदासादिमहाकविकृत्त्यनुकारि लघु काव्व्यं रचयामास। तच् च २०३१तमे वैक्क्रमेऽब्दे प्रथमम् मुद्द्रितम् २०४४तमे वैक्क्रमेऽब्दे पुनर्मुद्द्रितन् नैपालीयभाषानुवादसहितमुपलब्भ्यते। गुणराजरचितं हिट्लरचरितन् तु नामशेषताञ् गतमिति वदन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१४३. हरिनाथ उपाद्ध्यायो ढुङ्गेलः
(१९७३–२०३१ वै.)

नैपाल-भक्तपुरमण्डलस्स्थ-कटुञ्जेग्रामाभिजनः काष्ठमण्डपनगरनिवासी पद्मनाभपुत्त्रो हरिनाथ उपाद्ध्यायो ढुङ्गेलः पद्द्यात्मकं सोमनाथशर्मजीवनचरितोत्तरार्धं रचयामास । तच् च २०२९तमे वैक्क्रमेऽब्दे मुद्द्रितमुपलब्भ्यते । सोमनाथशर्मजीवनचरितस्स्य पूर्वार्धन् तुबद्द्रिनाथेन अधिकारिणा (१९६१-२०१६वै.) काष्ठमण्डपनगरान्तर्गतनरदेवीटोल्लकनिवासिना रचितम् प्रकाशितमस्ति । हरिरचितन् 'निजजन्मभूमिः' इति, 'हृदि वज्ज्रपात' इति च लघु काव्व्यद्वयं 'सुरभिः' इत्त्याक्ख्ये सङ्ग्रहे २०२६तमे वैक्क्रमेऽब्दे प्रकाशितमुपलब्भ्यते । हरिरचितः पद्द्यमयस् 'सरदारच्छविलालसूरिपरिचयः' कुशलवोदयनाटके सलँल्ग्नः प्रकाशित उपलब्भ्यते । हरिणैव रचितः 'पृत्थ्वीनारायणस्स्य खड्गसिद्धिः' इति पद्द्यलेखो नेपालसंस्कृतसङ्ग्रहे दृश्श्यते ।

१४४. कृष्णप्रसादशर्मा लम्सालः (१९७४–२०४५ वै.)

नैपाल–त्त्रिशुङ्गाचलमण्डलाभिजनः किल कृतपूर्वचावेलटोल्लकनिवासः काष्ठमण्डपनगरान्तर्गतचण्डोलटोल्लकनिवासी धनञ्जयपौत्त्रो दीनोदयज्ज्येष्ठपुत्त्रः पोटलिका–कुक्षिजः कृष्णप्रसादशर्मा लम्सालश् शाक्ततन्त्त्रानुसारिणम् पञ्चषष्टिश्लोकात्मकन् दक्षिणाविभूतिस्तवराजन् नवोत्तरशतश्लोकात्मकङ् कौलतन्त्त्रयोगसाररूपयँ योगाब्भ्यासतरङ्गन् च रचयामास । तौ द्वावेव ग्रन्थौ मुद्द्रितावुपलब्भ्येते ।

१४५. कृष्णप्रसादो घिमिरेः (१९७६ वै.–)

नैपाल–काष्ठमण्डपनगरान्तर्गतगैरिधाराटोल्लकनिवासी केदारनाथशर्मपुत्त्रो मनोरथकुमारीगर्भजः कृष्णप्रसादशर्मा घिमिरेः श्रीकृष्णचरितामृतम् महाकाव्व्यम् (पूर्वार्धम्), कठोपनिषदाधृतन् नाचिकेतसङ् काव्व्यम्, रामविलापङ् खण्डकाव्व्यम्, नेपालेश्श्वरगौरवन् नाम रूपकम्, गौरीगिरीशमिति गीतिकाव्व्यन् च रचयामास किल । एते ग्रन्था मुद्द्रिता उपलब्भ्यन्ते । अन्न्येऽपि ययातिचरित-वृत्त्रवध–सम्पातिसन्देश-मनोयानादयो ग्रन्थास् तेन रचिता अवगम्म्यन्ते । तस्स्य कृतिषु अनुसन्धानमपि जातमस्ति ।

१४६. सुरेशो झाः (१९७७ वै.–)

नैपाल–महोत्तरिमण्डलान्तर्गतसाँडाग्रामनिवासी जयदेवझापुत्त्रो राधा-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुक्षिजो व्रजमोहनशिष्यस् सुरेशो झा: भट्टोजिदीक्षितकृतिम् पाणिनीय-वैयाकरण-सिद्धान्तकौमुदीम् प्रतिसंस्कृत्य द्वादशसाहस्त्रीं श्लोकसिद्धान्तकौमुदीं रचयामास । स च ग्रन्थः २०३८तमे वैक्रमेऽब्दे मुद्रितः प्रकाशितो दृश्यते । तेन ग्रन्थकारेण स्वग्रन्थस्य प्रथमभागस्य भूमिकायान् तृतीये पृष्ठे "किञ्चिद्-वर्षपूर्वमहलँ् लघुकौमुद्याश् छायामाश्रित्य बालसंस्कृतश्लोकव्याकरणवँ् व्यरीरचम् प्राचीकशश्चाऽपि" इति वाक्यम् प्रयुक्तमस्ति। एवमशुद्धपदप्रयोगस्य दर्शनात् सा श्लोकसिद्धान्तकौमुदी वैयाकरणैस् सावधानैरनुशीलनीया यथार्हम् परिष्करणीया च भाति । अनेन ग्रन्थकारेण रचिता सौरेशी लघुसिद्धान्तकौमुदी अपि प्रकाशनोन्मुखीति श्रूयते । संस्कृतशिक्षासोपानादयोऽन्येऽपि तदीया ग्रन्थाश् श्रूयन्ते ।

१४७. भीमकान्तः पन्थिः (१९७८ वै.–)

नैपाल–गुल्मिमण्डलान्तर्गत-धुर्कोट-वाग्ला-बडाचौरनिवासी देवीप्रसाद-पुत्रो नन्दकुमारीकुक्षिजो भीमकान्तः पन्थिर् जगदम्बिकावैभवम्,जगदीश्वर-वैभवञ् चेति भक्तिभावप्रधानङ् काव्यद्वयञ् चकार किल। तच्च काव्यद्वयम् प्रकाशनोन्मुखं श्रूयते।तेन रचितानावँ् विविधानां संस्कृत-पद्यानां सङ्ग्रहोऽपि तत्पुत्रेण लक्ष्मीकान्तपन्थिना सङ्गृह्यमाणोऽवगम्यते । तदीयं शालग्राम-शिलाष्टकं हैमवत्या द्वितीयेऽङ्के मुद्रितन् दृश्यते च ।

१४८. पूर्णप्रसादब्राह्मणो दुवाडिः (१९७८–२०४६ वै.)

नैपाल-गोरक्षाचलमण्डलान्तर्गतकाफलडाँडाग्रामाभिजनः काष्ठमण्डप-नगरस्थताहाचलटोलकनिवासी देवीदत्तपुत्रो गायत्रीकुक्षिजः पूर्णप्रसादो ब्राह्मणस् सत्यहरिश्चन्द्रम्, विश्वेदेवाः, रूपान्तरणात्मकस् तदर्थमेवेति गीतिकाव्यग्रन्थः, ईशावास्यवृत्तिः (रूपान्तरणात्मिका), राजतन्त्रं सदा जीव्यात् इति च संस्कृतग्रन्थान् रचयामास । एते सर्वे ग्रन्था मुद्रिता दृश्यन्ते ।

१४९. चूडानाथो भट्टरायः (१९७८ वै.–)

नैपाल–काष्ठमण्डपनगरान्तर्गतबालुआटारटोलकनिवासी लोकनाथपुत्रः कुलमञ्जरीकुक्षिजश् चूडानाथो भट्टराय आधुनिकवस्तुवम् आधुनिकतर्क-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रधानशैलीकम् परिणामनाटकं रचयामास । तच्च नाटकम् २०१६तमे वैक्रमेऽब्दे प्रकाशितमुपलभ्यते ।

१५०. भोलानाथः पौडेलः (१९७८ वै.–)

नैपाल–ललितपुरमण्डलान्तर्गतलुँबुसिस्नेरिग्ग्रामाभिजनः काष्ठमण्डपनगरान्तर्गतवानेश्वरटोल्लकनिवासी नन्दलालपौत्त्रो धर्मानन्दपुत्त्रो भोलानाथः पौडेलो 'बालगीतिका' इत्याख्यं संस्कृतभाषानिबद्धबालगीतसङ्ग्रहं रचयामास । स च सङ्ग्रहः २०२७तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते ।

१५१. मेघराज उपाद्ध्यायो नेउपानेः (१९७९?–२०४८ वै.)

नैपाल–दाङमण्डलान्तर्गतहापुरविजौरिग्ग्रामनिवासी गोवर्धनपुत्त्रो मेघराज उपाद्ध्यायो नेउपानेः ववैलहरीलँ लघु नदीस्तुतिकाव्यं रचयामास । तच् च काव्यं 'संस्कृताद्ध्ययनसंस्थानम्' इत्याख्येन त्रिभुवनविश्वविद्यालयविभागेन २०३८तमे वैक्रमेऽब्दे दाङे मुद्द्रितमुपलभ्यते । अन्न्योऽपि कश् चन तदीयश् शोभनो ग्रन्थोऽमुद्द्रितोऽस्तीति च श्श्रूयते ।

१५२. गिरिधारी भट्टराइः (१९८०? वै.–)

नैपाल–त्रितुङ्गाचलमण्डलान्तर्गत–वन्दिपुरग्ग्रामान्तःपाति-थुङ्काग्रामटिकाभिजनो याम्पाग्रामनिवासी हरिभक्तपौत्त्रः काकुपुत्त्रो गिरिधारी भट्टराइः 'सवर्णयोः कुण्डगोलकयोर्ब्राह्म्मणत्त्वम्' इति दुर्बोधार्थकनामकवँ विवादास्पदलँ लघुन् निबन्धं रचयामास । स च निबन्धः २०४२तमे वैक्रमेऽब्दे मुद्द्रितो दृश्श्यते ।

१५३. शालग्ग्रामशर्मापराभिधः शिवराजः पोख्रेल्यालः (?-?)

नैपाल–गुल्मिमण्डलान्तर्गतपणेनाग्रामाभिजनश् शालग्ग्रामशर्मापराऽभिधश् शिवराजः पोख्रेल्यालः खलु पाणिनितपोभूमिरिति लघुङ गद्यग्रन्थं रचयित्त्वा स्वग्ग्रामम् पाणिनितपोभूमित्त्वेन प्रतिजज्ञे । स च ग्रन्थः २०१५तमे वैक्रमेऽब्दे मुद्द्रितो दृश्श्यते ।

१५४. गणेशप्रसादो गौतमः (१९८२–२०४२ वै.)

नैपाल–धादिङमण्डलान्तर्गतजीवनपुरग्ग्रामाभिजनः काष्ठमण्डपनगरान्तर्गतगोशालाटोल्लकनिवासी चातुर्मास्स्ययाजि–चन्द्रशेखरपौत्त्रो दर्शपूर्णमासयाजि-टङ्कनाथपुत्त्रः पवित्त्राकुक्षिजो दर्शपूर्णमासयाजी गणेशप्रसादो गौतमो मनुष्ष्यजीवनवँ व्यावहारिकदृष्ट्या पारमार्थिकदृष्ट्या च वर्णयन् प्रपञ्चप्रपञ्चप्रकाशङ खण्डकाव्यं रचयामास । एतेन मातृसन्देश इति काव्यमपि

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रचितमिति केचन वदन्ति। किन्तु तस्य कश् चनांऽशो पत्रिकायाम् प्रकाशित उपलभ्यते, सम्पूर्णङ् काव्यन् तु अविज्ञातमेवेति अन्ये वदन्ति ।

१५५. भरतराजो घिमिरेः [मन्थलीयः] (१९८२ वै.-)

नेपाल-रामेछापमण्डलान्तर्गत-मन्थलिग्रामाभिजनः काठमण्डप-नगरान्तर्गत-डिल्लिबजार-घट्टेकुलोटोल्लकनिवासी जीवनाथपौत्रो भवप्रसाद-पुत्रस् सोमकुमारीकुक्षिजश् शेषराजरेग्मिशिष्यो भरतराजो घिमिरेः महेन्द्रो-दयम् महाकाव्यं रचयामास । मन्थलिग्रामवास्तव्य-शङ्करप्रसाद-सत्याल-कृतटीकासहितन् तत् २०१७तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते । काव्यगुणास् तत्र सन्त्येव । किन्तु कविकुलशिक्षागुरो राजशेखरस्य **"जानीयाल् लोक-साम्मत्यङ् कविः कुत्र ममेति च । असम्मतम् परिहरेन् मतेऽभिनि-विशेत च"** इति शिक्षामपरिशील्य रचितन् तत् काव्यलँ लोके प्रचारे कामपि कुण्ठामनुभवत् प्रतीयते । तदीयमन्यत् शैलबालेति खण्डकाव्यमपि मुद्रितमुपलभ्यते। मोतिरामवृत्तमिति खण्डकाव्यमपि भारद्वाजाख्यायाम् पत्रिकायाम् प्रकाशितमस्तीति, कृष्णाभिसर्पणन् नाम खण्डकाव्यमप्रका-शितमेवास्तीति, अन्येऽपि उपत्रिंशा मुक्तकश्लोकास् सन्तीति घिमिरेमहोदयेन स्वयमुक्तम् ।

१५६. पशुपतिः झाः (१९८३ वै.?-)

नैपाल-महोत्तरिमण्डलान्तर्गत-साँडाग्रामाऽभिजनो दरिहरेवंशजो मनोहरपौत्रः कृष्णानन्दमद्ध्यमपुत्रो विष्णुदेव-जीवनाथ-कार्त्तिकेयादिशिष्यः पशुपतिर् झाः २०३६तमे वैक्रमेऽब्दे नेपालसाम्राज्योदयन् नाम इतिहास-वर्णनप्रधानम् पञ्चदशसर्गात्मकङ् काव्यन् चकार । तच्च २०३७तमे वैक्रमे-ऽब्दे मुद्रितमुपलभ्यते ।

१५७. हरिशरण उपाद्ध्यायो लम्सालः (१९८८ वै.-)

नैपाल-स्याङ्जामण्डलान्तर्गत-चित्रेभञ्ज्याङग्रामस्स्थकुलुङखोला-ग्रामटिकाभिजनो नवलपरासिमण्डलान्तर्गतगैँडाकोटग्रामनिवासी मणिरत्नपुत्रो भगवच्छरण-गणेशदत्तपाण्डेयाऽऽदिशिष्यो हरिशरण उपाद्ध्यायो लम्सालश् शब्दब्रह्मशतकन् नाम व्याकरणदर्शनविषयकं शास्त्रकाव्यं रचयामास । तच्च काव्यम् २०३४तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते । तस्य सभ्यताप्रकाश इत्याख्योऽन्योऽपि लघुर् ग्रन्थो मुद्रितोऽस्तीति श्रूयते ।

१५८. पुण्यप्रसादो रेग्मिः (१९९० वै.-)

नैपाल-पाँचथरमण्डलान्तर्गत-फिदिमोपमण्डलान्तःपातिसुभाङग्रामाभिजनो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाराणसीनिवासी जनकलालपुत्त्रो यशोदाकुक्षिजो योगीश्वराश्रमशिष्यो गायत्त्रीस्वरूपब्रह्मचारीति सम्प्रति व्यवह्रियमाणः पुण्यप्रसादो रेग्मिः खलु श्रीभगवत्समर्चाख्यां स्तुतिमञ्जरीं रचयामास किल । सा च २०३८तमे वैक्रमेऽब्दे पुनर्मुद्रितोपलभ्यते ।

१५९. भेषराजशर्मा सापकोटाः (१९९१ वै.–)

नैपाल-गुल्मिमण्डलान्तर्गत–भटकुग्रामाभिजनः पाल्पामण्डलान्तर्गत-सुन्दरग्राम-(मदनपोखरा-)निवासी नरनारायणपौत्त्र ऋषिरामपुत्त्रो राधिका-कुक्षिजश् श्रीकृष्णमणित्रिपाठिशिष्यो भेषराजशर्मा सापकोटास् सूक्तिशतकन् नाम कोषकाव्यं रचयामास । तच् च पण्डित–श्रीकृष्णमणिशास्त्रिणा संशोधितं सम्पादितञ्च २०१५तमे वैक्रमेऽब्दे वाराणस्याम् मुद्रितमुप-लभ्यते । अनेनैव ग्रन्थकारेण रचितस् सापकोटासरस्वत्याख्यो गीतामञ्जरी-स्वार्थाथर्वशीर्षादिगर्भकोऽन्योऽपि ग्रन्थः प्रकाशोन्मुख इति श्रूयते ।

१६०. मणिप्रसादस् तिवारिः (१९९२ वै.–)

नैपाल–स्याङ्जामण्डलान्तर्गत–गरौँकोटग्रामाऽभिजनः काष्ठमण्डप-नगरान्तर्गत–नक्शाल–नागपोखरिटोल्लनिवासी जीवनारायणपौत्त्रस् त्रिलो-चनपुत्त्रः कौसल्याकुक्षिजो बालाकृष्णाचार्य–शिष्यो मणिप्रसादस् तिवारिः खलु त्रिकालजन्मकुण्डलीदर्पणम् (२०२१। स्वयंदशाबोधादिकञ् च रचया-मास । एते ग्रन्थाः प्रकाशिता अवगम्यन्ते ।

१६१. हरिप्रसाद आचार्यः (१९९३ वै.–)

नैपाल–पिउठानमण्डलान्तर्गत–खैराग्रामाऽभिजनो दाङमण्डलान्तर्गत-मानपुरग्रामनिवासी दुर्गाप्रसादपुत्त्रो हीराकुक्षिजः आत्मारामादिशिष्यो हरिप्रसाद आचार्यः "गोरक्षशाहवंशः" इति नाम्नाऽङ्कितम् इतिहासप्रधानङ् काव्यं रचयामास । तच्च काव्यं २०२२तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते । एतेन 'श्री ५ महेन्द्रविरहवेदना' इति, 'श्री ५ वीरेन्द्रराज्याभिषेकम्' इति च लघुनी काव्ये च रचिते मुद्रापिते चोपलभ्येते । अनुसन्धानप्रकाशे बुद्धि-विनोदप्रश्नोत्तरानुवादे चाऽस्य कर्तृता दृश्यते ।

१६२. रोहिणीवल्लभशर्मा पोख्रेलः (१९९५ वै.–)

नैपाल–सिराहामण्डलान्तर्गत–भवानीपुर–बाखराभिजनो धनुषा मण्डला-न्तर्गत–जनकपुरान्तःपाति-किशोरीनगरनिवासी गणेशप्रसादोपाध्यायपौत्त्रो रघुनाथसुतो बलदेवझा–जीवनाथझादिशिष्यो रोहिणीवल्लभशर्मा पोख्रेलः खलु अभिनवमेघदूतम् (प्रणयकाव्यम्), मिथिलासौरभम्, विनतिपुष्पाञ्जलिम्,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

काव्यमीमांसायाः पञ्चमाद्ध्यायान्तायाः पद्यमयं रूपान्तरणञ् च रचयामास। एते ग्रन्था मुद्रिता अवगम्यन्ते। तेनाऽन्येऽपि वीरेन्द्रोपायनादयो ग्रन्थाः कृतास् सन्तीति शश्रूयते।

१६३. टीकारामः पन्थिः (१९९६ वै.–)

नैपाल–गुल्मिमण्डलान्तर्गताऽर्खलेग्रामस्थ-भाडग्राम-ग्रामटिकाभिजनष् टीकारामः पन्थी रुरुवृत्तम् (२०२१), अश्रूपहारः (२०३९), नेनेपालः (२०४०) इति ग्रन्थान् रचयामास। ते च ग्रन्था यथाकालम् मुद्रिता उपलभ्यन्ते।

१६४. खेमराजः केशवशरणः (१९९६ वै.–)

भारतस्स्य असमप्रान्ते जातो नैपाल–काष्ठमण्डपनगरान्तर्गत–सिफलेटोल्लकनिवासी तारानिधिपुत्त्रो द्रौपदीकुक्षिजः खेमराजः केशवशरणः श्री५मन्महेन्द्रगौरवन् नाम द्वादशपद्यकलँ लघु स्तुतिकाव्यन् चकार किल। तच् च प्रकाशनवर्षाङ्कन-रहितम् मुद्रितन् दृश्यते।

१६५. शिवराज आचार्यः कौण्डिन्न्यायनः(१९९७ वै.–)

नैपाल–त्रिशुङ्गाचलमण्डलान्तर्गत-ताम्रकूटग्रामाभिजनः काष्ठमण्डपनगरान्तर्गत–लाजिम्पाट-सरस्वतीमार्गटोल्लकनिवासी सूर्योपाद्ध्यायात् पञ्चदशश् श्रीकृष्णाचार्यात् षष्ठो शेखरापराभिधपद्मनाभसुत–देवदत्तप्रपौत्त्रो लोकनाथपौत्त्रो नरनाथपुत्त्रो गङ्गामायाकुक्षिजस् सुगृहीतनाम–नरनाथाचार्य-रुद्रशङ्करपौडेल–बुद्धिसागरपराजुल्ल्याऽऽदिशिष्ष्यश् शिवराज आचार्यः कौण्डिन्न्यायनः काव्यप्रकाशस्स्य हैमवत्त्याख्याँ विवृतिमररचत्। तस्स्या विवृतेर् वैशिष्ट्यञ् च तत्त्रभवतैवँ वर्णितम्–"सोऽहङ्क काव्यप्रकाशस्स्य व्याख्यानानि बहून्न्यपि। पठित्त्वा तत्त्र केषाञ्चिद् विद्वन्मात्त्राधिगम्म्यताम्॥ केषाञ् चित् तु पुनर् बालमात्त्रसस्य स्स्पृहणीयताम्। विलोक्क्य विदुषाञ् चैव बालानाञ् च कृते हितम्॥ न चाऽतिविस्तृतन् नाऽतिसङ्क्षिप्तं सारगर्भकम्। पदवाक्क्याभिसन्धीनां स्फोरकँ विशदं स्फुटम्॥ प्रमाणवाक्क्यैः पूर्वेषाँ युक्तं सन्तुलनात्मकम्। न केवलम् परोक्तस्स्यैवार्थस्स्य प्प्रतिपादकम्॥ व्याख्यानमिदमाहार्षमुपग्राह्ययतया नवम्। भूयादिदम् बुभुत्सूनाँ विदुषाञ् च समम् प्रियम्॥ काश्मीरकैर् वाङ्गकैश् च काशिकैर् मैथिलैरपि। दाक्षिणात्यैर् मद्ध्यदेश्यैर् विद्वद्भिर् विविधैरपि॥ मीमांसकैस् तार्किकैश् च यतिभिर् धर्मशास्त्रिभिः। काव्यप्रकाशो व्याख्यातो नैव नैपालकेन

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तु ।। इति मे कौतुकमभूद् व्याख्यानेऽत्र प्रवर्तितुम् । तदिदङ् कौतुकञ् चाद्योपशान्तिमगमन् मम " इति । एषा विवृतिः २०३७तमे वैक्रमेऽब्दे वाराणस्स्याम् मोतीलालबनारसिदासेन मुद्रिता प्रकाशिता उपलभ्यते । त्रितुङ्गाचलमण्डलान्तर्गत–चुँदिताम्रकूटग्रामाभिजन–तुलसीरामाचार्यदौहित्र-काठमण्डपनगरवास्तव्या-ऽर्ज्यालवीरेन्द्रकेसरिणाऽपि नैपालकेन काव्यप्रकाशव्याख्या कृताऽभूदिति श्रूयते । किन्तु निश्चयो नाऽस्ति । सा नैवोपलभ्यते । साऽऽसीत्, किन्तु सर्वथा नष्टेति च केचन वदन्ति । तस्माद् हैमवती एव नैपालकेन विदुषा कृता प्रथमा उपलभ्यमाना काव्यप्रकाशव्याख्याऽस्ति । अत्रभवता कौण्डिन्न्यायनशिक्षाख्या महाशिक्षा च रचिताऽस्ति। सा च मुद्रितप्राया प्रकाशनोन्मुखी वर्तते। तथैव पाणिनीयव्याकरणाष्टाद्ध्याय्या अत्यावश्यक–गणपाठ-भाष्येष्टिवार्त्तिकादि–सहितः कण्ठस्थीकरणीयः पाठश् च सम्पादितो वर्तते तत्रभवता । वेदभाषानिघण्टुश् च सामिरचितोऽस्ति । एते ग्रन्था यथावसरम् प्रकाशयिष्यमाणास् सन्ति ।

१६६. रामकृष्णप्रपन्नः (१९९७ वै.–)

गोठुराइचाम्लिङपौत्रो धम्मेराइचाम्लिङपुत्रो दिलमायाकुक्षिजो रामकृष्णप्रपन्नस् सिद्धिवैतथ्यन् नाम तार्किकग्रन्थं रचयामास। स्वरचितयाऽनुसन्धानात्मिकया भूमिकया विविधाभिः पञ्जिकाभिश् च सयँयोज्य स्वयम्प्रकाशानन्दस्य वेदान्तनयभूषणग्रन्थस्य सम्पादनञ् च स चकार । एतौ द्वावपि ग्रन्थौ मुद्रितावुपलभ्येते ।

१६७. ज्योतिःप्रकाशो जोसिः (१९९८ वै.–)

नैपाल–बजाङमण्डलान्तर्गत–थलाराग्रामनिवासी लक्ष्मीनारायणपुत्रो ज्योतिःप्रकाशो जोसिः मर्त्याधिकाराख्यं ग्रन्थं रचयामास । स च ग्रन्थो मुद्रितोऽवगम्यते ।

१६८. मुकुन्दशरण उपाद्ध्यायः पौडेलः (२००० वै.–)

नैपाल–कास्किमण्डलान्तर्गत – ह्याङजाग्रामाभिजनः पौष्करावतपुरनिवासी दशरथपुत्रो हरिदासबाबा–प्रेमचैतन्न्यब्रह्मचार्यादिशिष्यो मुकुन्दशरण उपाद्ध्यायः पौडेलो निम्बार्कचरितम् (२०१७), शरणागतिशतकम् (२०१७), शैलसरिताख्यल्ँ लघुम् पद्द्यसङ्ग्रहन् च रचयामास । ते च ग्रन्थाः कोष्ठकेषु सङ्केतितेषु वर्षेषु मुद्रिता अवगम्यन्ते ।

१६९. ठाकुरप्रसाद आचार्यः(२००१ वै.–)

नैपाल–पिउठानमण्डलान्तर्गत–खैराग्रामाभिजनष् टीकारामपुत्रष्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ठाकुरप्रसाद आचार्यश् शिवलहरीं स्तवकाव्यं रचयामास। तच् च काव्यम् २०४२तमे वैक्रमेऽब्दे मुद्रितमुपलभ्यते ।

१७०. विष्णुराज आत्रेयः (२००२ वै.–)

नेपाल–गुल्मिमण्डलान्तर्गत–मर्भुङ्ग्रामाभिजनस् तौलिहवानगरनिवासी काष्ठमण्डपनगरे व्याप्रियमाणो योगिदासकुलजो रश्मिराजपौत्रो देवराजपुत्रो विष्णुराज आत्रेयः [अर्ज्यालः] 'किमुपहरामि' इत्यङ्कितमाधुनिकशैलीकं संस्कृतगद्यकवितासङ्ग्रहं रचयामास । स च सङ्ग्रहो मुद्रित उपलभ्यते। अन्ये तु तस्य संस्कृतग्रन्था द्रष्टुमपि अप्राप्त्या नामतोऽपि नैव परिचीयन्ते ।

१७१. स्थानेश्वरो गौतमः (२००७ वै.–)

नेपाल–पिउठानमण्डलान्तर्गत–क्वाडिग्ग्रामाभिजनो दाङनिवासी हरिकृष्णपुत्रो वेदकुमारीकुक्षिजस् स्थानेश्वरो गौतमो हरिप्रसादेनाऽऽचार्येण सह सम्भूय अनुसन्धानप्रकाशाख्यल् लघुङ ग्रन्थं रचयामास । स च ग्रन्थस् त्रिभुवनविश्वविद्यालय-संस्कृताध्ययन-संस्थान-केन्द्रियसंस्कृतविद्यापीठेन दाङ्बेलझुण्डिस्थेन प्रकाशितः २०४२तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते ।

१७२. पवनकुमारः खनालः (२०१६ वै.–)

नैपाल–काष्ठमण्डपनगरान्तर्गतत्रिपुरेश्वरटोल्लकनिवासी हर्षनाथपौत्रो गुणराजपुत्रश् शेषकुमारीकुक्षिजः पवनकुमारः खनालस् संस्कृतभाषायान् दुर्बलोऽपि संस्कृतभाषाम् प्रति श्रद्धाम् प्रकटयन् पुष्पाञ्जलिनामकल् लघुं स्तवकाव्यसङ्ग्रहं रचयामास । स च सङ्ग्रहः २०४७तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते ।

१७३. ऋषिप्रसादशर्मा [रिजालः] (२०१७ वै.–)

नेपाल-दैलेखमण्डलान्तर्गत – दुर्लङ्घ्य(दुल्लु) – नगराभिजनः काष्ठमण्डपनगरनिवासी कृपारामपौत्रो नारायणदत्तपुत्रः कृष्णकुमारीकुक्षिज ऋषिप्रसादशर्मा खलु 'चाँदनीशाहरचिता गीतिकविताः' इत्यङ्कितं रूपान्तरणात्मकं गीतिकवितासङ्ग्रहं रचयामास । स च सङ्ग्रहो नेपालटेलिविजनाधिकृतेन प्रकाशितो मुद्रित उपलभ्यते ।

१७४. गोविन्दप्रसादशर्मा [सापकोटाः] (२०१९ वै.–)

नेपाल–म्याग्दिमण्डलान्तर्गत बिमिराकोटग्रामाभिजनश् श्रीधरादिशिष्यो गोविन्दप्रसादशर्मा खलु पाणिनीयव्याकरणस्यैतिहासिकम् परिशीलनन् नाम ग्रन्थं रचयामास । स च ग्रन्थोऽयोद्ध्यायाम् २०४७तमे वैक्रमेऽब्दे मुद्रित उपलभ्यते ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवशेषः

१७५. राघवदेवः

राज्ञश् शङ्करदेवस्य समये (११२६ वै. ?) राघवदेवः खलु धर्मपुत्रिकेति शैवसिद्धान्तग्रन्थं रचयामास किल ।

१७६. भिक्षुपूजित-श्रीज्ञानः

राज्ञो रुद्रदेवस्य समये (१२१४-१२३३ वै. ?) भिक्षुपूजित-श्रीज्ञानो बौद्धधर्मविषयन् धर्मसमुच्चयन् चकार किल ।

१७७. गोविन्दशीलः

राज्ञो रुद्रदेवस्यैव समये वैद्यो गोविन्दशीलः खलु योगसारसारसमुच्चयम्, पिङ्गलमतम्, शिवधर्मशास्त्रादिकन् च रचयामास किल ।

१७८. हरिवंशशर्मा

नैपाल-ललितपुरराजश्रीनिवासमल्लसमये (१७१७-१७४१ वै.) वर्तमानो ललितपुरनिवासी हरिवंशशर्मा(राजोपाध्यायः)श्रीनिवासमल्लादिशिलालेखपद्यानि, मयूरकविकृतसूर्यशतकटीकाम्, प्रश्नोत्तरं संस्कृतकाव्यम्, नीतिभुजङ्गप्रयातन् च रचयामास किल । एतद्विषये पूर्णिमाया अष्टचत्वारिंशत्तमेऽङ्के विवरणम् प्राप्यते । एकविंशतिपद्यात्मकन् नीतिभुजङ्गप्रयातन् तत्र प्रकाशितमप्यस्ति। प्रश्नोत्तरन् च हरिवंशवंशधरेण ऐश्वर्यधरेण सम्पादितन् तन्नेरीति पत्रे (व. २, अ. २; २०३७) प्रकाशितमवगम्यते ।

१७९.राजा सुमतिजयजितामित्रमल्लः (शा.का. १७२९-१७५३वै.)

नैपाल-भक्तपुरराजस् सुमतिजयजितामित्रमल्लः खलु जैमिनिभारतनाटकम्, मदालसाहरणम्, गोपीचन्द्रनाटकम्, महाभारतनाटकम्, रामायणनाटकन् च रचयामास किल । एतानि नाट्यकाव्यानि प्रायेण गीतिनाट्यरूपाणि लोकभाषाप्रधानानि विरलसंस्कृतपद्यकानि चाऽवगम्यन्ते ।

१८०. नरहरिर् नाथः (?-)

नैपाल-जुम्लामण्डलान्तर्गत-लालुग्रामान्तःपातिठाँटिकोटग्रामटिकाभिजनस् थापाकुलजो नरहरिर् नाथः शान्तिचरितङ् काव्यम् (२०२५)अन्योक्तिमुक्तावलीन्(२०३५ ?) च रचयामास । तेन भक्तविजयकाव्ये टीकाऽपि कृताऽस्ति । एते सर्वे ग्रन्था मुद्रिता उपलभ्यन्ते ।।

—※—

"वैदुष्यमिच्छता कार्यं सद्विद्वद्गुणकीर्तनम् ।
विदुषोरश्विनोः कीर्त्या कक्षीवानप्यभूद् विदन् ।।"

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साहाय्यविवरणम्

नैपालसंस्कृतज्ञरचितमुद्रितसंस्कृतग्रन्थानाम् प्रदशन्न्या आयोजने पुस्तकच्छायाप्रतिलिपिकरणादौ च जातस्स्य ३१८६।– रूप्यकात्मकस्स्य व्ययस्स्य, 'कतिपय–नैपाल–संस्कृतग्रन्थकारपरिचय' ग्रन्थस्स्य प्रकाशनाय सामग्रीणां सङ्कलने प्रकाशने उपोद्घातस्स्याऽनुमुद्रणे च जातस्स्य १०३९७।– रूप्यकात्मकस्स्य व्ययस्स्य च भारस्स्य वहनाय कृताया अर्थव्यवस्थाया विवरणम्––

१	छविलालसूरिप्रपौत्रदीपकप्रसादढुङ्गेलमहाशयात्	प्राप्तन्	दानम्	१५००।–
२.	हरिनाथपौत्रप्रीतिनाथप्याकुर्‍यालमहाशयात्	,,	,,	१४३०।–
३.	श्रीविनोदाऽग्रवालमहाशयात्	,,	,,	११००।–
४.	नीलदेववंशधरभुवनदेवपन्तमहाशयात्	,,	,,	१०००।–
५.	गुणराजोपाध्यायपत्न्या: महाशयाया:	,,	,,	१०००।–
६.	श्रीसोमनाथघिमिरेमहाशयात्	,,	,,	५००।–
७.	श्रीबलरामबहादुरबस्नेतमहाशयात्	,,	,,	५००।–
८.	श्रीहरिशरणोपाध्यायमहाशयात्	,,	,,	५००।–
९.	श्रीजगदीशचन्द्राऽर्यालमहाशयात्	,,	,,	५००।–
१०.	श्रीकमलमणिदीक्षितमहाशयात्	,,	,,	५००।–
११.	श्रीवासुदेवपौडेलमहाशयात्	,,	,,	५००।–
१२.	श्रीयोगेश्वरकृष्णपराजुलिमहाशयात्	,,	,,	५००।–
१३.	श्रीसागरनाथप्याकुर्‍यालमहाशयात्	,,	,,	५००।–
१४.	ललितपुरनिवासिश्रीहरिप्रसादपौडेलमहाशयात्	,,	,,	५००।–
१५.	श्रीनरहरे: आचार्यात् महाशयात्	,,	,,	३००।–
१६.	श्रीजगदीशप्रसादाऽग्रवालमहाशयात्	,,	,,	२५०।–
१७.	श्रीगोविन्दटण्डनमहाशयात्	,,	,,	२०१।–
१८.	श्रीकेसरबहादुरराजभण्डारिमहाशयात्	,,	,,	२००।–
१९.	श्रीकल्याणप्रसादोपाध्यायमहाशयात्	,,	,,	१२१।–
२०.	श्रीमणिप्रसादतिवारिमहाशयात्	,,	,,	१००।–
२१.	श्रीकेशवनाथप्याकुर्‍यालमहाशयात्	,,	,,	१००।–
२२.	श्रीश्यामप्रसादखरेलमहाशयात्	,,	,,	१००।–
२३.	अन्येभ्योमहाशयेभ्य:	,,	,,	२१०।–
२४.	कौण्डिन्न्यायनशिक्षाप्रकाशनकोषाद्	गृहीतं सामकम्	ऋणम्	५००।–
२५.	वैदिकसमाजवादिलोकतान्त्रिकसंस्कारप्रवर्धनसभातो ,,	,,	,,	९७१।–

(द्रष्टव्यम्–अत्र ग्रन्थकारविशेषच्छायाचित्रसमावेशनन् तदर्थप्राप्तसाहाय्यविशेषाधीनम्)।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतस्स्य पुस्तकस्स्य विक्क्रयात् प्राप्तस्स्य द्रव्व्यस्स्य अधोलिखितानाङ्ग्रन्थानाम् प्रकाशने उपयोगः करिष्ष्यते ।—

१. पाणिनीयव्व्याकरणम्

आचार्यकौण्डिन्न्यायनपरिष्कृतम्,
वेदपरकव्व्याक्ख्यानयुतम् ।

२. वेदभाषानिघण्टुः

आचार्यकौण्डिन्न्यायनरचितः ।

३. छन्दश्शास्त्रम्

ब्राह्म्मणादिग्रन्थप्रतिपादितच्छन्दस्तत्त्वप्प्रतिपादनव्याक्ख्यानयुतम् ।

४. वेदाङ्गज्योतिषम्

वैदिकव्व्याक्ख्यानयुतम् ।

५. जैमिनीय-धर्म्ममीमांसासूत्त्रम्

कौण्डिन्न्यायनवृत्तिसहितम् ।

६. बादरायणीय-ब्रह्म्ममीमांसासूत्त्रम्

कौण्डिन्न्यायनवृत्तिसहितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu